Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सरलसंस्कृतसरणिः

(व्याकरणरटनं विना संस्कृतशिक्षणस्य अभिनवप्रत्यक्षपद्धतिः)

प्रथमो भागः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America: HHFA(USA).

C.S.S

9

FOR SHAIVA ST...

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सरलसंस्कृतसरणिः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मुख्यसम्पादको जगन्नाथो वेदालङ्कारः
संस्कृतविभागाध्यक्षः, श्रीअरविन्दान्ताराष्ट्रियशिक्षाकेन्द्रम्, पुदुच्चेरी-२

सहसम्पादको नरेन्द्रः
नवज्योतिःकार्यालयः, श्रीअरविन्दाश्रमः, पुदुच्चेरी-६०५००२

सर्वेऽधिकाराः पुदुच्चेरीस्थ-श्रीअरविन्दाश्रम-न्यासेन स्वायत्तीकृताः

प्रथमसंस्करणम्—फेब्रुअॅरि १९८३

प्रकाशको जगन्नाथो वेदालङ्कारः नरेन्द्रश्च, श्रीअरविन्दाश्रमः,
पुदुच्चेरी-६०५००२

मुद्रको नवज्योतिर्मुद्रणालयः, श्रीअरविन्दाश्रमः, पुदुच्चेरी-६०५००२

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

The sanskrit ought
to be the national language
of India.

blessings

संस्कृतमेव भारतस्य राष्ट्रभाषा भवेत् ।
मम आशिषः

१९.४.१९७१ —श्रीमाता

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

The Mother's Messages on Sanskrit

1. Simplified Sanskrit to replace Hindi as the language of India.

(The Mother, Vol. 12, p. 225)

2. Hindi is good only for those who belong to a Hindi-speaking province. Sanskrit is good for all Indians.

(Ibid., p. 224)

3. It is better to learn Sanskrit and try to make it a most living language.

Blessings

संस्कृतविषये श्रीमातुः सन्देशामृतम्

१. हिन्दीभाषायाः स्थाने सरलसंस्कृतमेव भारतवर्षस्य भाषा कर्तव्या ।

२. हिन्दीभाषा तेभ्यः एव समीचीना ये हिन्दीभाषिजनपदम् अधिवसन्ति । संस्कृतं समस्तभारतीयानाम् अर्थे श्रेयस्करम् ।

३. वरं खलु संस्कृतभाषायाः शिक्षणं तां जीवज्जाग्रद्भाषां कर्तुं प्रयत्नश्च ।

मम आशिषः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भगवतीं प्रति

भगवति भुवनजननि तव सुन्दर-
चरणकमलरतचित्तम् ।
कुरु मां कुरु मां हे करुणामयि
वितर विभास्वरवित्तम् ।।

मातर्मङ्गलमयि हर हर मम
मालिन्यं हर दैन्यम् ।
पराजयेथाः पृथुपापानां
पुण्यविघातकसैन्यम् ।।

विकृतविहारपरां मे प्रकृतिं
परिवर्तयितुं देहि ।
दिव्यां शक्तिं सर्वसमर्थां
मम हितमिदं विधेहि ।।

परमदयामयि दुरितदुरिच्छां
दारय तारय हीनम् ।
स्थापय मां शिवपदे सलीलं
तामसगर्तविलीनम् ।।

प्रतिबोधय मां सुप्तात्मानं
शोधय सकलं सत्त्वम् ।
उदये प्रेरय भगवद्भर्गं
भास्करमविकलतत्त्वम् ।।

अमितोदारमहामातर्मम
हृदयं कुरु निजधानीम् ।
भजे सदा त्वां भजे सदा त्वां
भक्त्या नतो भवानीम् ।।

— पूजालालः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मुखबन्धः

योगाश्रमाणां शेखरायमाणो विश्वविश्रुतः श्रीअरविन्दाश्रमः किल विदितवेदितव्यस्य कस्य न विदितः ! कस्य न वा बहुश्रुतस्य श्रुतिपथमुपेता तस्य साक्षादात्मभूताऽर्चनीयचरणा तदाचार्या, अध्यात्मविदां वन्दनीया भगवती 'मिरा'-भिधाना श्रीमाता !

आसीत्तस्या एष दिव्यस्वप्नः, एतद् दिव्यदर्शनं यद् विश्वस्य सकलभाषा-गतबीजध्वनीनां निधिभूता संस्कृतभाषा भारतस्य राष्ट्रभाषा भवेदिति । सा वाञ्छति स्म यद् भारते उत्पन्नेन प्रत्येकबालकेन एषा ज्ञातव्या । तदर्थञ्च अत्र आश्रमे बहिश्च सर्वत्रापि सरलं संस्कृतं शिक्षणीयम्—यथासम्भवं सरलम् । संस्कृतं भारतस्य सर्वजनीनभाषां कर्तुं तस्य सरलव्याकरणं रचनीयमित्यासीत् श्रीमातुरादेशो निर्देशश्च । प्रस्तुतकृतिः 'सरलसंस्कृतसरणिः' तस्यां दिशि प्रथम-प्रयासः । शिक्षकाः छात्राश्च द्रक्ष्यन्ति यद् अत्र व्याकरणं विषयरूपेण नैव शिक्षितम् । अपि तु तस्य सर्वेऽपि नियमाः, शब्दरूपावलि-धातुरूपावलिप्रभृतयः सर्वेऽपि विषयाः वाक्येषु पुनः पुनः प्रयोगद्वारा अवचेतनतया हृदयङ्गमाः कारिताः सुस्थिरं सुदृढश्च । अभ्यासैर्यो नियमः फलति स्वतः स्फुरति च छात्रस्य शिक्षकस्य च, स क्वचित् क्वचित् अभ्यासान्ते सङ्क्षेपेण सङ्केतितः । तथा चोक्तं प्राज्ञैः—

अभ्यासेन क्रियाः सर्वा अभ्यासात् सकलाः कलाः ।
अभ्यासाद् ध्यानमौनादि किमभ्यासस्य दुष्करम् ॥

युवा वृद्धोऽतिवृद्धो वा व्याधितो दुर्बलोऽपि वा ।
अभ्यासात् सिद्धिमाप्नोति सर्वकार्येष्वतन्द्रितः ॥

अभ्यासभास्वति तपत्यवनौ वने च
धीरस्य सिध्यति न यन्न तदस्ति किञ्चित् ।
यत्किञ्चिदप्यसरलं सरलं भवेत्तद्
गुह्यं च यद् भुवि करामलकायते तत् ॥

अथ च, अस्मिन्नाश्रमे संस्कृतशिक्षणं संस्कृतमाध्यमेनैव क्रियते आ बाल्यात् । तेन च व्यवहारोपयोगि शुद्धं संस्कृतं मातृभाषावद् विना व्याकरणभारं

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विज्ञायते । संस्कृतस्य समुच्चसाहित्यसर्जनार्थं तावद् व्याकरणस्य सर्वे नियमा विषयाश्च विज्ञेयाः । ते हि सरलसंस्कृतसरण्या अभ्यासपद्धत्या शिक्ष्यमाणाः सरलतया अधिकृता भवन्तीति नो मतम् ।

अनया दृष्ट्या प्रयोक्तव्या परीक्ष्या चेयं रचना प्रेक्षावद्भिर्गुणावगुण-परीक्षकैः, कविकुलगुरोः कालिदासस्य सूक्ति विमृशद्भिः—

तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ।।

लघुकृतिमिमां यावच्छक्यं निष्प्रमादां कर्तुं भूरिप्रयत्ने कृतेऽपि यदि क्वचित् प्रमादा लक्ष्येरन् क्षन्तव्यास्ते समाधेयाश्च सुधीभिः 'गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः । हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ।।' इति विपश्चिद्वचनं विचारयद्भिः । स्खलनानि सूच्यन्ते चेत् नूतनसंस्करणे संस्करिष्यन्ते ।

अपि च सहृदयैर्गुणग्राहिभिरस्या दोषगणादत्तदृष्टिभिर्गुणा ग्रहीष्यन्ते व्याहरिष्यन्ते चेति निम्नोपन्यस्तसत्परामर्शप्रदप्राज्ञपद्यद्वयेन विनिवेद्य विरमाम्येष विदुषामाश्रवः—

दृष्टं किमपि लोकेऽस्मिन् न निर्दोषं न निर्गुणम् ।
व्यावृणुध्वमतो दोषान् विवृणुध्वं गुणान् बुधाः ।।

गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेडाविवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ।।

—जगन्नाथो वेदालङ्कारः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पाठकान् प्रति

अपि संस्कृतम् आवश्यकम् ?

श्रीमातरं प्रति प्रश्नः— केषुचिद् विषयेषु भवती श्रीअरविन्दश्च सुस्पष्टम् उक्तवन्तौ । वयम् (श्रीअरविन्द-कर्मधारा-कर्मिणः) अपि एषु विषयेषु स्पष्टं वदामः—तद्यथा, देशस्य भाषाविषये भवत्या भणितम् (१) शिक्षायाः माध्यमं राज्यभाषा, (२) संस्कृतं राष्ट्रभाषा (३) आङ्ग्ली च अन्ताराष्ट्रिया भाषा भवेत् इति ।

अपि भाषाविषये अस्माकम् एतानि उत्तराणि यथार्थानि ?

श्रीमातुः उत्तरम्—ओम् ।

मम आशिषः ।

Q. On certain issues where You and Sri Aurobindo have given direct answers, we (Sri Aurobindo's Action) are also specific, as for instance...on the language issue where You have said for the country that (1) the regional language should be the medium of instruction, (2) Sanskrit should be the national language, and (3) English should be the international language.

Are we correct in giving these replies to such questions ?

The Mother's answer—Yes.

Blessings.

4 October, 1971 — The Mother, Vol. 12, p. 224

भूमिका

साधारणजनाः वदन्ति—संस्कृतं कठिनम्, क्लिष्टम्, बहुभिः व्याकरण-नियमैः निगडितम्, भूरिप्रयासेन अधिगन्तुं शक्यं च । का वा अस्य उपयोगिता दैनिकजीवने ? ... पण्डिताः भवितुं नेच्छामः वयम् । तेषां गतिवृत्तयः अस्माकं नाभीष्टाः । आधुनिकाः सुखसमृद्धिकामाः वयम् अन्यान् आकर्षकव्यापारान् त्यक्त्वा संस्कृतपठने कुतः समयं वृथा यापयेम ?

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अथ ये श्रीमातरं जानन्ति तस्याः दिव्यवचने च श्रद्धावन्तः तेषु बहवः कथयन्ति—श्रीमाता संस्कृतस्य सुदूर-भवितव्यता-विषये कथितवती न तु अचिर-सम्भाव्यता-विषये ! संस्कृतं भारतस्य राष्ट्रभाषा तथा शीघ्रं न सम्भवति यथा यूयं भावयथ। युष्माकं जीवितावधौ तु नैव ! श्रीमातुः त्रिकालव्यापिदृष्टौ कतिचिद् वर्षाणि अस्माकं कृते वर्षशतानि स्युः ! अतः अस्माकम् अस्मिन् जीवने संस्कृतं भारतस्य राष्ट्रभाषा भविष्यति इति दुराशामात्रम्। असम्भवम् एतत्। अतोऽस्मिन् क्लिष्ट-दुःसाध्यव्यापारे कुतः वृथा आयासः ?

संस्कृतं सर्वैः ज्ञातव्यम्। ये केऽपि अत्र कार्यं कुर्वन्ति तैः सर्वैः एतत् शिक्षणीयं यत् किमपि भवेत् तेषां जन्मस्थानम्। भारतस्य प्रत्येकं बालकः संस्कृतं जानीयात् एतत् च कतिपयैः वर्षैः देशस्य जनभाषा राष्ट्रभाषा च भवेत् इति श्रीमातुः दिव्यसन्देशविषये यदा तान् चेतयामः तदा तेषु नूनं किञ्चित् भावान्तरं लक्ष्यते। तथापि केचन कथयन्ति—अति व्यापृताः वयम्। करणीयं कर्म पर्याप्तं वर्तते। अस्मै कष्टसाध्यविषयाय कुत्र समयः ? अमुकविषयः अमुकभाषा वा एतदपेक्षया सरलतरा। अत्र अस्माभिः अधिकसमयः दातव्यः।

तेषाम् इमं भावं बुद्ध्वा वयं कथयामः—जीवने अन्ये विषयाः भाषाश्च अवश्यं शिक्षणीयाः। तैः सह संस्कृतमपि शिक्षणीयम्। यथा वयं भावयामः, संस्कृतं न तथा क्लिष्टः भयप्रदश्च विषयः। भारतीयेषु अस्मासु संस्कृतज्ञानं वर्तते एव। सामान्यप्रयासेन संस्कृतस्य सरलं व्यावहारिकज्ञानम् अधिगन्तुं शक्यम्। कति वर्षाणि अस्माभिः अन्यभाषाशिक्षणे यापितानि कियत् च शिक्षितम् ? सर्वान् अपि भावान् आवेगान् च तस्यां प्रकाशयितुम् अस्माभिः जीवितस्य कियान् कालः अतिवाहितः कियान् च संस्कृतशिक्षणे ? यावान् समयः अन्यभाषाशिक्षणे तत्परतया याप्यते तस्य चतुर्थांशः संस्कृतशिक्षणे दीयेत चेत् अन्यभाषापेक्षया नूनं सरलतरं भवेत् संस्कृतम् !

अत्र अस्माभिः एतदवश्यं स्वीकर्तव्यं यत् साम्प्रतं यया पद्धत्या संस्कृतं पाठ्यते सा क्लिष्टा, दुरधिगम्या इति। एतावत्कालं संस्कृतस्य कठिनं स्वरूपमेव अस्मत्पुरतः उपस्थितम् ! भिन्नवातावरणानां विषयाः अस्मभ्यं परिवेषिताः। धातु-शब्दरूपरटनेन एव अस्माभिः जीवितस्य महार्घः कालः क्षपितः। तथापि वाण्यां न स्फुरति संस्कृतम् इति अहो आश्चर्यम् ! ! ! किन्तु अधुना तथा न करणीयं नावश्यकं च। अस्ति किमपि संस्कृतस्य सरलम्, अनवद्यं निरुपमं च स्वरूपम्। तदेव अस्माभिः ज्ञातव्यं शिक्षणीयञ्च। अत्र शिक्षकस्य भूमिका खलु महत्त्वपूर्णा।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

श्रीमाता कथयति—पाठ्यविषये छात्त्राणां रुचिजागरणं शिक्षकस्य प्रथमं प्रधानं च कर्तव्यम् । तस्मिन् छात्त्रस्य रुचिः जागरिता चेत् तस्य अनुशीलने सः स्वयं प्रयतिष्यते । एतदर्थं शिक्षकः श्रमेण बहु अध्ययनं कुर्यात् पाठ्यविषयं च स्वयं रचयेत् । वर्गे सः अन्यरचितपुस्तकं यन्त्रवत् न वाचयेत् । पुनः सा कथयति—अन्यस्य पद्धतिः तावत् सन्तोषकरी न स्यात् यावत् सा स्वकीया न भवेत् । अतः छात्त्राणां परिवेषः, रुच्यनुरूपविषयाश्च पाठ्यक्रमे अन्तर्भुक्ताः स्युः ते च आह्वानम् इव तेषां पुरतः उपस्थाप्येरन् । यत् किमपि उदात्तम्, चरित्रनिर्माणे सहायकं तत् सर्वं यस्मात् कस्मादपि ग्रहणीयं शिक्षणीयं च इति अवगन्तव्यमेव ।

एतस्यां पृष्ठभूमौ गतवर्षद्वये अस्य पुस्तकस्य अन्तर्गताः पाठाः आश्रम-विद्यालयस्य प्रौढवर्गार्थं रचिताः भूयसा च तत्र पाठिताः । छात्त्रः स्पष्टं बोधेत्, शुद्धं वदेत् संस्कृतसाहित्ये च तस्य प्रवेशः सुकरः स्यात् इति धिया अस्मिन् पुस्तके पाठाः प्रदत्ताः । तत्र प्रत्येकविषयस्य वहुविस्तारः कृतः—वहूनि उदाहरणानि बहवः अभ्यासाश्च प्रदत्ताः । सर्वेषां पाठकानां स्तरः ग्रहणसामर्थ्यं च समाने न स्याताम् । अतः यदि किमपि कठिनम् अवोध्यं वा स्यात् तत् त्यक्त्वा अग्रे अग्रे एव पठनीयम् । पाठेषु शब्दाः प्रयोगाः वा कठिनाः स्युः चेत् पाठान्ते प्रदत्ताः शब्दार्थाः आदौ अपि द्रष्टुं शक्याः । किन्तु दशमपाठात् परं शब्दानाम् अर्थ-ज्ञानार्थम् (आवश्यकं चेत्) कस्यचित् संस्कृतकोषस्य सहायता ग्रहणीया । भाषाशिक्षणार्थं कोषः अतीव प्रयोजनीयः । अतः अस्य पुस्तकस्य उपान्तिमे पृष्ठे संस्कृतकोषस्य केषाञ्चित् उपयोगिपुस्तकानां च नाम-प्राप्तिस्थानादिकं प्रदत्तम् । तद् द्रष्टव्यम् । परिशिष्टगताः लेखाः, कथाः आलापादयश्च कदा कदापि पठनीयाः ।

अथ भाषाशिक्षणार्थं श्रीमातुः सन्देशाधारेण लिखितोऽयं श्लोकः श्रीमातुः सन्देशश्च अस्मान् प्रेरयेत् अस्माकं प्रगतेः निकषश्च भवेत् —

पठ्यतां पठ्यतां नित्यं भाष्यतां भाष्यतां भृशम् ।
शिक्षितुं काङ्क्षता भाषा यदि भो प्रियबान्धवाः ।।

To learn a language one must read, read, read —and talk as much as one can.

With all my love.—The Mother, Vol. 12, p. 221

—नरेन्द्रः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विषयानुक्रमः

मङ्गलाचरणम् १

प्रथमः पाठः २
तत्त्वमसि...

द्वितीयः पाठः ५
अयम् इमौ इमे, एषः एतौ एते, सः तौ ते, बालकः बालकौ बालकाः, अस्ति स्तः सन्ति, पठति पठतः पठन्ति...

तृतीयः पाठः ९
त्वम् युवाम् यूयम्, असि स्थः स्थ, पठसि पठथः पठथ...

चतुर्थः पाठः १२
अहम् आवाम् वयम्, अस्मि स्वः स्मः, पठामि पठावः पठामः...

पञ्चमः पाठः १९
विभक्तयः

षष्ठः पाठः २२
भविष्यत्कालः, दशमगणीयधातवः

सप्तमः पाठः २७
प्रयोजकार्थ-णिजन्तप्रयोगाः

अष्टमः पाठः ३०
'तुम्' (तुमुन्)प्रयोगाः

नवमः पाठः ३४
'त्वा'(क्त्वा)प्रयोगाः

दशमः पाठः ४०
विभक्तयः (श्लोकैः)

एकादशः पाठः ४५
विभक्तिप्रयोगाः, अकारान्त-पुंलिङ्गशब्दाः

द्वादशः पाठः ५८
सर्वनामप्रयोगाः, सर्वनामशब्दाः सङ्ख्याशब्दाश्च पुंलिङ्गे

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

त्रयोदशः पाठः ६६

नपुंसकलिङ्गप्रयोगाः, सर्वनामशब्दाः सङ्ख्याशब्दाश्च नपुंसकलिङ्गे, अकारान्त-नपुंसकलिङ्गशब्दाः

चतुर्दशः पाठः ७६

लट्-लोट्-लङ-लृङ-लिङलकारप्रयोगाः परस्मैपदे उत्तमपुरुषे

पञ्चदशः पाठः ८६

लट्-लोट्-लङ-लृङ-लिङलकारप्रयोगाः परस्मैपदे मध्यमपुरुषे

षोडशः पाठः ९५

लट्-लोट्-लङ-लृङ-लिङलकारप्रयोगाः परस्मैपदे प्रथमपुरुषे, क्तः, क्तवतुः, तव्यत्, अनीयर्, धातुरूपसारणी

सप्तदशः पाठः १३१

स्त्रीलिङ्गशब्दानां प्रयोगाः, सर्वनामशब्दाः सङ्ख्याशब्दाश्च स्त्रीलिङ्गे, आ-इ-ई-उ-ऊकारान्त-स्त्रीलिङ्गशब्दाः, सङ्ख्याप्रयोगाः, उ-इकारान्त-पुंलिङ्गशब्दाः

परिशिष्टम्

'संस्कृतं भारतस्य राष्ट्रभाषा भवेत्' १६०

अपि संस्कृतं भारतस्य राष्ट्रभाषा भवितुम् अर्हति ? १६१

संस्कृतं भारतस्य राष्ट्रभाषा कथं भवेत् ? १६३

द्वौ शिक्षकौ १६६

विक्रमस्य संस्कृतनिष्ठा १६७

छात्रशिक्षकालापः (१) १६९

सङ्ग्रामस्य राधेशस्य च आलापः १७१

छात्रशिक्षकालापः (२) १७४

चायापणगोष्ठी १७५

भयं नाशस्य कारणम् १७६

सः गर्दभः आसीत् १७७

मित्रपरीक्षा १७८

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सुखी पुरुषः	१७९
चोरिते आम्रे	१८०
शुद्धहृदयम्	१८१
कृषकस्य अभीष्टः वरः	१८१
सिंहचर्मधरः गर्दभः	१८२
आयाति चौरः	१८३
धिग्बलं क्षत्रियबलं ब्रह्मतेजो बलं बलम्	१८३
आत्मसंयमः	१८५
धैर्यम् अध्यवसायश्च	१८७
सत्साहसम्	१८७
दूरदर्शी वणिक्	१८८
यथार्थनिर्णयः	१८९
पार्वती शङ्करं पराजयते	१९०
यदन्तरं तद्वाह्यम्···	१९१
पत्त्रम्	१९२
अभयं खलु संस्कृतम्	१९३
मान्या भारतवासिनः शृणुत हे	१९६
कतिचिद् उपयोगिपुस्तकानि	१९७

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ॐ नमो भगवते श्रीअरविन्दाय ।
ॐ नमो भगवत्यै मीराम्बिकायै ।

मङ्गलाचरणम्

प्रणम्य मातरं मीरां संस्कृतोद्धारकारिणीम् ।
श्रीअरविन्दपादांश्च ग्रन्थोऽयं रच्यते मुदा ।।

सार्थान्वयः —संस्कृतोद्धारकारिणीं मातरं मीरां (श्रीमातरम्) श्रीअरविन्दपादान् च प्रणम्य (नमस्कृत्य) अयं ग्रन्थः मुदा (सानन्दम् / आनन्देन) रच्यते (रचितः भवति) ।

वाचि मे महिता माता कण्ठे सा हृदि सर्वदा ।
राजतां मानसे देहे सर्वत्र दीपयेच्च माम् ।।

सार्थान्वयः — सा महिता (महनीया/पूजनीया/परमाराध्या) माता (श्रीमाता) मे (मम) वाचि (वाण्याम्), कण्ठे, हृदि (हृदये), मानसे (मनसि), देहे (शरीरे) सर्वदा राजताम् (विराजताम्) सर्वत्र (शरीरस्य प्रत्येकस्मिन् अवयवे) च मां दीपयेत् [स्वसत्यज्योतिषा] (प्रदीप्तं कुर्यात्) ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

संस्कृतं कठिनं नास्ति सुबोधं सरलं हि तत् ।
भारते भाषितं तच्च श्रीमातुरीप्सितं प्रियम् ।।

सार्थान्वयः — संस्कृतं कठिनं (क्लिष्टम्) नास्ति । तत् हि (निश्चिततया) सुबोधम्, सरलम् । तत् च भारते भाषितं [भवतु इति] श्रीमातुः प्रियम् ईप्सितम् (शुभकामना) । श्रीमाता इच्छति यत् संपूर्णे भारतवर्षे संस्कृतं व्यवहारभाषा भवतु इति ।

प्रथमः पाठः

तत् त्वम् असि । 'तत्त्वमसि' । त्वं कः असि ? अहं ब्रह्म अस्मि । 'अहं ब्रह्मास्मि' । सः अपि ब्रह्म अस्ति । सोऽपि ब्रह्मास्ति । तत्त्वतः यत् त्वम् असि, तत् अहम् अस्मि, तत् सः अपि अस्ति ।

त्वं कः (असि) ? अहं कः (अस्मि) ? सः कः (अस्ति) ?

अभ्यासाः

१.	अहं छात्त्रः ।	त्वं शिक्षकः ।	सः साधकः ।
	अहं बालकः ।	त्वं युवकः ।	सः सेवकः ।
	अहं नरेन्द्रः ।	त्वं राजेन्द्रः ।	सः सुरेन्द्रः ।

— एषु वाक्येषु प्रत्येकस्मिन् किं क्रियापदम् अध्याहृतम् ? यथा— 'अहं छात्त्रः' इति अस्मिन् वाक्ये 'अस्मि' इति क्रियापदम् अध्याहृतम् । ('अस्मि' इति एतत् क्रियापदं विनापि वाक्यस्य अर्थः सुस्पष्टः ।)—In each of these sentences which verb is understood ? As for example, in the sentence 'अहं छात्त्रः' 'अस्मि' is understood.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

२. यदि (त्वम् + असि = त्वमसि, अहम् + अस्मि = अहमस्मि) तर्हि

मित्रम् + अस्ति = ··· मित्रम् + असि = ···
मित्रम् + अस्मि = ··· किम् + अस्ति = ···
छत्त्रम् + अस्ति = ··· वस्त्रम् + अस्ति = ···
पत्त्रम् + अस्ति = ··· फलम् + अस्ति = ···
भयम् + अस्ति = ··· अयम् + अहम् = ···

३. यदि (सः + अपि = सोऽपि, सः + अहम् = सोऽहम्) तर्हि

कः + अपि = ··· रामः + अपि = ···
कः + अस्ति = ··· कः + अहम् = ···
शिवः + अहम् = ··· धन्यः + अहम् = ···
कः + असि = ··· कः + अस्मि = ···
सः + अवदत् = ··· नमः + अस्तु = ···
अनुगृहीतः + अस्मि = ··· उपकृतः + अस्मि = ···

४. सन्धिं कुरु —

सः + अहम् + अस्मि । अयम् + अवतारः + अस्ति । त्वम् + अध्यापकः + असि । अयम् + अन्धः + अस्ति । अयम् + अजगरः + अस्ति । अयम् + अजः + अस्ति ।

५. यदि (ब्रह्म + अस्मि = ब्रह्मास्मि, देव + आलयः = देवालयः) तर्हि

मम + अपराधः = ··· मुर + अरिः = ···
गज + आकारः = ··· पर + आश्रयः = ···
तव + आदेशः = ··· तथा + अस्तु = ···
दिवा + अन्धः = ··· दया + अर्णवः = ···
विद्या + आलयः = ··· दिव्य + आनन्दः = ···

६. सन्धिं कुरु—

किम् + अत्र + अस्ति । किम् + अद्य + अस्ति । किम् + अपि । न + अस्ति । श्वः + अत्र + आगच्छ । अद्य + अहम् + अत्र + आगतः + अस्मि । सः + अद्य + अत्र + आयाति ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अवधेयम्

(क) पद्ये समासे च सन्धिः अनिवार्यः । गद्ये सः ऐच्छिकः । Sandhi is compulsory in poetry and compounds. It is optional in prose. सन्धि पद्य और समास में अनिवार्य है, गद्य में ऐच्छिक ।

(ख) 'अहं ब्रह्म अस्मि ।' व्यञ्जनवर्णे परे सति एव पदान्तस्य मकारस्य अनुस्वारः भवति ।

'तत् त्वम् असि ।' स्वरवर्णे परे सति मकारस्य अनुस्वारः नैव भवति ।

'संस्कृतम् अस्माभिः नित्यं पठनीयम् ।' स्वरवर्णे परे सति वाक्यस्य अन्ते च 'म्' इत्यस्य अनुस्वारः (ं) न भवति । सर्वत्रापि 'म्' यथावत् स्थातुं शक्नोति किन्तु न सा प्रौढशैली ।

म् does not change into अनुस्वार at the end of the sentence and also, if followed by a vowel. One can keep म् as it is but that is not a mature style.

वाक्य के अन्त में और स्वरवर्ण परे होने पर म् का म् ही रहता है । सब स्थानों पर म् का म् ही रखा जा सकता है किन्तु वह प्रौढ़ शैली नहीं है ।

१. शुद्धं लिख । Rewrite correctly—

अयं आश्रमः । अयं आश्रमिकः । अहं इमं आश्रमिकम् बहुपूर्वं अजानां । अयं ऋषिः । अहं इमं ऋषिम् प्रतिदिनम् नमामि । इदं उद्यानं । अहं इदं उद्यानम् प्रतिदिनं आयामि । इदं औषधं । त्वं इदं औषधम् प्रतिदिनम् सेवस्व, अचिरम् रोगमुक्तः भविष्यसि । अयं ऐरावतः । अपि त्वम् सजीवं ऐरावतम् कुत्रापि दृष्टवान् ? संस्कृतं अस्माभिः नित्यम् पठनीयं । तत् च सदा भाषणीयं । तदेव भारतस्य राष्ट्रभाषापदे प्रतिष्ठापनीयं । श्रीमातुः वचनं अस्माभिः अक्षरशः पालनीयं ।

अत्र आगम्यतां । इदं आसनं अलङ्क्रियतां । संस्कृतम् पठ्यतां ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शब्दार्थः

'तत्त्वमसि' । That thou art. तू वह (परमतत्त्व) है । 'अहं ब्रह्मास्मि' । I am Brahman. मैं ब्रह्म हूं । सोऽपि ब्रह्म अस्ति । He is also Brahman. वह भी ब्रह्म है । त्वम्—thou, तू, तुम । असि—art, हो । अहम्—I, मैं । अस्मि—am, हूं । अपि—also, भी । सः—he, वह । अस्ति—is, है । तत्त्वतः—(तत्त्वदृष्ट्या) in essence/reality, तत्त्वदृष्टि से । यत् त्वम् असि—whatever you are, तुम जो हो, तत् अहम् अस्मि—that I am, मैं वही हूं, तत् सोऽपि अस्ति—he is also that, वह भी वहीं है । कः—who, कौन ? यदि—if, अगर । तर्हि—then, तो । अन्धः—blind. किम् n. what, क्या, कौन ? अत्र—here, यहां । अद्य—today, आज । श्वः—tomorrow, कल । अयम्—this, यह । एषः—this (nearer), यह । तत्र—there, वहां । कुत्र—where, कहां ? यत्र—where, जहां । अन्यत्र—in another place, elsewhere, दूसरी जगह । सर्वत्र—everywhere, सब जगह । च—and, और । छात्रः—student. शिक्षकः—teacher. सेवकः—servant, servitor. बालकः—boy. युवकः—young man. अनुगृहीतोऽस्मि—I am much obliged, many thanks. उपकृतोऽस्मि—I am benefited, thanks. धन्योऽस्मि—I am blessed, fortunate. सुप्रभातम्—good morning. सुदिनम्—good day. सुसायम्—good evening. सुरात्रिः—good night.

द्वितीयः पाठः

अयं देवः (अस्ति) ।	अयम् अमरः (अस्ति) ।
इमौ देवौ (स्तः) ।	इमौ अमरौ (स्तः) ।
इमे देवाः (सन्ति) ।	इमे अमराः (सन्ति) ।
एषः बालकः (अस्ति) ।	एषः सुशीलः (अस्ति) ।
एतौ बालकौ (स्तः) ।	एतौ सुशीलौ (स्तः) ।
एते बालकाः (सन्ति) ।	एते सुशीलाः (सन्ति) ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सः	भक्तः	(अस्ति) ।	सः	प्रसन्नः	(अस्ति) ।
तौ	भक्तौ	(स्तः) ।	तौ	प्रसन्नौ	(स्तः) ।
ते	भक्ताः	(सन्ति) ।	ते	प्रसन्नाः	(सन्ति) ।

वर्तमानकालः (Present Tense)

	एकवचनम् Singular	द्विवचनम् Dual	बहुवचनम् Plural
(अस्)	अस्ति	स्तः	सन्ति
(नम्)	नमति	नमतः	नमन्ति
(पठ्)	पठति	पठतः	पठन्ति

प्रथमपुरुषः (Third Person)

	एकवचनम्	द्विवचनम्	बहुवचनम्
(इदम्)	अयम् (This, यह)	इमौ (These two, ये दोनों)	इमे (These, ये सब)
(तद्)	सः (He, वह)	तौ (They two, वे दोनों)	ते (They, वे सब)
(एतद्)	एषः (This, यह)	एतौ (These two, ये दोनों)	एते (These, ये सब)
(देव)	देवः	देवौ	देवाः
(वालक)	वालकः	वालकौ	वालकाः
(भक्त)	भक्तः	भक्तौ	भक्ताः

अभ्यासाः

१. अयम् आश्रमः । अयं साधकः । अयं समुद्रः । अयं तरङ्गः । अयम् आकाशः । अयं सूर्यः । अयं चन्द्रः । अयं विद्यालयः । अयं छात्रः । अयं शिक्षकः । अयं गणमुख्यः ।

—एषु वाक्येषु प्रत्येकस्मिन् किं क्रियापदम् अध्याहृतम् ?

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

२. इमौ शिक्षकौ । इमौ छात्त्रौ । इमौ साधकौ । इमौ बालकौ । इमौ व्याघ्रौ । इमौ सिंहौ । इमौ ब्राह्मणौ । इमौ घोटकौ । इमौ चातकौ । इमौ शुककाकौ । इमौ रामलक्ष्मणौ । इमौ भरतशत्रुघ्नौ ।

—एषु वाक्येषु प्रत्येकस्मिन् किं क्रियापदम् अध्याहृतम् ?

एतानि वाक्यानि एकवचने लिख । यथा—

इमौ शिक्षकौ—अयं शिक्षकः । इमौ शुककाकौ—अयं शुकः अयं च काकः ।

३. इमे छात्त्राः । इमे बालकाः । इमे साधकाः । इमे शिक्षकाः । इमे रक्षकाः । इमे वीराः । इमे धीराः । इमे ऋग्यजुःसामाथर्ववेदाः । इमे यदुमधुश्यामगोविन्दाः । इमे रामलक्ष्मणभरतशत्रुघ्नाः ।

—एषु वाक्येषु प्रत्येकस्मिन् किं क्रियापदम् अध्याहृतम् ?

४. अयम्, इमौ, इमे इति एतैः शब्दैः रिक्तस्थानानि पूरय—
कः— ? — मम शिक्षकः । कौ — ? — मम पितरौ । के — ? — मम बान्धवाः । — अस्माकं विद्यालयः । — अस्माकं सेवकौ । — अस्माकं शिक्षकाः ।

५. एषः, एतौ, एते इति एतैः शब्दैः रिक्तस्थानानि पूरय—
— मम वामः हस्तः । — मम दक्षिणः हस्तः । — मम वामः कर्णः । — मम दक्षिणः कर्णः । — मम वामः पादः । — मम दक्षिणः पादः । — मम हस्तौ । — मम कर्णौ । — मम पादौ । — छात्त्राध्यापकौ । — मम केशाः । — मम दन्ताः । — मम सहायकाः ।

६. सः, तौ, ते इति एतैः शब्दैः रिक्तस्थानानि पूरय—
कः — ? — मम भ्राता । कौ — ? — मम पितरौ । के — ? — अस्माकं विद्यालयस्य छात्त्राः । — कुत्र गच्छति ? — कुत्र गच्छतः ? — कुत्र गच्छन्ति ? — तत्र किं करोति ? — तत्र किं कुरुतः ? — किं कुर्वन्ति ? — कं नमति ? — गणेशं नमति । — कं नमतः ? — शिवं नमतः । — कं नमन्ति ? — नारायणं नमन्ति ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वर्तमानकालः (Present Tense)—प्रथमपुरुषः (Third Person)

	एकवचनम्	द्विवचनम्	बहुवचनम्
(नम्—to bow down, to bend, नमस्कार करना, झुकना)	नमति	नमतः	नमन्ति
(पठ्—to read, पढ़ना)	पठति	पठतः	पठन्ति
(वद्—to speak, बोलना)	वदति	वदतः	वदन्ति
(धाव्—to run, to wash, दौड़ना, स्वच्छ करना)	धावति	धावतः	धावन्ति

इत्थं खाद्—to eat, खाना; क्रीड्—to play, खेलना; खेल्—to play, खेलना; जप्—to repeat, to utter in a low voice, जपना, मन्द स्वर से उच्चारण करना; हस्—to laugh, हँसना; भ्रम्—to roam or wander about, इधर-उधर घूमना; चल्—to shake, to walk, हिलना, चलना; त्यज्—to abandon, त्याग करना; पच्—to cook, to digest (as food), पकाना, भोजनादिक पचाना; रक्ष्—to protect, to save, रक्षा करना; जीव्—to live, जीना; वस्—to live or dwell, निवास करना; वाञ्छ्—to wish, to desire, अभिलाषा करना, चाहना; भज्—to worship, to serve, पूजा करना, सेवा करना; जल्प्—to prattle, to talk, बक-बक करना, बातें करना इति एतेषां धातूनां वर्तमानकाले प्रथमपुरुषे रूपाणि लिख तानि च वाक्येषु व्यवहर। Make sentences, in present tense, using these roots.

शब्दार्थाः

देवः—god. अमरः—immortal. सुशीलः—of good conduct. भक्तः—devotee. प्रसन्नः—delighted. समुद्रः—sea.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तरङ्गः—wave. आकाशः—sky. सूर्यः—sun. चन्द्रः—moon. विद्यालयः—school. गणमुख्यः—captain of a group. घोटकः—horse. व्याघ्रः—tiger. सिंहः—lion. काकः—crow. शुकः—parrot. रक्षकः—protector. वीरः—hero. धीरः—wise, calm, composed. वामः—left. दक्षिणः—right. मम—my, मेरा। अस्माकम्—our, हमारा। कर्णः—ear. पादः—foot. अध्यापकः—professor. नखः—nail. केशः—hair. दन्तः—tooth. भ्राता—brother. अग्रजः—elder brother. अनुजः—younger brother. पितरौ—parents. इत्थंम्—like this. सहायकः—helper.

तृतीयः पाठः

त्वं छात्त्रः (असि)।	त्वं संस्कृतप्रियः (असि)।
युवां छात्त्रौ (स्थः)।	युवां संस्कृतप्रियौ (स्थः)।
यूयं छात्त्राः (स्थ)।	यूयं संस्कृतप्रियाः (स्थ)।
त्वं धनिकः (असि)।	त्वम् उदारः (असि)।
युवां धनिकौ (स्थः)।	युवाम् उदारौ (स्थः)।
यूयं धनिकाः (स्थ)।	यूयम् उदाराः (स्थ)।

त्वं पठसि। त्वं किं पठसि? अपि त्वं संस्कृतं पठसि? युवां पठथः। युवां किं पठथः? अपि युवां संस्कृतं पठथः? यूयं पठथ। यूयं किं पठथ? अपि यूयं संस्कृतं पठथ? त्वं मातरं नमसि। युवां मातरं नमथः। यूयं मातरं नमथ। त्वं कां नमसि? युवां कां नमथः? यूयं कां नमथ? त्वं कः? युवां कौ? यूयं के?

वर्तमानकालः (Present Tense)

	एकवचनम्	द्विवचनम्	बहुवचनम्
(अस्)	असि	स्थः	स्थ
(पठ्)	पठसि	पठथः	पठथ
(नम्)	नमसि	नमथः	नमथ

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मध्यमपुरुषः (Second Person)

त्वम्	युवाम्	यूयम्
(Thou, You, तू)	(You two, तुम दोनों)	(You all, तुम सब)

अभ्यासाः

१. रिक्तस्थानानि पूरय—

त्वं साधकः । त्वं सरलः । युवां साधकौ । युवां — । यूयं साधकाः । यूयं — । त्वं छात्त्रः । त्वम् अध्ययनशीलः । युवां — । युवाम् — । यूयं — । यूयम् — । त्वं भारतीयः । युवां भारतीयौ । यूयं — । त्वं भद्रः । युवां — । यूयं — ।

—एषु वाक्येषु प्रत्येकस्मिन् किं क्रियापदम् अध्याहृतम् ?

२. त्वम्, युवाम्, यूयम् इति एतैः शब्दैः रिक्तस्थानानि पूरय—

— स्थूलः न असि । — कृशः ।
— स्थूलौ न स्थः । — कृशौ ।
— स्थूलाः न स्थ । — कृशाः ।
— निर्दयः न असि । — सदयः ।
— निर्दयौ न स्थः । — सदयौ ।
— निर्दयाः न स्थ । — सदयाः ।

३. रिक्तस्थानानि पूरय—

त्वम् असुन्दरः न — । — सुन्दरः ।
युवाम् असुन्दरौ न — । — सुन्दरौ ।
यूयम् असुन्दराः न — । — सुन्दराः ।
— असभ्यः न — । — सभ्यः ।
— असभ्यौ न — । — सभ्यौ ।
— असभ्याः न — । — सभ्याः ।
— अप्रसन्नः न — । — प्रसन्नः ।
— अप्रसन्नौ न — । — प्रसन्नौ ।
— अप्रसन्नाः न — । — प्रसन्नाः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

— मम अप्रियः न — । — मम प्रियः ।
— मम अप्रियौ न — । — मम प्रियौ ।
— मम अप्रियाः न — । — मम प्रियाः ।

४. इत्थं कुरूपः, सुरूपः, खट्वनः, तुङ्गः, श्यामाङ्गः, गौराङ्गः, अज्ञः, विज्ञः, कठोरः, कोमलः, मूर्खः, पण्डितः, मूकः, वाचालः, कृपणः, उदारः, दुर्बलः, सबलः, प्राच्यः, पाश्चात्यः, उदीच्यः, दाक्षिणात्यः इति एतैः शब्दैः वाक्यानि रचय ।

५. कोष्ठकान्तर्गतधातूनां वर्तमानकालमध्यमपुरुषरूपैः रिक्तस्थानानि पूरय । Fill in the blanks using the roots in the brackets, in present tense second person.

त्वं किं (खाद्) — ? त्वं कदा (खाद्) — ? त्वं दिने कतिवारं (खाद्) — ? त्वं कुत्र (खेल्) — ? त्वं कदा (खेल्) — ? त्वं केन सह (खेल्) — ? त्वं मातुः नाम (जप्) — किम् ? त्वं कदा मातुः नाम (जप्) — ? त्वं किमर्थं मातुः नाम (जप्) — ? कुतः त्वं वर्गे उच्चैः (हस्) — ? त्वं प्रतिदिनं समुद्रतीरे (भ्रम्) — किम् ? त्वं कदा (भ्रम्) — ? त्वं केन सह (भ्रम्) — ? त्वं किमर्थं शीघ्रं शीघ्रं (चल्) — ? कृपया मन्दं मन्दं चल । यदि त्वं दुर्गुणान् (त्यज्) — तर्हि सद्गुणान् प्राप्स्यसि एव । त्वं प्रतिदिनम् अन्नं (पच्) — किम् ? त्वं कन्दुकं दूरं (क्षिप्)— । हे मातः, त्वं मां सदैव (रक्ष्) — । त्वं श्रीमात्रे तस्याः कार्यार्थं च (जीव्)—किम् ? त्वम् अत्र किमर्थं (वस्)—? त्वं किं (वाञ्छ्)—? त्वं कं देवं कां देवीं वा (भज्)—? सत्यमेव त्वं बहु (जल्प्)—।

—इमानि सर्वाणि वाक्यानि द्विवचने बहुवचने च लिख ।

६. निन्द्—to blame, निन्दा करना; क्रन्द्—to cry, रोना, पुकारना; पत्—to fall, गिरना; हिंस्—to injure, to kill, मारना; व्रज्—to go, जाना; वह्—to carry, to flow, ले जाना, बहना; कूज्—to chirp, to make an inarticulate sound, कूजना; चर्— to go, to graze,

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

चलना, चरना; हिक्क्—to hiccough, हिचकी आना इति एतेषां धातूनां वर्तमानकाले मध्यमपुरुषे रूपाणि लिख तानि च वाक्येषु व्यवहर ।

शब्दार्थाः

संस्कृतप्रिय—lover of sanskrit. धनिक—rich. निर्धन—poor. मातरम्—to the Mother. सरल—simple. भद्र—gentle. स्थूल—fat, bulky. कृश—lean, thin. सदय—kind. निर्दय—cruel. सुरूप—handsome. कुरूप—ugly. तुङ्ग—tall. खट्टन (वामन)—dwarfish. गौराङ्ग—of fair complexion. श्यामाङ्ग—of dark complexion. अज्ञ—ignorant. विज्ञ—wise. कठोर—hard. कोमल—soft. मूर्ख—foolish. पण्डित—scholar. मूक—dumb. वाचाल—talkative. कृपण—miser. उदार—generous. दुर्बल—weak. सबल—strong. प्राच्य—eastern. पाश्चात्य—western. उदीच्य—northern. दाक्षिणात्य—southern. असभ्य (अशिष्ट)—uncivilized, indecent.

चतुर्थः पाठः

अहं छात्त्रः (अस्मि) ।	अहं संस्कृतप्रियः (अस्मि) ।
आवां छात्त्रौ (स्वः) ।	आवां संस्कृतप्रियौ (स्वः) ।
वयं छात्त्राः (स्मः) ।	वयं संस्कृतप्रियाः (स्मः) ।
अहं संस्कृतं पठामि ।	आवां संस्कृतं पठावः ।
वयं संस्कृतं पठामः ।	अहं मातरं नमामि ।
आवां मातरं नमावः ।	वयं मातरं नमामः ।

वर्तमानकालः (Present Tense)

	एकवचनम्	द्विवचनम्	बहुवचनम्
(अस्)	अस्मि	स्वः	स्मः
(पठ्)	पठामि	पठावः	पठामः
(नम्)	नमामि	नमावः	नमामः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

उत्तमपुरुषः (First Person)

अहम्	आवाम्	वयम्
(I, मैं)	(We two, हम दोनों)	(We all, हम सब)

१. रिक्तस्थानानि पूरय—

अहं साधकः । अहम् आगन्तुकः न अस्मि ।
आवां साधकौ । आवाम् आगन्तुकौ न — ।
वयं साधकाः । वयम् आगन्तुकाः न — ।

अहम् आश्रमिकः । अहं विवाहितः न — ।
आवाम् — । आवां — न — ।
वयम् — । — — न — ॥

२. अहम्, आवाम्, वयम् इति एतैः शब्दैः रिक्तस्थानानि पूरय—

— दुष्टः न अस्मि । — शिष्टः ।
— दुष्टौ न स्वः । — शिष्टौ ।
— दुष्टाः न स्मः । — शिष्टाः ।

— चपलः न अस्मि । — शान्तः ।
— चपलौ न स्वः । — शान्तौ ।
— चपलाः न स्मः । — शान्ताः ।

— दुःखितः न अस्मि । — सुखितः ।
— दुःखितौ न स्वः । — सुखितौ ।
— दुःखिताः न स्मः । — सुखिताः ।

३. रिक्तस्थानानि पूरय—

अहं वृद्धः न — । — युवकः ।
आवां वृद्धौ न — । — युवकौ ।
वयं वृद्धाः न — । — युवकाः ।

— कुटिलः न — । — सरलः ।
— कुटिलौ न — । — सरलौ ।
— कुटिलाः न — । — सरलाः ।

— मलिनः न — । — स्वच्छः ।
— मलिनौ न — । — स्वच्छौ ।
— मलिनाः न — । — स्वच्छाः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

४. इत्थं दुःशीलः, सुशीलः, दुश्चरित्रः, सुचरित्रः, दुराचारः, सदाचारः, निर्धनः, सधनः, अज्ञानः, सज्ञानः, निन्द्यः, स्तुत्यः, कापुरुषः, वीरः, प्राचीनः, अर्वाचीनः, अनवधानः, सावधानः इति एतैः शब्दैः वाक्यानि रचय।

५. यदि सुरः इति अस्य विपरीतः शब्दः असुरः भवेत् तर्हि—

सुरः	असुरः।	कुशलः	अकुशलः।
दिव्यः	...।	चञ्चलः	...।
चेतनः	...।	धर्मः	...।
परिचितः	...।	पक्वः	...।
धीरः	...।	नियमितः	...।
मानुषः	...।	पवित्रः	...।
नित्यः	...।	श्रद्धा	...।
विश्वासः	...।	शुद्धः	...।
योग्यः	...।	पूर्णः	...।

६. यदि अवहितः इत्यस्य विपरीतः शब्दः अनवहितः भवेत् तर्हि—

अवहितः	अनवहितः।	आदृतः	अनादृतः।
अर्थः	...।	उपयुक्तः	...।
अध्ययनशीलः	...।	उदारः	...।
आर्यः	...।	आश्रमिकः	...।

७. कोष्ठकान्तर्गतधातूनां वर्तमानकालस्य उत्तमपुरुषरूपैः रिक्तस्थानानि पूरय—

अहं कमपि न (निन्द्) —। अहं कदापि न (क्रन्द्) —। अहं स्वमार्गे (पत्) — चेत् उत्थाय झटिति अग्रे सरामि। अहं कमपि न (हिंस्) —। अहं मातरं शरणं (व्रज्) —। अहं द्विचक्रेण पुस्तकानि विद्यालयं (वह्) —। अहं कोकिलवत् (कूज्) —। अहं धर्मं (चर्) —।

—इमानि वाक्यानि द्विवचने बहुवचने च लिख।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

८. अधोलिखितधातूनां वर्तमानकाले रूपाणि लिख—

(क) अव्—to protect, रक्षा करना; क्षर्—to flow, बहना; भष्—to bark, भौंकना; मन्थ्, मथ्—to churn, मथना; वप्—to sow, बीज बोना; तप्—to shine, चमकना; दह्—to burn, जलाना; त्रस्—to fear, डरना; फुल्ल्—to blossom, विकसित होना, खिलना; बुक्क्—to bark, भौंकना; फल्—to bear fruit, फल आना, to result, फल निकलना; खन्—to dig, खोदना; स्खल्—to stumble, लड़खड़ाना; ज्वल्—to burn, जलना; गद्—to say, कहना; भण्—to speak, कहना; राज्—to shine, चमकना; गल्—to drop, टपकना; लग्—to adhere or stick to, सक्त होना, चिपकना; चुम्ब्—to kiss, चुम्बन करना, चूमना; रिङ्ग्—to crawl, to creep, रेंगना, सरकना; खञ्ज्—to limp, लंगड़ाना; खोड्—to limp, लंगड़ाना; लुण्ठ्—to plunder, लूटना। यथा—

पठ्—	पठति	पठतः	पठन्ति
	पठसि	पठथः	पठथ
	पठामि	पठावः	पठामः
अव्—	अवति	अवतः	अवन्ति
	अवसि	अवथः	अवथ
	अवामि	अवावः	अवामः

(ख) अर्ज्—to earn, कमाना, अर्जित करना। गर्ज्—to roar, गरजना। अर्च्—to worship, पूजा करना। गर्ह्—to censure, निन्दा करना। अर्ह्—to deserve, योग्य होना। तर्ज्—to threaten, धमकाना। गर्व्—to be proud, गर्व करना। चर्व्—to chew, चबाना। ईर्ष्य्—to be jealous, ईर्ष्या करना।

अर्ज्—	अर्जति	अर्जतः	अर्जन्ति
	अर्जसि	अर्जथः	अर्जथ
	अर्जामि	अर्जावः	अर्जामः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(ग) अभि-लष्—to wish, चाहना। आ-काङ्क्ष्—to desire, चाहना। आ-लप्—to talk, to converse with, बातें करना। आ-नन्द्—to be glad, प्रसन्न होना। परि-अट्—to wander about, घूमना (पर्यटति…)। प्र-शंस्—to praise, प्रशंसा करना। वि-लस्—to shine, चमकना।

अभि-लष्—अभिलषति	अभिलषतः	अभिलषन्ति
अभिलषसि	अभिलषथः	अभिलषथ
अभिलषामि	अभिलषावः	अभिलषामः

(घ) जि (जय)—to conquer, जीतना। क्षि (क्षय)—to decay, क्षीण होना। श्रि (श्रय)—to resort to, आश्रय लेना। आ-श्रि (आश्रय)—to resort to, आश्रय लेना। नी (नय)—to carry, ले जाना। आ-नी (आनय)—to bring, लाना। ली (लय)—to melt, to dissolve, पिघलना, लय होना।

जि (जय)—जयति	जयतः	जयन्ति
जयसि	जयथः	जयथ
जयामि	जयावः	जयामः

(ङ) बुध् (बोध)—to know, जानना। अव-बुध् (अवबोध)—to understand, समझना। रुह् (रोह)—to grow, उगना। आ-रुह् (आरोह)—to ascend, चढ़ना। अव-रुह् (अवरोह)—to descend, उतरना। क्रुश् (क्रोश)—to cry, रोना, to call out, पुकारना। आ-क्रुश् (आक्रोश)—to cry out loudly, to curse, चिल्लाना, कोसना। स्फुट् (स्फोट)—to burst open, फूटना, फट जाना। शुच् (शोच)—to grieve, शोक करना।

बुध् (बोध)—बोधति	बोधतः	बोधन्ति
बोधसि	बोधथः	बोधथ
बोधामि	बोधावः	बोधामः

(च) वे (वय)—to weave, बुनना। ह्वे (ह्वय)—to call, बुलाना। आ-ह्वे (आह्वय)—to call, बुलाना।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(छ) ध्यै (ध्याय)—to meditate upon, ध्यान करना। गै (गाय)—to sing, गाना। म्लै (म्लाय)—to fade, मुर्झाना। ग्लै (ग्लाय)—to fade, to be wearied, मुर्झाना, उदास होना, विषण्ण होना।

(ज) धृ (धर)—to catch, to seize, to hold, धरना, धारण करना। हृ (हर)—to steal, चुराना, हरना, हरण करना। अप-हृ (अपहर)—to take away, अपहरण करना। आ-हृ (आहर)—to bring, to fetch, लाना, ले आना। उप-हृ (उपहर)—to offer, उपहार देना। प्र-हृ (प्रहर)—to strike, to attack, पीटना, प्रहार करना। वि-हृ (विहर)—to amuse oneself, to play, मनोरंजन करना, विहार करना, खेलना। सम्-हृ (संहर)—to collect, to destroy, समेटना, एकत्र करना, संहार करना। परि-हृ (परिहर)—to avoid, to remove, बचना, दूर करना। वि-अव-हृ (व्यवहर)—to behave, व्यवहार करना। वि-आ-हृ (व्याहर)—to speak, बोलना। उद्-आ-हृ (उदाहर)—to cite as an instance, सोदाहरण निरूपण करना। स्मृ (स्मर)—to remember, स्मरण करना। वि-स्मृ (विस्मर)—to forget, भूल जाना। सृ (सर)—to go, to move, सरकना, हिलना-जुलना। अनु-सृ (अनुसर)—to follow (in all senses), अनुसरण करना (सभी अर्थों में)। उप-सृ (उपसर)—to approach, पास जाना। अप-सृ (अपसर)—to go away, दूर हटना। तॄ (तर)—to cross over, पार करना, तैरना, तरना। अव-तॄ (अवतर)—to descend, उतरना। उद्-तॄ (उत्तर)—to answer, उत्तर देना। वि-तॄ (वितर)—to give, to distribute, देना, वितरण करना। जॄ (जर)—to grow old, बूढ़ा होना। दॄ (दर)—to be afraid of, डरना।

(झ) वृष् (वर्ष)—to rain, बरसना। हृष् (हर्ष)—to be delighted, खुश होना। धृष् (धर्ष)—to offend, अपमान करना, धृष्टता करना, नाराज करना।

(ञ) गम् (गच्छ)—to go, जाना। अव-गम् (अवगच्छ)—to understand, समझना। अनु-गम् (अनुगच्छ)—to follow, पीछे चलना, अनुगमन करना। आ-गम् (आगच्छ)—to come, आना। प्रति-गम् (प्रतिगच्छ)—to return, वापिस जाना। निर्-गम् (निर्गच्छ)—to go

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

out, बाहर जाना । अप-गम् (अपगच्छ)—to go away, हटना, दूर चले जाना । उप-गम् (उपगच्छ)—to go near, पास जाना । दा (यच्छ)—to give, देना । स्था (तिष्ठ)—to stay, to stand, ठहरना, खड़े होना, रुकना । अनु-स्था (अनुतिष्ठ)—to perform, संपन्न करना । उप-स्था to stand near, to be present, उपस्थित होना । उद्-स्था (उत्तिष्ठ)—to stand up, खड़े होना, उठना । घ्रा (जिघ्र)—to smell, सूंघना । दृश् (पश्य)—to see, देखना । दंश् (दश)—to bite, डसना, डंक मारना । पा (पिब)—to drink, पीना । ष्ठिव् (ष्ठीव)—to spit, थूकना । मुर्च्छ् (मूर्च्छ)—to faint, मूर्च्छित होना । आ-क्रम् (आक्राम)—to attack, हमला करना, आक्रमण करना । आ-चम् (आचाम)—to sip, आचमन करना । सम्-वृ (संवर)—to shut, बन्द करना । ध्मा (धम)—to blow (as pipe, conch), फूंकना, बजाना । द्रु (द्रव)—to melt, पिघलना । भू (भव)—to be, होना ।

गम् (गच्छ)—	गच्छति	गच्छतः	गच्छन्ति
	गच्छसि	गच्छथः	गच्छथ
	गच्छामि	गच्छावः	गच्छामः

शब्दार्थाः

मातरम्—to the Mother. दुष्ट—wicked. शिष्ट—polite. चपल—naughty. शान्त—quiet, peaceful. दुःखित—unhappy, sad. सुखित—happy. वृद्ध—old. युवकः—young. कुटिल—crooked. सरल—simple. मलिन—dirty. स्वच्छ—clean. अज्ञान—ignorant. निन्द्य—blamable. कापुरुषः—coward. प्राचीन—ancient, old. अनवधान—inattentive. सुरः—god. असुरः—demon. दिव्य—divine. चेतन—conscious. परिचित—familiar. धीर—calm and prudent. मानुष—human. स्थिर—steady. कुशल—skilful. कीर्ति—fame. पक्व—ripe. नियमित—regular. पवित्र—pure. नित्य—eternal. अवहित—attentive. असूया—envy. अध्ययनशील—studious. आचारः—conduct. आदरः—respect. आत्मा—soul.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

आस्था—confidence. उपयुक्त—suitable, appropriate. कदापि न—never. उत्थाय—having got up. अग्रे—in front. शरणम्—shelter, refuge. कोकिलवत्—like a cuckoo. मार्गः—way.

पञ्चमः पाठः

(विद्यालयः, श्लोकः, रसगोलः, लेखः, श्रीअरविन्दः)

द्वितीया विभक्तिः (कर्मकारकम्, accusative case—to, को)

त्वं कुत्र गच्छसि ?	अहं विद्यालयं गच्छामि ।
त्वं किं पठसि ?	अहं श्लोकं पठामि ।
त्वं किं खादसि ?	अहं रसगोलं खादामि ।
त्वं किं लिखसि ?	अहं लेखं लिखामि ।
त्वं कं नमसि ?	अहं श्रीअरविन्दं नमामि ।

पुरुषं वचनं च परिवर्त्य एतानि वाक्यानि पुनः लिख । यथा—

'त्वं कुत्र गच्छसि ?	अहं विद्यालयं गच्छामि ।'
युवां कुत्र गच्छथः ?	आवां विद्यालयं गच्छावः ।
यूयं कुत्र गच्छथ ?	वयं विद्यालयं गच्छामः ।......

*

(हस्तः, पादः, कर्णः, दन्तः, कृष्णः)

तृतीया विभक्तिः

(करणकारकम्, instrumental case—by, with, के द्वारा, से, साथ)

सः वामहस्तेन लिखति । त्वं केन हस्तेन लिखसि ? अहं दक्षिणहस्तेन लिखामि । सः वामपादेन खञ्जति/खोडति । त्वं केन पादेन खञ्जसि/खोडसि ? अहं केनापि पादेन न खञ्जामि/खोडामि । त्वं कथं चलसि ? अहं पादाभ्यां (पादद्वयेन) चलामि । त्वं कथम् आकर्णयसि ? अहं कर्णाभ्याम् (कर्णद्वयेन) आकर्णयामि । त्वम् इक्षुदण्डं कथं चर्वसि ? अहं दन्तैः (दन्तगणेन) इक्षुदण्डं चर्वामि । त्वं केन सह खेलसि ? अहं कृष्णेन सह खेलामि ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पुरुषं वचनं च परिवर्त्य एतानि वाक्यानि पुनः लिख । यथा—

'सः वामहस्तेन लिखति । त्वं केन हस्तेन लिखसि ? अहं दक्षिणहस्तेन लिखामि ।'
तौ वामहस्तेन लिखतः । युवां केन हस्तेन लिखथः ? आवां दक्षिणहस्तेन लिखावः ।
ते वामहस्तेन लिखन्ति । यूयं केन हस्तेन लिखथ ? वयं दक्षिणहस्तेन लिखामः ।

❋

(श्रीरामः, श्रीकृष्णः, श्रीअरविन्दः)

चतुर्थी विभक्तिः (सम्प्रदानकारकम्, dative case—for, to, के लिए, को)

ॐ श्रीरामाय नमः । ॐ श्रीकृष्णाय नमः । ॐ श्रीअरविन्दाय नमः ।

इत्थं रिक्तस्थानानि पूरय—

ॐ (शिव) — नमः । ॐ (गणेश) — नमः । ॐ (नारायण) — नमः ।

ॐ (वासुदेव) — नमः । ॐ (परमेश्वर) — नमः ।

(दरिद्रः, भिक्षुकः, तृषार्तः, क्षुधितः, दुर्गतः)

सः दरिद्राय धनं यच्छति । त्वं भिक्षुकाय भिक्षां यच्छसि किम् ? अहं तृषार्ताय जलं यच्छामि । माधवः क्षुधिताय भोजनं यच्छति । सः दुर्गताय वस्त्रं यच्छति । भारतसर्वकारेण दरिद्राय, भिक्षुकाय, तृषार्ताय, क्षुधिताय दुर्गताय च सुव्यवस्था करणीया ।

पुरुषं वचनं च परिवर्त्य एतानि वाक्यानि पुनः लिख ।

❋

(वृक्षः, आकाशः, घोटकः, आश्रमः, विद्यालयः, कार्यालयः)

पञ्चमी विभक्तिः (अपादानकारकम्, ablative case—from, से)

वृक्षात् फलं पतति । आकाशात् जलं पतति । घोटकात् अश्वारोही पतति । अहम् आश्रमात् आगच्छामि/आयामि । सः विद्यालयात् आगच्छति/आयाति । माधवः कार्यालयात् आगच्छति ।

उत्तरं देहि—

फलं कस्मात् पतति ? जलं कस्मात् पतति ? अश्वारोही कस्मात् पतति ? त्वं कुतः आगच्छसि/आयासि ? सः कुतः आगच्छति ? माधवः कुतः आगच्छति ?

❋

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(कृष्णः, देहः, केशः, विद्यालयः, शिक्षकः)

षष्ठी विभक्तिः (सम्बन्धवाचकपदम्, genitive case—of, का, के, की)

कृष्णस्य वर्णः श्यामः । मम देहस्य वर्णोऽपि श्यामः । तस्य देहस्य वर्णः कः ? —श्यामः वा गौरः वा ? अस्य देहस्य वर्णः ताम्रः । तव केशस्य रङ्गः कृष्णः/कालः ।

अस्माकं विद्यालयस्य नाम श्रीअरविन्दान्ताराष्ट्रियशिक्षाकेन्द्रम् । युष्माकं विद्यालयस्य नाम किम् ? तेषां विद्यालयस्य नाम किम् ? एषां विद्यालयस्य नाम किम् ? युष्माकं संस्कृतशिक्षकस्य नाम किम् ?

❋

(आश्रमः, भोजनालयः, विद्यालयः, कार्यालयः, अट्टशूलः, भाट्यावासः)

सप्तमी विभक्तिः (अधिकरणकारकम्, locative case—in, at, on, upon, over, में, पर, ऊपर)

अहम् आश्रमे वसामि । अहं भोजनालये खादामि । अहं विद्यालये पठामि । सः कार्यालये तिष्ठति । सः तत्रैव खादति । सः अट्टशूले न खादति । सः भाट्यावासे न वसति ।

उत्तरं देहि—

त्वं कुत्र वससि ? त्वं कुत्र खादसि ? त्वं कुत्र पठसि ? सः कुत्र तिष्ठति ? सः कुत्र खादति ? सः कुत्र वसति ?

❋

(कृष्णः, नारायणः, वासुदेवः, दीननाथः)

सम्बोधने प्रथमा विभक्तिः (vocative case—O, हे, अरे, रे)

हे कृष्ण, हे नारायण, हे वासुदेव, त्वाम् अहं सर्वभावेन शरणं गच्छामि । रक्ष मां हे दीननाथ !

अवधेयम्

'नमः' इति अव्ययेन योगे 'दा'धातुना सह (सम्प्रदाने) च नित्यं चतुर्थी विभक्तिः भवति । 'नमः' and 'दा'धातुः always govern the dative case. 'दा' धातु और 'नमः' के साथ नित्य चतुर्थी का प्रयोग होता है ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शब्दार्थाः

कुत्र—where. किम्—what. विद्यालयम्—to the school. लेखः—article. हस्तः—hand. पादः—foot. कर्णः—ear. दन्तः—tooth. कम्—to whom. हस्तेन—by or with hand. दुर्गताय—for the distressed. इक्षुदण्डम्—sugar-cane. दरिद्रः—poor. भिक्षुकः—beggar. तृषार्तः—thirsty. क्षुधितः—hungry. वृक्षात् (वृक्ष)—from the tree, वृक्ष से । घोटकः, अश्वः—horse. अश्वारोही, अश्वारोहः—rider of the horse. कार्यालयः—office. देहः, शरीरम्—body. केशः—hair. वर्णः, रङ्गः—colour. देहस्य—of the body, देह का । कालः—black. गौरः—white. तव—your, तुम्हारा । युष्माकम्—plural of तव, 'तव' का बहुवचन । अस्य—of this, इसका । एषाम्—plural of अस्य । तस्य—his, उसका । तेषाम्—plural of तस्य । नाम—name. विद्यालयस्य—of the school. अट्टशूलः—hotel. भाट्यावासः—rented house. विद्यालये—in the school, विद्यालय में । हे कृष्ण—O Krishna.

षष्ठः पाठः

अहं पठामि । अहं संस्कृतं पठामि । अहं विद्यालये संस्कृतं पठामि । अहं विद्यालये जगन्नाथार्यात् संस्कृतं पठामि । अद्याहं विद्यालये जगन्नाथार्यात् संस्कृतं पठामि ।

श्वः रविवारः । श्वः छुट्टिः । श्वोऽहं विद्यालये संस्कृतं न पठिष्यामि । श्वोऽहं गृहे संस्कृतं पठिष्यामि । मम भ्राता मां संस्कृतं पाठयिष्यति । सः मां सर्वं वोधयिष्यति । सः मां श्लोकरचनां शिक्षयिष्यति । अहं भृशम् आनन्दितः भविष्यामि ।

अभ्यासाः

१. यदि 'पठ्' इति अस्य भविष्यकाले 'पठिष्यति' इति भवति तर्हि—

(पठ्) पठति — पठिष्यति ।	(वद्) वदति — वदिष्यति ।
(खाद्) खादति— ... ।	(खेल्) खेलति— ... ।
(चल्) चलति — ... ।	(हस्) हसति — ... ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(भ्रम्) भ्रमति — … । (जप्) जपति — … ।
(रक्ष्) रक्षति — … । (वाञ्छ्) वाञ्छति — … ।
(निन्द्) निन्दति — … । (जल्प्) जल्पति — … ।

—एतैः शब्दैः वाक्यानि रचय ।

२. एतेषां धातूनां भविष्यकाले रूपाणि लिख—

(क) क्रीड्, धाव्, अर्ज्, गर्ज्, अर्च्, अर्ह्, तर्ज्, गर्व्, चर्व्, ईर्ष्य्, गर्ह्, क्षर्, अव्, भष्, क्रन्द्, मन्थ्, गुञ्ज्, त्रस्, फुल्ल्, वृक्, फल्, खन्, स्खल्, ज्वल्, व्रज्, गद्, भण्, राज्, गल्, लग्, कूज्, चर्, पत्, चुम्ब्, हिंस्, रिङ्ग्, खञ्ज्, खोड्, लुण्ठ् । यथा—क्रीड्—क्रीडिष्यति… । लुण्ठ्—लुण्ठिष्यति… ।

(ख) अभि-लष्, आ-काङ्क्ष्, नि-मील्, आ-लप्, आ-नन्द्, परि-अट्, प्र-शंस्, वि-लस् । यथा—अभि-लष्—अभिलषिष्यति… । परि-अट्—पर्यटिष्यति… ।

(ग) धृ, हृ, स्मृ, तॄ, जॄ, दॄ, सृ, अनु-सृ, वि-स्मृ, उद्-तॄ, वि-तॄ । यथा—धृ -धरिष्यति ·· । वि-तॄ—वितरिष्यति… ।

(घ) बुध्, स्फुट्, शुच्, रुद् २प., कुप् ४प., रुष् ४प., लुभ् ४प., पुष् ४प., मुह् ४प. । यथा—बुध्—बोधिष्यति… ।

(ङ) ध्यै, गै, म्लै, ग्लै, या २प., स्ना २प., धा ३प.आ., ज्ञा ९प.आ., घ्रा, दा ३प.आ., मा २प., ख्या २प., ध्मा, स्था, पा, वे (वास्यति), आ-ह्वे (आह्वास्यति) । यथा—ध्यै—ध्यास्यति । या—यास्यति । स्था—स्थास्यति ।

(च) जि, क्षि, नी, आ-नी, ली १प., भी ३प, चि ५प., ली ९प. । यथा—जि जेष्यति… । ली—लेष्यति… ।

(छ) द्रु, स्तु २प.आ., श्रु ५प. । यथा—द्रु—द्रोष्यति · ।

(ज) भू, पू ९प.आ., लू ९प.आ. । यथा—भू—भविष्यति… ।

(झ) भज्, त्यज, पच्, दह् (धक्ष्यति), वह्, तुष् ४प., आ-रुह्, आ-क्रुश् । यथा—भज्—भक्ष्यति । वह्—वक्ष्यति । तुष्—तोक्ष्यति ।

(ञ) तप—तप्स्यति । वप्—वप्स्यति । शप्—शप्स्यति । क्षिप् ६प.—क्षेप्स्यति । लिप् ६प.आ.—लेप्स्यति । विश् ६प.—वेक्ष्यति । सिच् ६प.आ.—सेक्ष्यति । रिच् ७प.—रेक्ष्यति । दिश् ६प.आ.—देक्ष्यति । पिष् ७प.—

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पेक्ष्यति । दंश्—दंक्ष्यति । दृश्—द्रक्ष्यति । छिद् ७प.आ.—छेत्स्यति । लिख् ६प.—लेखिष्यति । मिल् ६प.आ.—मेलिष्यति । क्लिश् ९प.—क्लेशिष्यति, क्लेक्ष्यति । क्लिद् ४प.—क्लेदिष्यति, क्लेत्स्यति । विद् २प.—वेदिष्यति । ष्ठिव्—ष्ठेविष्यति । त्रुट् ४प.—त्रुटिष्यति । मुर्च्छ्—मूर्च्छिष्यति । आ-श्रि—आश्रयिष्यति । गम्—गमिष्यति । सम्-वृ—संवरिष्यति । आ-क्रम्—आक्रमिष्यति । आ-चम्—आचमिष्यति ।

तप्—तप्स्यति	तप्स्यतः	तप्स्यन्ति
तप्स्यसि	तप्स्यथः	तप्स्यथ
तप्स्यामि	तप्स्यावः	तप्स्यामः
गम्—गमिष्यति	गमिष्यतः	गमिष्यन्ति
गमिष्यसि	गमिष्यथः	गमिष्यथ
गमिष्यामि	गमिष्यावः	गमिष्यामः

३. उपर्युक्तधातुभिः वाक्यानि रचय—यथा—अहम् अधुना क्रीडाक्षेत्रे धावामि । अहं श्वः क्रीडाक्षेत्रे धाविष्यामि । अहम् अधुना तरणकुण्डे तरामि । अहं श्वः तरणकुण्डे तरिष्यामि । अहम् अधुना इमं पाठं बोधामि । अहं श्वः अन्यं पाठं बोधिष्यामि । अहम् अधुना मातरं ध्यायामि । अहं श्वः मातरं ध्यास्यामि इत्यादि ।

४.(क) अङ्क्—to mark, to stamp, चिह्न या छाप लगाना । अंश्—to divide, बांटना । अर्ज्—to earn, कमाना । अर्च्—to worship, पूजा करना । अवधीर्—to disregard, अवज्ञा करना । आलोच्—to consider, विवेचना करना । आकर्ण्—to hear, सुनना । आन्दोल्—to shake, क्षुब्ध करना । आलोक्—to see, देखना । कथ्—to tell, कहना । क्षप्—to pass, बिताना । गण्—to count, गिनना । गुण्—to multiply, गुणा करना । गवेष्—to search, ढूंढ़ना । गुण्ठ्—to en velope, ढकना । अवगुण्ठ्—to cover, छुपाना, ढकना । खण्ड्—to break to pieces, खण्ड खण्ड करना । घट्—to bring about, to accomplish, घटित या साधित करना । चर्च्—to discuss, चर्चा करना, विचारना । चित्र्—to paint,

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

चित्र बनाना। चिन्त्—to think, सोचना। चूर्ण्—to crush, चूरा करना। छिद्र्—to bore, छिद्र करना। तर्क्—to guess, अनुमान करना। दण्ड्—to punish, दण्ड देना। धू (धूनयति)—to shake, हिलाना। पार्—to cross over, पार करना। पाल्—to protect, रक्षा करना। पीड्—to afflict, पीड़ा देना। पूज्—to worship, पूजा करना। पूर्—to fill, भरना। भक्ष्—to eat, खाना। भूष्—to adorn, सजाना। मण्ड्—to decorate, मण्डित करना, सजाना। मार्ग्—to seek, ढूंढ़ना। मिश्र्—to mix, मिलाना। नि-यन्त्र्—to restrain, नियन्त्रण करना। रच्—to make, बनाना। रूप्—to form, बनाना। नि-रूप्—to see, to expound, देखना, निरूपण करना। लक्ष्—to see, to aim at, देखना, लक्ष्य करना। लङ्घ्—to violate, to transgress, उल्लंघन करना, अतिक्रमण करना। लुण्ठ्—to plunder, लूटना। वर्—to desire, to choose, चाहना, वरण करना। वर्ण्—to describe, वर्णन करना। वीज्—to fan, पंखा करना। व्यय्—to expend, व्यय करना। व्रण्—to wound, जख्मी करना। शब्द्—to sound, शब्द करना। शील्—to practise repeatedly, अभ्यास करना, प्रयोग या आचरण में लाना। अनु-शील्—to practise repeatedly, बार बार अभ्यास करना। सभाज्—to honour, सम्मान करना। सूच्—to point out, बताना। सान्त्व्—to console, सान्त्वना देना। सुख्—to make happy, सुखी करना। स्पृह्—to desire, चाहना। स्वाद्—to taste, चखना। हिंस्—to injure, to kill, हिंसा करना, मारना।

—एतेषां धातूनां वर्तमानकाले रूपाणि लिख। यथा—

अङ्क्—अङ्कयति		अङ्कयतः	अङ्कयन्ति
	अङ्कयसि	अङ्कयथः	अङ्कयथ
	अङ्कयामि	अङ्कयावः	अङ्कयामः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(ख) चुर्—to steal, चुराना। घुष्—to proclaim, घोषणा करना। चुद्—to impel, प्रेरित करना, to guide, मार्ग दिखाना। तुल्—to weigh, तोलना, to compare, तुलना करना। युज्—to join, जोड़ना, मिलाना। रुष्—to be angry, क्रोध करना।

—एतेषां धातूनां वर्तमानकाले रूपाणि लिख। यथा—

चुर्—चोरयति	चोरयतः	चोरयन्ति
चोरयसि	चोरयथः	चोरयथ
चोरयामि	चोरयावः	चोरयामः

(ग) क्षल्—to wash, धोना, साफ करना। ज्ञप्—to inform, सूचित करना, जतलाना। आ-ज्ञप्—to order, आदेश देना। तड्—to beat, पीटना। छद्—to cover, to conceal, ढकना, छिपाना। यथा—

क्षल्—क्षालयति	क्षालयतः	क्षालयन्ति
क्षालयसि	क्षालयथः	क्षालयथ
क्षालयामि	क्षालयावः	क्षालयामः

(घ) कॄत्—to glorify, कीर्तन करना, यश फैलाना (कीर्तयति···)। प्री—to please, प्रसन्न करना (प्रीणयति···)। धृ—to hold, धारण करना (धारयति···)। मृज्—to cleanse, स्वच्छ करना (मार्जयति···)। वृज्—to avoid, to abandon, वर्जन करना, त्यागना (वर्जयति···)। मृष्—to forgive, क्षमा करना (मर्षयति)। श्लिष्—to join, जोड़ना (श्लेषयति···)।

कॄत्—कीर्तयति	कीर्तयतः	कीर्तयन्ति
कीर्तयसि	कीर्तयथः	कीर्तयथ
कीर्तयामि	कीर्तयावः	कीर्तयामः

शब्दार्थाः

श्वः—tomorrow. छुट्टिः, अवकाशः—holiday। पठिष्यामि (I) shall read/study. पाठयिष्यति—will teach. मां बोधयिष्यति

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

—will make me understand. श्लोकरचनां शिक्षयिष्यति—will teach how to compose slokas. रुचिर—interesting. कथा—story. भृशम्—very much. आनन्दितः—delighted. अहं भविष्यामि—I will be. कृपया—kindly, please.

सप्तमः पाठः

शिशुः न खेलति । माता तं खेलयति । सा तं चलनं शिक्षयति इतस्ततश्च भ्रमयति/भ्रामयति, मिष्टान्नं भोजयति दुग्धं च पाययति । सा तं "शीघ्रं शीघ्रं खाद" इति न त्वरयति कदापि च न क्रन्दयति । सा सदैव तम् आह्लादयति ।

माता स्वयं प्रतिदिनं कोष्णेन जलेन स्नाति शिशुं च स्नापयति । सा लाडगीतं गायति शिशुं च गापयति । रात्रौ सा चन्द्रं पश्यति शिशुं च दर्शयति । सा श्रीमातरं प्रणमति शिशुं च प्रणमयति ।

छात्त्राः वर्गे कथां शृण्वन्ति । शिक्षकः तान् कथां श्रावयति । सः तान् मधुरवचनैः प्रीणयति, कदापि न दुःखयति सदा च हासयति । केचन छात्त्राः पतङ्गान् उड्डाययन्ति अन्ये च जले पत्त्रनौकाः प्लावयन्ति । तेषां सरल-निश्छल-व्यवहारः शिक्षकस्य चित्तं प्रसादयति ।

अभ्यासाः

१. (क) यदि प्रयोजकार्थे 'खेल्' इत्यस्य 'खेलयति', 'क्रन्द्' इत्यस्य 'क्रन्दयति' भवति तर्हि—

(खेल्*) खेलति	—	खेलयति	।	(क्रन्द्) क्रन्दति	—	क्रन्दयति	।
(नम्) नमति	—	...	।	(भ्रम्) भ्रमति	—	...	।
(खाद्*) खादति	—	...	।	(धाव्) धावति	—	...	।
(आनन्द्*) आनन्दति	—	...	।	(प्राप्) प्राप्नोति	—	...	।

इत्थं क्रीड्, क्रम्, कम्प्* १आ., गम्, शम् ४प., वम्, श्रम् ४प., क्षम् ४प., निन्द्, स्पन्द्* १आ., जन् ४आ., ध्वन्, भिक्ष् १आ., शिक्ष् १आ., रक्ष्,

* तारकाचिह्निताः धातवः प्रयोजकार्थे केवलं परस्मैपदिनः अन्ये च उभयपदिनः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

त्वर् १आ., चेष्ट् १आ., दंश्, शंस्, लज्ज्* ६आ., भ्राज् १आ., याच् १प.आ., जल्प्, मील्, मुर्च्छ्, रञ्ज्, वाञ्छ्, साध् ५प., प्रच्छ् ६प., भाष् १आ. लम्ब् १आ., प्र-काश् १आ. इति एतेषां प्रयोजकार्थरूपाणि (णिजन्तरूपाणि) लिख। यथा—

खेल्—खेलयति	खेलयतः	खेलयन्ति
खेलयसि	खेलयथः	खेलयथ
खेलयामि	खेलयावः	खेलयामः
शिक्ष्—शिक्षयति	शिक्षयतः	शिक्षयन्ति
शिक्षयसि	शिक्षयथः	शिक्षयथ
शिक्षयामि	शिक्षयावः	शिक्षयामः

(ख) हस्, त्रस्, वस्, नश्* ४प., भ्रम्, श्रम् ४प., वम्, लप्, आ-लप्, वप्, तप्, शप्, सह् १आ., दह्, वह्, अट्, अव्, नद्, गद्, वच् २प., यज्, मन् ४आ., खन्, ग्रह् ९प.आ., चल्।
यथा—हस्—हासयति··· । चल्—चालयति··· ।

(ग) कृष्, वृष्, तृष् ४प., मृश् ६प., दृश्, स्पृश् ६प., सृज् ६प., वृज्, कृत् ६प, वृत् १आ., नृत् ४प., तृप् ४प., वृध् १आ. ।
यथा—कृष्—कर्षयति··· । वृध्—वर्धयति··· ।

(घ) धृ*, स्मृ, हृ, भृ, स्तृ ५प., वि-स्तृ ५प., मृ ६आ., कृ ८प.आ., वृ ९प.आ., जॄ ९प., दॄ ९प., तॄ १प., जागृ २प. ।
यथा—धृ—धारयति··· । जागृ—जागरयति··· ।

(ङ) लिख् ६प., लिप् ६प.आ., ष्ठिव्*, द्विष् २प.आ., विद् २प., क्लिद् ४प., क्लिश् ४प., क्षिप् ६प., दिश् ६प.आ., विश् ६प., प्र-विश्, मिल् ६प.आ., सिच् ६प.आ., खिद् ७आ., छिद् ७प.आ., भिद् ७प.आ., पिष् ७प., रिच् ७प., शिष् ७प. ।
यथा—लिख्—लेखयति··· । शिष्—शेषयति··· ।

(च) बुध्, शुध् ४प., रुध् ७प.आ., क्रुध् ४प., युध्* ४आ., तुद् ६प.आ., मुद् १आ., रुद् २प., रुह्, मुह् ४प., शुभ् १आ., लुभ् ४प., शुच्, मुच् ६प.आ., रुच् १आ., पुष् ४प., तुष् ४प., घुष्, रुष् ४प.,

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शुष् ४प., युज् ४आ., भुज् ७प.आ., क्रुश्, आ-क्रुश्, तुट् ४प., स्फुट्, कुप् ४प., गुप् । यथा—बुध्—बोधयति··· । गुप्—गोपयति··· ।

(छ) गै, म्लै, ग्लै, ध्यै, त्रै १आ., स्था, ख्या २प., दा ३प.आ., मा २प., या २प., भा २प., स्ना २प., धा ३प.आ., ज्ञा ९प.आ., घ्रा, ध्मा, अधि-इ २आ. ।
यथा—गै—गापयति···। स्था—स्थापयति···। अधि-इ—अध्यापयति ।

(ज) नी, क्षि, डी १आ., उद्-डी, श्रि, आ-श्रि, स्मि १आ., भी ३प., चि ५प.आ., ली ९प. । यथा—नी—नाययति । आ-नी—आनाययति···। श्रि—श्राययति··· । ली—लाययति··· ।

(झ) भू, लू ९प.आ., पू ९प.आ., श्रु ५प., द्रु, स्तु २प.आ. ।
यथा—भू—भावयति··· । स्तु—स्तावयति··· ।

(ञ) जि—जापयति··· । क्री—क्रापयति··· । वि-स्मि—विस्मापयति··· । लभ्—लम्भयति··· । आ-रभ्—आरम्भयति··· । मृज्—मार्जयति··· । मस्ज् ६प.—मज्जयति··· । भ्रस्ज् ६प.आ.—भ्रज्जयति । दम् ४प. —दमयते··· । ह्वे—ह्वाययति··· । हन्—घातयति । प्री—प्रीणयति··· ।

एतेषां सर्वेषां धातूनां प्रयोजकार्थे भविष्यकाले रूपाणि लिख । यथा—

खेल्—खेलयिष्यति	खेलयिष्यतः	खेलयिष्यन्ति
खेलयिष्यसि	खेलयिष्यथः	खेलयिष्यथ
खेलयिष्यामि	खेलयिष्यावः	खेलयिष्यामः
प्री—प्रीणयिष्यति	प्रीणयिष्यतः	प्रीणयिष्यन्ति
प्रीणयिष्यसि	प्रीणयिष्यथः	प्रीणयिष्यथ
प्रीणयिष्यामि	प्रीणयिष्यावः	प्रीणयिष्यामः

शब्दार्थाः

शिशुः—child, बालक । खेलति—plays, खेलता है । खेलयति makes one play, खिलाती या खेल कराती है । भ्रमयति—makes one walk or roam about, भोजयति—feeds, makes one

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

eat, खिलाती है । पाययति—makes one drink. त्वरयति—hurries, makes one hurry. क्रन्दयति—makes one cry. आह्लादयति—makes one feel happy, delights. स्नापयति—makes one bathe. गापयति—makes one sing. दर्शयति—shows, makes one see. प्रणमयति—makes one bow down. श्रावयति—relates, narrates, makes one hear. प्रीणयति—pleases, makes one pleased. हासयति—makes one laugh. प्लावयति—makes one float. प्रसादयति—makes one pleased, pleases. विस्मारयति—makes one forget. दुःखयति—pains, distresses, makes one sorrowful. उड्डाययति—puts to flight, makes one fly. मिष्टान्नम्—sweetmeat. पतङ्गः—kite. पत्त्रनौकाः—paperboats. कोष्ण—lukewarm. प्रयोजकार्थः (णिजन्तः) —causative, causal.

अष्टमः पाठः

अहं गच्छामि । अहं विद्यालयं गच्छामि । अहं पठितुं विद्यालयं गच्छामि । त्वं किं कर्तुं विद्यालयं गच्छसि ? अहं पठितुं विद्यालयं गच्छामि ।

त्वं कुत्र गच्छसि ? अहं भोजनालयं गच्छामि । त्वं किं कर्तुं भोजनालयं गच्छसि ? अहं खादितुं भोजनालयं गच्छामि ।

सः कुत्र गच्छति ? सः क्रीडाक्षेत्रं गच्छति । सः किं कर्तुं क्रीडाक्षेत्रं गच्छति ? सः खेलितुं क्रीडाक्षेत्रं गच्छति ।

ताः (बालिकाः) कुत्र गच्छन्ति ? ताः तरणकुण्डं गच्छन्ति । ताः किं कर्तुं तरणकुण्डं गच्छन्ति ? ताः तरितुं तरणकुण्डं गच्छन्ति ।

त्वं किं भवितुम् इच्छसि ? अहं ज्ञानी, भक्तः जन्मजन्मान्तरेषु च श्रीमातुः सरलः, सबोधः शिशुः भवितुम् इच्छामि । त्वमत्र किं कर्तुं वससि ? अहमत्र श्रीमातुः कार्यं कर्तुं वसामि । त्वमत्र कथम् अधिकाधिकं सुखी भवितुम् अर्हसि ? यथा यथाहम् अत्र स्वम् (आत्मानम्) स्वकीयं सर्वं च श्रीमातुः चरणकमले समर्पयितुं साधुतरं पारयामि तथा तथाहम् अधिकाधिकं सुखी भवितुम् अर्हामि ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अभ्यासाः

१. अधोलिखित-वाक्येषु 'तुम्'(तुमुन्)प्रत्यययुक्तं पदं दर्शय—

(क) छात्राः पठितुं विद्यालयं गच्छन्ति।
(ख) शिक्षकाः पाठयितुं विद्यालयं गच्छन्ति।
(ग) साधकाः ध्यातुं समाधौ प्रणन्तुं च आश्रमं गच्छन्ति।
(घ) अहं धनम् आनेतुम् अधिकोषं गच्छामि।
(ङ) सः कार्यं कर्तुम् अधिकोषं गच्छति।
(च) सा पत्रं पातयितुं प्रेषालयं गच्छति।
(छ) ते अधुना कुत्रापि गन्तुं किमपि कर्तुं वा न इच्छन्ति।
(ज) ते संस्कृते कथां श्रोतुम् इच्छन्ति।

२. (क) अधोलिखित-धातूनाम् अन्ते 'तुम्'(तुमुन्)प्रत्ययं योजय—

यथा—पठ्—पठितुम्। क्रीड्—क्रीडितुम्। खाद्—खादितुम्। धाव् १प.आ.—धावितुम्। सेव् १आ.—सेवितुम्। परा-अय् (पलाय्)—पलायितुम्।

खेल्, चर्, जप्, भ्रम्, निन्द्, रक्ष्, जीव्, चल्, व्रज्, अर्च्, अर्ज्, परि-अट्, अव्, अर्ह्, अश् ९प, निर्-अस् ४प, अभि-लष्, आ-लप्, आस् २आ, आ-काङ्क्ष्, आ-स्वाद् १आ, ईह् १आ, ईक्ष् १आ, निर्-ईक्ष् १आ, ईर्ष्य्, एध् १आ, एज् १आ, क्रम्, कम्प् १आ, क्रन्द्, कूज्, क्षर्, खन्, गर्ज्, गर्ह्, ग्रस् १आ, ग्रन्थ् ९प, ग्रह् ९प.आ, घट् १आ, चेष्ट् १आ, चुम्ब्, जन् ४आ, ज्वल्, जल्प्, तन् ८प.आ, तर्ज्, त्रप् १आ, त्रस्, त्वर् १आ, दल्, दीप् ४आ, दम् ४प, ध्वंस् १आ, ध्वन्, नश् ४प, नद्, नन्द्, नि-मील्, प्र-शंस्, प्र-काश् १आ, पत्, फल्, भण्, भिक्ष् १आ, भाष् १आ, मन्थ् ९प, यत् १आ, याच् १प.आ, राज् १प.आ, लम्ब् १आ, लङ्घ् १आ, वम्, वाञ्छ्, वन्द् १आ, वद्, बाध् १आ, वश् २प, वस् २आ, शास् २प, शङ्क् १आ, शिक्ष् १आ, श्वस् २प, शम् ४प, श्रम् ४प, श्लाघ् १आ, सह् १आ, सेव् १आ, सज्ज् १प.आ, स्पन्द् १आ, स्पर्ध् १आ, हिंस् ७प, हस्।

(ख) षष्ठपाठस्य चतुर्थाभ्यासस्थधातूनां तुमुन्प्रत्ययान्तरूपाणि लिख। यथा— ४. (क) अङ्क्—अङ्कयितुम्। (ख) चुर्—चोरयितुम्। (ग) क्षल्—क्षालयितुम्। (घ) कृत्—कीर्तयितुम्।…

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(ग) सप्तमपाठस्य प्रथमाभ्यासस्थ-प्रयोजकार्थ-धातूनां तुमुन्प्रत्ययान्त-रूपाणि लिख। यथा— १. (क) क्रन्द्—क्रन्दयितुम् । क्रीड्—क्रीडयितुम् । खेल्—खेलयितुम् । शिक्ष्—शिक्षयितुम् । (ख) हस्—हासयितुम् । (ग) कृष्—कर्षयितुम् (घ) धृ—धारयितुम् । (ङ) लिख्—लेखयितुम् । (च) बुध्—बोधयितुम् । (छ) गै—गापयितुम् । (ज) आ-नी—आनाययितुम् । (झ) भू—भावयितुम् । (ञ) जि—जापयितुम् ।

(घ) पा, ज्ञा ९प.आ, घ्रा, दा ३प.आ, धा ३प.आ, मा २प, या २प, वा २प, भा २प, ख्या २प, स्ना २प, स्था, ध्मा, हा ३प, गै, त्रै १आ, ध्यै, म्लै, ग्लै । यथा—पा—पातुम् । गै—गातुम् ।

(ङ) बुध्, मुद् १आ, तुद् ६प.आ, नुद् ६प.आ, रुद् २प, रुच् १आ, शुच्, शुभ् १आ, स्फुट्, त्रुट् ४प, कुप् ४प, पुष् ४प, मुष् ९प, द्युत् १आ, द्रुह् ४प, मुह् ४प । यथा—बुध्—बोधितुम् । मुह्—मोहितुम्, मोग्धुम्, मोढुम् ।

(च) कृ ८प.आ, सृ, स्मृ, हृ, मृ ६आ, भृ ३प.आ, स्तृ ५प.आ, पृ ३प, आ-दृ ६आ । यथा—कृ—कर्तुम् । आ-दृ—आदर्तुम् ।

(छ) गम्, नम्, नि-यम्, रम् १आ, क्षम् ४प, हन् २प । यथा—गम्—गन्तुम् । हन्—हन्तुम् ।

(ज) दृश्, कृष्, मृश् ६प, दंश् । यथा—दृश्—द्रष्टुम् । दंश्—दंष्टुम् ।

(झ) भू, पू ९प.आ, लू ९प.आ, सू २आ, रु २प, यु २प । यथा—भू—भवितुम् । यु—यवितुम् ।

(ञ) स्वप् २प, शप् ४प.आ, आप् ५प, प्र-आप् ५प, वप् । यथा—स्वप्—स्वप्तुम् । वप्—वप्तुम् ।

(ट) पच्, वच् २प, शक् ५प, भज् । यथा—पच्—पक्तुम् । शक्—शक्तुम् । भज्—भक्तुम् ।

(ठ) नी १प.आ, चि ५प.आ, क्षि ५प, भी ३प, ली ४आ, प्री ४आ । यथा—नी—नेतुम् । प्री—प्रेतुम् ।

(ड) श्रु ५प, सु ५प.आ, सू २आ, स्तु २प.आ, हु ३प, नु २प, धु ५प.आ । यथा—श्रु—श्रोतुम् । धु—धोतुम् ।

(ढ) वृष्, कृश् ४प, तृष् ४प, वृत् १आ, नृत् ४प, कृत् ६प, वृज् ७प, दृप् ४प, तृप् ४प, वृध् १आ । यथा—वृष्—वर्षितुम् । वृध्—वर्धितुम् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(ण) लिख् ६प, विद् ६प.आ, विद् २प, दिव् ४प, मिल् ६प.आ, सिव् ४प, स्निह् ४प, क्लिद् ४प, क्लिश् ४प, इष् ६प, अधि-इ २आ। यथा—लिख्—लेखितुम्। इष्—एषितुम्। अधि-इ—अध्येतुम्।

(त) वृ ५प.आ, गॄ ६प, जागृ २प, तॄ, कॄ ६प, जॄ ४प, जॄ ९प, दॄ ९प। यथा—गॄ—गरितुम्, गरीतुम्। जागृ—जागरितुम्। वृ—वरितुम्, वरीतुम्। तॄ—तरितुम्, तरीतुम्। कॄ—करितुम्, करीतुम्। दॄ—दरितुम्, दरीतुम्। जॄ—जरितुम्, जरीतुम्।

(थ) डी १आ—डयितुम्। शी २आ—शयितुम्। अस् २प—भवितुम्। रुह्—रोढुम्। वह्—वोढुम्। लिह् २प.आ—लेढुम्। द्विष् २प.आ—द्वेष्टुम्। दिश् ६प.आ—देष्टुम्। पिष् ७प—पेष्टुम्। विश् ६प—वेष्टुम्। तुष् ४प—तोष्टुम्। दुष् ४प—दोष्टुम्। शुष् ४प—शोष्टुम्। भ्रस्ज् ६प.आ—भ्रष्टुम्। स्पृश् ६प—स्प्रष्टुम्, स्पर्ष्टुम्। प्रच्छ् ६प—प्रष्टुम्। सृज् ६प—स्रष्टुम्। मृज् २प—मार्ष्टुम्। सिच् ६प.आ—सेक्तुम्। रिच् ७प.आ—रेक्तुम्। विच् ७प.आ—वेक्तुम्। विज् ३प.आ—वेक्तुम्। वच् २प—वक्तुम्। ब्रू २प.आ—वक्तुम्। भुज् ७प.आ—भोक्तुम्। युज् ७प.आ—योक्तुम्। मुच् ६प.आ—मोक्तुम्। छिद् ७प.आ—छेत्तुम्। भिद् ७प.आ—भेत्तुम्। खिद् ४आ—खेत्तुम्। पद् ४आ—पत्तुम्। क्रुध् ४प—क्रोद्धुम्। क्षुध् ४प—क्षोद्धुम्। शुध् ४प—शोद्धुम्। युध् ४आ—योद्धुम्। रुध् ७प.आ—रोद्धुम्। बन्ध् ९प—बन्द्धुम्। लुभ् ४प—लोब्धुम्। लभ् १आ—लब्धुम्। आ-रभ् १आ—आरब्धुम्। स्निह् ४प—स्नेग्धुम्, स्नेढुम्। दुह् २प.आ—दोग्धुम्। क्षिप् ६प.आ—क्षेप्तुम्। लिप् ६प.आ—लेप्तुम्। लुप् ६प.आ—लोप्तुम्। रञ्ज्—रङ्क्तुम्। सञ्ज्—सङ्क्तुम्। भञ्ज् ७प—भङ्क्तुम्। मस्ज् ६प—मङ्क्तुम्। वस्—वस्तुम्।

शब्दार्थाः

पठितुं गच्छामि। (I) am going to read/study. (मैं) पढ़ने या अध्ययन करने जा रहा हूं। किं कर्तुम्—to do what? क्या करने के लिए? खादितुम्—to eat. खाने या खाने के लिए। भोजनालयः—Dining room. क्रीडाक्षेत्रम्—Sports ground. खेलितुम्—to play. खेलने के लिए। तरणकुण्डम्—Swimming pool. तरितुम्—

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

to swim. भवितुम्—to be. होने या बनने के लिए। अधिकाधिकम्—more and more. सुखी—happy. भवितुम् अर्हसि—may be or become. यथा यथा—As. जैसे-जैसे। तथा तथा—so. वैसे-वैसे। स्वम् (आत्मानम्)—myself. अपने आपको। स्वकीयं सर्वम्—all of myself or all that I have. समर्पयितुम्—to surrender, to offer. साधुतरं पारयामि—(As) I am better able to. जन्मजन्मान्तरेषु—in all my lives. सबोधः—conscious. शिशुः—child. प्रेषालयः—Post-office. पत्त्रम्—letter. अधिकोषः—Bank.

नवमः पाठः

अहं पठामि। अहं विद्यालये पठामि। अनन्तरं महाविद्यालये विश्वविद्यालये च पठिष्यामि। विश्वविद्यालये पठित्वा अहं भारतस्य प्रधानमन्त्रि-पदलाभाय प्रस्तुतः भविष्यामि। प्रधानमन्त्री भूत्वा संस्कृतं राष्ट्रभाषापदे प्रतिष्ठापयिष्यामि। अहं स्वदेशे विदेशेषु च भ्रमित्वा संस्कृतस्य महिमानम्, सरलताम्, आधुनिकजीवने उपयोगितां दैनन्दिनजीवने व्यावहारिकतां च प्रतिपादयिष्यामि। मां संस्कृतप्रेमिणं ज्ञात्वा संस्कृते वदन्तं च श्रुत्वा अन्येऽपि प्रेरिताः भविष्यन्ति संस्कृते च वदिष्यन्ति। सम्पूर्णं जीवितं देशकार्ये संस्कृतकार्ये च यापयित्वा अहं परमकृतार्थः भविष्यामि।

अभ्यासाः

१. अधोलिखितवाक्येषु 'त्वा'(क्त्वा)प्रत्ययान्तं पदं दर्शय—

वयं क्रीडाक्षेत्रे खेलित्वा सार्धषड्वादने गृहं प्रत्यागच्छामः। ते आश्रमे ध्यात्वा अष्टवादने भोजनालयं गच्छन्ति। त्वं भोजनालये खादित्वा कदा अत्र आगच्छसि? यूयम् इदं कार्यं कृत्वा एव गृहं गच्छत। अद्याहं दशसहस्रमानं धावित्वा किञ्चित् क्लान्तः। आश्रमे बहुकालं स्थित्वा सः ह्यः स्वगृहं प्रतिगतः। अयं सम्पूर्णं जीवितं मातरं सेवित्वा आत्मानं धन्यं मन्यते। अहम् उद्यानात् पुष्पाणि आदाय अधुनैव आश्रमे दत्त्वा आयामि। वृक्षात् आम्राणि पतित्वा भूमौ लुठन्ति। शिक्षकाः छात्त्रान् आहूय रोमाञ्चकथां श्रावयन्ति तर्पिकां च प्रयच्छन्ति। अत्रैव उच्चशिक्षां समाप्य इमे अस्मान् अध्यापयन्ति। साधकाः आश्रमे शान्त्या उपविश्य मातरं स्मरन्ति। अहं जीवने बहुदुःखम् अनुभूय मातरं

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शरणं प्रपन्नः/गतः। अद्याहं युष्मान् पाठयित्वा, कथां श्रावयित्वा तर्पिकां च भोजयित्वा परमप्रसन्नः। कदा युष्मान् पुनः दृष्ट्वा प्रीतः भविष्यामि ?

—वचनं परिवर्त्य इमानि वाक्यानि पुनः लिख ।

२.(क) निम्नलिखित-धातूनाम् अन्ते 'त्वा'(क्त्वा)प्रत्ययं योजय । यथा—पठ्—पठित्वा। खेल्—खेलित्वा। भ्रम्—भ्रमित्वा। धाव्—धावित्वा। सेव् १आ—सेवित्वा।

खाद्, क्रीड्, जप्, हस्, चल्, रक्ष्, वाञ्छ्, जल्प्, चर्, निन्द्, जीव्, अर्च्, अर्ज्, अर्ह्, ईक्ष् १आ, ईर्ष्य्, ईह् १आ, ऊह् १आ, गद्, गर्ज्, गर्ह् १आ, गाह् १आ, ग्रस् १आ, घट् १आ, चुम्ब्, चेष्ट् १आ, चर्व्, जृम्भ् १आ, ज्वल्, तक्ष्, तर्ज्, त्रप् १आ, त्रस्, त्वर् १आ, द्युत् १आ, ध्वन्, ध्वंस्, नद्, पत्, फल्, बाध् १आ, भण्, भाष् १आ, भास् १आ, भिक्ष् १आ, भ्रंश्, भ्राज् १आ, मील्, मुण्ड्, मुद् १आ, यत् १आ, याच् १प.आ, राज् १प.आ, लङ्घ् १आ, लप्, वम्, वेप् १आ, वेष्ट् १आ, वन्द् १आ, व्यथ् १आ, व्रज्, शंस्, शङ्क् १आ, शम्, शिक्ष् १आ, शुच्, शुध् ४प, श्लाघ् १आ, सह् १आ, सेव् १आ, स्खल्, स्पन्द् १आ, स्पर्ध् १आ, स्फुट्, खन् १प.आ, स्विद् १आ, आस् २आ, रुद् २प, वस् २आ, विद् २प, श्वस् २प, अस् ४प, कुप् ४प, कृश् ४प, क्लिद् ४प, क्लिश् ४प, क्षम् ४प, क्षुध् ४प, तृष् ४प, त्रस् ४प, त्रुट् ४प, दम् ४प, द्रुह् ४प, नश् ४प, लुट् ४प, श्रम् ४प, स्निह् ४प, अश् ५आ, त्रुट् ६प, लिख् ६प, हिंस् ७प, ग्रन्थ् ९प, मन्थ् ९प, मुष् ९प।

(ख) षष्ठपाठस्य चतुर्थाभ्यासस्थधातूनां 'त्वा'(क्त्वा)प्रत्ययान्तरूपाणि लिख। यथा— ४.(क) अङ्क्—अङ्कयित्वा। (ख) चुर्—चोरयित्वा। (ग) क्षल्—क्षालयित्वा। (घ) कृत्—कीर्तयित्वा।

(ग) सप्तमपाठस्य प्रथमाभ्यासस्थ-प्रयोजकार्थ-धातूनां 'त्वा'(क्त्वा)-प्रत्ययान्तरूपाणि लिख। यथा— १.(क) क्रन्द्—क्रन्दयित्वा। क्रीड्—क्रीडयित्वा। (ख) हस्—हासयित्वा। (ग) कृष्—कर्षयित्वा। (घ) धृ—धारयित्वा। (ङ) लिख्—लेखयित्वा। (च) बुध्—बोधयित्वा। (छ) गै—गापयित्वा। (ज) आ-नी—आनाय्य।* (झ) भू—भावयित्वा। (ञ) जि—जापयित्वा।

---

* उपसर्गपूर्वधातूनां 'त्वा'(क्त्वा)प्रत्ययान्तरूपाणि परपृष्ठे तृतीयाभ्यासे

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(घ) स्ना २प, ख्या, पा २प, ध्मा, भा २प, या २प, वा २प, म्ना, ज्ञा ९प.आ, जि, श्रि, क्षि, स्मि १आ, चि ५प.आ, नी, भी ३प, प्री ४आ, ह्री ३प, ली ४आ, क्री ९प.आ, श्रु ५प, नु २प, यु २प, रु २प, सु ५प.आ, स्तु २प.आ, हु ३प, धु ५प.आ, भू, सू २आ, धू ९प.आ, पू ९प.आ, कृ ८प.आ, धृ, सृ, भृ, स्मृ, वृ ५प.आ, भृ ३प.आ, स्तृ ५प.आ, मृ ६आ, वृ ९प.आ, हृ। यथा—स्ना—स्नात्वा। जि—जित्वा। नी—नीत्वा। श्रु—श्रुत्वा। भू—भूत्वा। कृ—कृत्वा।

(ङ) गम्, नम्, रम् १आ, हन् २प, तन् ८प.आ, मन् ८आ। यथा—गम्—गत्वा। हन्—हत्वा।

(च) त्यज्, भज्, शक् ५प, भुज् ७प.आ, युज् ७प.आ, मुच् ६प.आ, पच्, रिच् ७प.आ, सिच् ६प.आ। यथा—त्यज्—त्यक्त्वा। भुज्—भुक्त्वा। पच्—पक्त्वा। सिच्—सिक्त्वा।

(छ) तप्, शप्, आप् ५प, क्षिप् ६प.आ, दीप् ४आ, तृप् ४प, दृप् ४प, सृप्। यथा—तप्—तप्त्वा। क्षिप्—क्षिप्त्वा। तृप्—तृप्त्वा।

(ज) नश् ४प, अश् ५आ, इष् ४प, दिश् ६प.आ, विश् ६प, द्विष् २प.आ, क्लिश् ४प, श्लिष् ४प, विष् ७प, शिष् ७प, तुष् ४प, पुष् ९प, दुष् ४प, मृष्, वृष्, कृश्, स्पृश् ६प, मृश् ६प, दृश्। यथा—नश्—नष्ट्वा। इष्—इष्ट्वा। तुष्—तुष्ट्वा। स्पृश्—स्पृष्ट्वा।

(झ) छिद् ७प.आ, भिद् ७प.आ, खिद् ४आ, क्लिद् ४प, नुद् ६प.आ, तुद् ६प.आ, पद् ४आ, सद्, वृत् १आ। यथा—छिद्—छित्त्वा। नुद्—नुत्त्वा। पद्—पत्त्वा। वृत्—वृत्त्वा।

(ञ) नृत् ४प, कृत् ६प, वृज् २आ, धृष्, डी १आ, शी २आ। यथा—नृत्—नर्तित्वा। डी—डयित्वा।

(ट) त्रै—त्रात्वा। ध्यै—ध्यात्वा। म्लै—म्लात्वा। ग्लै—ग्लात्वा। तॄ—तीर्त्वा। दॄ—दीर्त्वा। कॄ ६प—कीर्त्वा। रञ्ज्—रक्त्वा, रङ्क्त्वा।

दत्तानि। तानि खलु विशेषाणि। तेषां रूपाणि उपसर्गरहितधातूनाम् इव न भवन्ति। अतः तेषां रूपाणि न लेखनीयानि। यथा—नी (उपसर्गरहितः शुद्धधातुः)—नाययित्वा। आ-नी (उपसर्गपूर्वधातुः)—आनाय्य।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सञ्ज्—सक्त्वा, सङ्क्त्वा । स्वञ्ज्—स्वक्त्वा, स्वङ्क्त्वा । भञ्ज् ७प—भक्त्वा, भङ्क्त्वा । मस्ज् ६प—मक्त्वा, मङ्क्त्वा । बुध्—बुधित्वा, बोधित्वा । शुभ् १आ—शुभित्वा, शोभित्वा । मुह् ४प—मुहित्वा, मोहित्वा, मूढ्वा । पुष्—पुषित्वा, पोषित्वा । ष्ठिव्—ष्ठेवित्वा । जागृ—जागरित्वा । दंश्—दष्ट्वा । यज्—इष्ट्वा । सृज् ६प—सृष्ट्वा । भ्रस्ज् ६प.आ—भृष्ट्वा । प्रच्छ् ६प—पृष्ट्वा । स्था—स्थित्वा । हा ३प—हित्वा । धा ३प.आ—हित्वा । मा २प—मित्वा । ह्वे—हूत्वा । वे—ऊत्वा । वह्—ऊढ्वा । वप्—उप्त्वा । वश् २प—वशित्वा । वस्—उषित्वा । वद्—उदित्वा । वच् २प—उक्त्वा । अस् २प—भूत्वा । दा—दत्त्वा । पा—पीत्वा । लिह् २प—लीढ्वा । लभ् १आ—लब्ध्वा । लुभ् ४प—लुब्ध्वा । क्रुध् ४प—क्रुद्ध्वा । बुध् ४आ—बुद्ध्वा । युध् ४आ—युद्ध्वा । सिध् ४प—सिद्ध्वा । व्यध् ४प—विद्ध्वा । बन्ध् ९प—बद्ध्वा । स्वप् २प—सुप्त्वा । मुर्च्छ्—मूर्च्छित्वा । गुह् १प.आ—गूहित्वा, गूढ्वा । मृज्—मार्जित्वा । जॄ ९प—जरित्वा, जरीत्वा । लू ९प.आ—लवित्वा । पॄ ९प—पूर्त्वा । स्तॄ ९प.आ—स्तीर्त्वा । गै—गीत्वा । ग्रह् ९प.आ—गृहीत्वा । दह्—दग्ध्वा । रुह्—रूढ्वा ।

अकृत्वा परसन्तापमगत्वा खलनम्रताम् ।
अक्लेशयित्वा चात्मानं यत्स्वल्पमपि तद् बहु ॥*

अन्वयः—परसन्तापम् अकृत्वा, खलनम्रताम् अगत्वा आत्मानं च अक्लेशयित्वा यत् स्वल्पम् अपि (लभ्यते/प्राप्यते) तद् बहु (मन्तव्यम्) ।

अर्थः—अन्यस्य दुःखम् अजनयित्वा, दुर्जनं प्रति नम्रताम् अदर्शयित्वा आत्मानं (दैहिकसत्ताम्) च अपीडयित्वा यत् स्वल्पम् अपि प्राप्यते तत् खलु बहु इति मन्तव्यम्/विचारणीयम्, सन्तोषः कर्तव्यः इत्यर्थः ।

अकृत्वा—न कृत्वा । अगत्वा—न गत्वा । अभूत्वा—न भूत्वा ।...

---

* अनुष्टुप्—

अस्मिन् छन्दसि चत्वारः पादाः (चरणाः) भवन्ति प्रत्येकपादे च अष्ट अक्षराणि । अस्य छन्दसः प्रत्येकपादस्य पञ्चमम् अक्षरं (वर्णः) लघु षष्ठं च गुरु, प्रथमतृतीयपादयोः सप्तमम् अक्षरं गुरु द्वितीयचतुर्थपादयोः च तत् लघु भवति इति नियमः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

३. (क) अधोनिर्दिष्टानाम् उपसर्गपूर्वधातूनां ल्यबन्तरूपाणि लिख । यथा—
अभि-लष्—अभिलष्य । अव-बुध्—अवबुध्य । अति-क्रम्—अतिक्रम्य । आ-दिश्—आदिश्य । उद्-दिश्—उद्दिश्य । उप-अर्ज्—उपार्ज्य । वि-ईक्ष्—वीक्ष्य । प्र-ईक्ष्—प्रेक्ष्य । सम्-तप्—सन्तप्य ।

अव-रुह्, अव-लम्ब्, अव-लोक्, अव-गाह्, अप-कृष्, अभि-वन्द्, अभि-सिच्, आ-रुह्, आ-लिख्, आ-कर्ण्, आ-शङ्क्, आ-लक्ष्, आ-काङ्क्ष्, आ-चम्, आ-क्रुश्, आ-गम्, आ-मन्त्र्, आ-रभ्, प्र-आ-रभ्, उप-विश्, वि-हस्, वि-श्रम्, वि-सृज्, वि-मुच्, वि-द्विष्, वि-गर्ह्, वि-निन्द्, वि-युज्, वि-रुध्, वि-मृश्, वि-लप्, वि-लिख्, वि-राज्, वि-चिन्त्, वि-रम्, नि-युज्, नि-पीड्, नि-पत्, नि-रूप्, नि-मील्, निस्-श्वस्, सम्-तुष्, सम्-दिश्, सम्-दिह्, सम्-आप्, सम्-पूज्, सम्-यम्, सम्-स्पृश्, सम्-क्षिप्, प्र-काश्, प्र-हृष्, प्र-कम्प्, प्र-यत्, प्र-बुध्, प्र-विश्, प्र-सह्, प्र-आप्, परि-ईक्ष्, परि-त्यज्, परि-व्रज्, परि-चर्, परि-अट् । प्र-नम्—प्रणम्य । परा-अय् (पलाय्)—पलाय्य ।

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ।।

भावार्थः—श्लोके (अनुष्टुप्छन्दसि) सर्वत्र (प्रत्येकचरणे) पञ्चमम् अक्षरं लघु षष्ठं च गुरु भवति । किं च द्विचतुष्पादयोः (द्वितीयचतुर्थचरणयोः) सप्तमम् अक्षरं ह्रस्वम् (लघु) अन्ययोः [प्रथमतृतीयपादयोः] च तत् दीर्घं (गुरु) भवति ।

सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत् ।
वर्णः संयोगपूर्वश्च तथा पादान्तगोऽपि वा ।।

भावार्थः—अनुस्वारयुक्तः वा विसर्गयुक्तः वा दीर्घः वा वर्णः (अक्षरम्) गुरुः भवति । संयोगात् (वर्णयोः वर्णानां वा संयोगात्) पूर्ववर्ती लघुवर्णः गुरुः मन्यते । पादस्य (चरणस्य) अन्तिमः लघुवर्णोऽपि विकल्पेन गुरुः गण्यते । अस्मिन् श्लोके सर्वेऽपि गुरुवर्णाः स्थूलाक्षरैः सङ्केतिताः । अस्य श्लोकस्य प्रथमपादस्य द्वितीयः 'च' ('श्च') तृतीयपादस्य च 'च' पादान्तवर्णत्वात् दीर्घः इति गणयितुं शक्यते ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(ख) अव-चि, अनु-कृ, अनु-सृ, अप-हृ, अधि-इ, आ-दृ, आ-हृ, आ-हु, आ-श्रि, प्रति-श्रु, परि-वृ, वि-धृ, वि-स्मि, वि-स्मृ, वि-जि, वि-हृ, सम्-स्तु। यथा—अव-चि—अवचित्य। अधि-इ—अधीत्य। आ-दृ—आदृत्य। सम्-स्तु—संस्तुत्य।

(ग) अव-स्था, आ-दा, नि-घ्रा, प्र-दा, प्र-स्था, वि-ज्ञा, वि-हा, वि-ली, वि-क्री, आ-नी, प्र-सू, उद्-डी, निर्-मा। यथा—अव-स्था—अवस्थाय। वि-ली—विलीय। उद्-डी—उड्डीय। निर्-मा—निर्माय।

(घ) सम्-गै—सङ्गाय। आ-ह्वे—आहूय। आ-प्रच्छ्—आपृच्छ्य। अनु-ग्रह्—अनुगृह्य। प्र-अर्थ्—प्रार्थ्य। उद्-स्था—उत्थाय। अनु-स्था—अनुष्ठाय। प्र-शंस्—प्रशस्य। नि-बन्ध्—निबध्य। उद्-तॄ—उत्तीर्य। वि-दॄ—विदार्य। वि-कॄ—विकीर्य। प्र-पॄ—प्रपूर्य। अनु-मन्—अनुमत्य। नि-हन्—निहत्य। वि-रम्—विरम्य, विरत्य। आ-गम्—आगम्य, आगत्य। अव-गम्—अवगम्य, अवगत्य। वि-भञ्ज्—विभज्य। नि-मस्ज्—निमज्ज्य। अनु-वद्—अनूद्य। अव-गण्—अवगणय्य। वि-रच्—विरचय्य।

शब्दार्थाः

अनन्तरम्—afterwards. महाविद्यालयः—college. विश्वविद्यालयः—university. पठित्वा—having read. पढ़कर। प्रधानमन्त्रिपदलाभाय—for the attainment of Prime-Ministership. प्रस्तुतः—prepared. प्रधानमन्त्री—Prime Minister. भूत्वा—becoming. संस्कृतं राष्ट्रभाषापदे प्रतिष्ठापयिष्यामि—I will make Sanskrit the National Language of India. स्वदेशे—in one's own country. विदेशेषु—in foreign countries. भ्रमित्वा—having toured. महिमा—glory, greatness. सरलता—simplicity. उपयोगिता—utility. आधुनिकजीवने—in modern life. दैनन्दिनजीवने, दैनिकजीवने—in daily life. व्यावहारिकता—practicability. प्रतिपादयिष्यामि—(I) will illustrate, shall prove. संस्कृतप्रेमी—lover of Sanskrit. ज्ञात्वा—having known, जानकर। श्रुत्वा—having heard, सुनकर। अन्येऽपि—others also. प्रेरिताः—inspired. जीवितम्—life. सेवित्वा—

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

having served. यापयित्वा—having spent. परमकृतार्थः—completely contented or fulfilled in life. प्रत्यागच्छति—returns. ध्यात्वा—having meditated. दशसहस्रमानम्, अयुतमानम्—ten thousand metres. आदाय—having taken. आहूय—having called. तर्पिका—toffee. समाप्य—having completed. उपविश्य—having sat. शान्त्या—peacefully. प्रीतः—pleased. उपसर्गः—prefix.

दशमः पाठः

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ।
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ।।

अन्वयः अर्थश्च—राजमणिः (राजसु मणिः इव/नृपश्रेष्ठः) रामः सदा (सर्वदा) विजयते (विजयी भवति)। रमेशं (रमायाः ईशम्/पतिम्) रामं भजे (भजामि)। रामेण निशाचरचमूः (राक्षसदलम्, असुरसेना) अभिहता (अभिमुखसङ्ग्रामे/सम्मुखसमरे/युद्धे मारिता)। तस्मै रामाय नमः। रामात् परतरम् (उच्चतरम्/ऊर्ध्वतरम्/उत्कृष्टतरम्/महत्तरम्) परायणं (श्रेष्ठं गन्तव्यं धाम/स्थलम्, आश्रयः) नास्ति। अहं रामस्य दासः (सेवकः) अस्मि। रामे मे (मम) चित्तलयः (चित्तस्य लयः/लीनता/मग्नता/तन्मयता, मनोनिवेशः) भवतु (अस्तु)। भो राम, माम् उद्धर (मम उद्धारं कुरु)।

उत्तरं देहि—

राजमणिः कः? त्वं कं भजसे? निशाचरचमूः केन अभिहता? नमः कस्मै? कस्मात् परतरं परायणं नास्ति? त्वं कस्य दासः? कुत्र (कस्मिन्) ते चित्तलयः स्यात्? सम्बोधने/आह्वाने 'राम'शब्दस्य किं रूपम्?

श्रीरामः शरणं समस्तजगतां रामं विना का गती
रामेण प्रतिहन्यते कलिमलं रामाय कार्यं नमः ।
रामात् त्रस्यति कालभीमभुजगो रामस्य सर्वं वशे
रामे भक्तिरखण्डिता भवतु मे राम त्वमेवाश्रयः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अन्वयः अर्थश्च—समस्तजगतां (लोकलोकान्तराणाम्/सम्पूर्णविश्वस्य) शरणम् (आश्रयः) श्रीरामः। रामं विना का गतिः ? (रामं विना अन्या गतिः/आश्रयः नास्ति।) रामेण कलिमलं प्रतिहन्यते। (रामेण कलियुगस्य कल्मषम्/पापम्/दुरितं प्रतिहतम्/बाधितम्/नाशितं भवति। रामः कलिमलं दूरीकरोति।) रामाय नमः कार्यम् (कर्तव्यम्)। कालभीमभुजगः (कालस्वरूपः भयङ्करः सर्पः, भयङ्करः कालसर्पः) रामात् त्रस्यति (बिभेति/भयं करोति)। सर्वं रामस्य वशे (वशगतम्/मुष्टिगतम्)। रामे मे (मम) अखण्डिता (अविच्छिन्ना/अविरता/सतता/अविचला/परिपूर्णा) भक्तिः भवतु (अस्तु)। हे राम, त्वम् एव मम आश्रयः।

कृष्णो रक्षतु मां चराचरगुरुः कृष्णं नमस्याम्यहं
कृष्णेनामरशत्रवो विनिहताः कृष्णाय तस्मै नमः।
कृष्णादेव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहं
कृष्णे भक्तिरचञ्चलास्तु भगवन् हे कृष्ण तुभ्यं नमः ॥*

अन्वयः अर्थश्च—चराचरगुरुः (चरस्य/जङ्गमस्य/गतिशीलस्य/प्राणिमात्रस्य, अचरस्य/स्थावरस्य/गतिहीनस्य/पदार्थमात्रस्य गुरुः) कृष्णः मां रक्षतु (मम रक्षां करोतु)। अहं कृष्णं नमस्यामि (नमामि)। अमरशत्रवः (देवशत्रवः/राक्षसाः) कृष्णेन विनिहताः (विनाशिताः, मारिताः)। तस्मै कृष्णाय नमः। इदं जगत् कृष्णात् एव समुत्थितम् (उद्भूतम्/उत्पन्नम्/प्रादुर्भूतम्/उद्गतम्)। अहं कृष्णस्य दासः अस्मि। हे भगवन्, कृष्णे अचञ्चला (अचला/अविकम्पिता) भक्तिः अस्तु (भवतु)। हे कृष्ण, तुभ्यं नमः (नमस्ते)।

उत्तरं देहि—

चराचरगुरुः कः ? त्वं कं नमस्यसि ? अमरशत्रवः केन विनिहताः ? नमः कस्मै ? इदं जगत् कस्मात् समुत्थितम् ? कस्मिन् ते अचञ्चला भक्तिः स्यात् ? 'कृष्ण'शब्दस्य सम्बोधनं किम् ?

---

* शार्दूलविक्रीडितम् (छन्दः)

सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्।
सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्।
म, स, ज, स, त, त, ग (12.7)
(गा गा गा ल ल गा ल गा ल ल ल गा गा गा ल गा गा ल गा)
सूर्यः द्वादशसङ्ख्यायाः प्रतीकम्—द्वादश आदित्याः।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

बालः देवः च

बालः देवं नमति। बालौ देवं नमतः। बालाः देवं नमन्ति। देवः बालं रक्षति। देवः बालौ रक्षति। देवः बालान् रक्षति। बालः बालेन सह खेलति। बालः बालाभ्यां सह खेलति। बालः बालैः सह खेलति। देवः बालाय आशीर्वादान् यच्छति (ददाति)। देवः बालाभ्याम् आशीर्वादान् यच्छति। देवः बालेभ्यः आशीर्वादान् यच्छति। देवः बालात् सद्गुणान् इच्छति। देवः बालाभ्यां सद्गुणान् इच्छति। देवः बालेभ्यः सद्गुणान् इच्छति। बालस्य भक्तिः देवे अस्ति। बालयोः भक्तिः देवे अस्ति। बालानां भक्तिः देवे अस्ति। बाले विनयः अस्ति। बालयोः बुद्धिः अस्ति। बालेषु भक्तिः अस्ति। हे बाल, त्वं देवं नम/स्मर/भज/प्रार्थय। हे बालौ, युवां देवं नमतम्/स्मरतम्/भजतम्/प्रार्थयतम्। हे बालाः, यूयं देवं नमत/स्मरत/भजत/प्रार्थयत।

देव, बाला वयं सर्वे तव सेवारताः सदा।
सुमतिं देहि नो विद्यां प्रियाः पुत्रा भवेम ते ॥

अन्वयः अर्थश्च—[हे] देव, वयं सर्वे बालाः सदा तव सेवारताः। सुमतिम्, विद्यां नः (अस्मभ्यम्) देहि। वयं ते (तव) प्रियाः पुत्राः भवेम (स्याम) इति अस्माकम् अभिलाषः/आस्पृहा/इच्छा।

अश्वः सप्तसङ्ख्यायाः प्रतीकम्—सप्ताश्ववाहनः सूर्यः।
द्वादशसप्ताक्षरयतियुक्तम् इदं छन्दः।

*

आदिमध्यावसानेषु य-र-ता यान्ति लाघवम्।
भ-ज-सा गौरवं यान्ति म-नौ तु गुरुलाघवम् ॥

वृत्तभेदेन श्लोके य, र, त, भ, ज, स, म, न इति एषु अष्टसु गणेषु केचन सर्वे वा गणाः दृश्यन्ते। प्रत्येकगणे गुरुलघुमात्रायुक्ताः त्रयः वर्णाः (गुरुलघुमात्रायुक्तानि त्रीणि अक्षराणि) भवन्ति।

य	∪ — —	(यगणः आदिलघुः)
र	— ∪ —	(रगणः मध्यलघुः)
त	— — ∪	(तगणः अन्तलघुः)
भ	— ∪ ∪	(भगणः आदिगुरुः)
ज	∪ — ∪	(जगणः मध्यगुरुः)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

उत्तरं देहि—

कः कं नमति ? कौ कं नमतः ? के कं नमन्ति ? कः कं रक्षति ? कः कौ रक्षति ? कः कान् रक्षति ? कः केन सह खेलति ? कः काभ्यां सह खेलति । कः कैः सह खेलति । देवः कस्मै आशीर्वादान् यच्छति ? देवः काभ्याम् आशीर्वादान् यच्छति ? देवः केभ्यः आशीर्वादान् यच्छति ? देवः कस्मात् सद्गुणान् इच्छति ? देवः काभ्यां सद्गुणान् इच्छति ? देवः केभ्यः सद्गुणान् इच्छति ? देवे कस्य भक्तिः अस्ति ? देवे कयोः भक्तिः अस्ति ? देवे केषां भक्तिः अस्ति ? कस्मिन् विनयः अस्ति ? कयोः बुद्धिः अस्ति ? केषु भक्तिः अस्ति ?

स ◡ ◡ — (सगणः अन्तगुरुः)
म — — — (मगणः त्रिगुरुः)
न ◡ ◡ ◡ (नगणः त्रिलघुः)

◡ (U) इति एतत् लघुमात्राद्योतकं चिह्नम् ।
— इति एतत् गुरुमात्राद्योतकं चिह्नम् ।
(गुरुलघुमात्रार्थं S । इति एतत् चिह्नद्वयमपि अति प्रसिद्धम् ।)
ल = लघुमात्रा = एकसङ्ख्यका ।
ग (गा) = गुरुमात्रा = द्विसङ्ख्यका ।

मस्त्रिगुरुस्त्रिलघुश्च नकारो
भादिगुरुः पुनरादिलघुर्यः ।
जो गुरुमध्यगतो रलमध्यः
सोऽन्तगुरुः कथितोऽन्तलघुस्तः ।।

छन्दोगणस्मरणार्थम् इयं सरलपङ्क्तिः कण्ठे धारणीया—

'य मा ता रा ज भा न स ल ग म् ।'

यगणः	यमाता	U — —
मगणः	मातारा	— — —
तगणः	ताराज	— — U
रगणः	राजभा	— U —
जगणः	जभान	U — U
भगणः	भानस	— U U
नगणः	नसल	U U U

ल = लघु । ग = गुरु ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अभ्यासाः

देव (अकारान्त-पुंलिङ्गशब्दः)

कारकम्	विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
कर्ता	प्रथमा	देवः	देवौ	देवाः
कर्म—(to, को)	द्वितीया	देवम्	देवौ	देवान्
करणम्—by, with, के द्वारा, से, साथ)	तृतीया	देवेन	देवाभ्याम्	देवैः
सम्प्रदानम्—(for, to, के लिए, को)	चतुर्थी	देवाय	देवाभ्याम्	देवेभ्यः
अपादानम्—(from, से)	पञ्चमी	देवात्	देवाभ्याम्	देवेभ्यः
सम्बन्धार्थकम्—(of, का, के, की)	षष्ठी	देवस्य	देवयोः	देवानाम्
अधिकरणम्—(in, at, on, upon, over, में, पर, ऊपर)	सप्तमी	देवे	देवयोः	देवेषु
सम्वोधनम्—(O, हे, अरे, रे)	प्रथमा	देव	देवौ	देवाः

बाल

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	वालः	बालौ	वालाः
सम्बोधनम्	वाल	,,	,,
द्वितीया	बालम्	,,	बालान्
तृतीया	वालेन	वालाभ्याम्	बालैः
चतुर्थी	वालाय	,,	वालेभ्यः
पञ्चमी	वालात्	,,	,,

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

षष्ठी	बालस्य	बालयोः	बालानाम्
सप्तमी	बाले	,,	बालेषु

ईदृश

विभक्तिः	एकवचनम्	द्विवचनम्	वहुवचनम्
प्रथमा	ईदृशः	ईदृशौ	ईदृशाः
द्वितीया	ईदृशम्	ईदृशौ	ईदृशान्
तृतीया	ईदृशेन	ईदृशाभ्याम्	ईदृशैः
चतुर्थी	ईदृशाय	ईदृशाभ्याम्	ईदृशेभ्यः
पञ्चमी	ईदृशात्	ईदृशाभ्याम्	ईदृशेभ्यः
षष्ठी	ईदृशस्य	ईदृशयोः	ईदृशानाम्
सप्तमी	ईदृशे	ईदृशयोः	ईदृशेषु

कीदृश, यादृश, तादृश, मादृश, त्वादृश, भवादृश, एतादृश, युष्मादृश, अस्मादृश, सदृश इति एतेषां विशेषण-शब्दानां रूपाणि पुंलिङ्गे 'ईदृश'शब्दवत् करणीयानि ।

सर्वेषामपि अकारान्त-पुंलिङ्ग-शब्दानां रूपाणि 'देव'शब्दवत् 'बाल'-शब्दवत् वा भवन्ति । तेषां सूची अग्रे दत्ता ।

१. 'देव'शब्दस्य एकवचनरूपैः रिक्तस्थानानि पूरय—

अयं — (अस्ति) । अहं — नमामि । — अहं सततं रक्षितः/रक्षिता । — नमः । — अहम् आशीर्वादान् प्राप्नोमि । — कृपा अपारा । — मम भक्तिः अस्ति । हे —, त्वाम् अहं कदापि न विस्मरेयम् ।

एकादशः पाठः

गणेश (प्रातिपदिकम्)

गणेशः महादेवस्य पुत्त्रः । सः गणाधिपतिः विद्यादाता च । शुभकार्येषु तं वयं प्रथमं स्मरामः । वयं गणेशं पूजयामः प्रणमामः च । गणेशेन अस्माकं ज्ञानं वर्धते । ॐ गणेशाय नमः । गणेशात् सर्वे विद्याम्, बुद्धिम्, आशीर्वादान्

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

च इच्छन्ति/कामयन्ते। मूषिकः गणेशस्य वाहनम्। गणेशे अस्माकम् अचला भक्तिः भवतु। हे गणेश, ज्ञानं देहि विघ्नं च नाशय।

शिव

शिवः गणेशस्य पिता। सः महादेवः। अहं शिवं नमामि पूजयामि च। शिवेन कन्दर्पः दग्धः। ॐ नमः शिवाय। शिवात् अहं वरान् प्राप्नोमि। शिवस्य मस्तके जटाः सन्ति। शिवे मम अचला भक्तिः अस्तु। हे शिव, मां रक्ष।

श्रीकृष्ण

श्रीकृष्णः पाण्डवानां सखा। सः षोडशकलापूर्णः अवतारः। अहं श्रीकृष्णम् आराधयामि। बाल्यकाले श्रीकृष्णेन पूतना मारिता। श्रीकृष्णाय श्रीराधिका सम्पूर्णं जीवितं समर्पितवती। युद्धक्षेत्रे अर्जुनेन श्रीकृष्णात् प्राप्ताः उपदेशाः गीतायां निबद्धाः। श्रीकृष्णस्य हस्ते सुदर्शनचक्रं वर्तते। श्रीकृष्णे गोपीनां प्रगाढा प्रीतिः आसीत्। हे श्रीकृष्ण, हे योगेश्वर, मह्यं योगसिद्धिं प्रयच्छ।

श्रीअरविन्द

श्रीअरविन्दः शरणं मम। अहं श्रीअरविन्दं प्रणमामि। श्रीअरविन्देन सह नीरदार्यः बहुविषयान् चर्चयति स्म। ॐ श्रीअरविन्दाय नमः। श्रीअरविन्दात् अहं योगसिद्धिं प्राप्स्यामि। अहं श्रीअरविन्दस्य शिष्यः/शिष्या/भक्तः/भक्ता। श्रीअरविन्दे मम श्रद्धा दृढतरा भवतु। हे श्रीअरविन्द, त्वमेव मम गतिः/मुक्तिः/प्रभुः/सहायः।

अभ्यासाः

१. (क) 'सूर्य'शब्दस्य एकवचनरूपैः रिक्तस्थानानि पूरय—

—पूर्वस्यां दिशि/पूर्वदिशायाम् उदेति/उदयति। प्रातः सायं च जनाः —प्रणमन्ति। —पृथिवी प्रकाशिता भवति। ॐ—नमः। द्विजाः स्नानकाले —उदकार्घ्यम् अर्पयन्ति। —अहम् आरोग्यं कामये/इच्छामि। —रूपं ज्योतिर्मयम्। —सत्यज्योतिः विद्यते। हे—, प्रसीद, स्वस्य सत्यज्योतिषा मां ज्योतिष्मन्तं कुरु।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(ख) 'चन्द्र'शब्दस्य एकवचनरूपैः रिक्तस्थानानि पूरय—

रात्रौ—आकाशे विभाति/शोभते। —दृष्ट्वा बालाः प्रसन्नाः भवन्ति। रात्रौ पृथ्वी—उद्भासिता/प्रकाशिता भवति। —सूर्यः प्रकाशं ददाति। —वयं शीतलां चन्द्रिकाम्/ज्योत्स्नां प्राप्नुमः। —शोभा अतीव रमणीया। —शशक-लाञ्छनम् अस्ति। हे—, त्वां दृष्ट्वा अहम् उत्फुल्लः।

(ग) 'कन्दुक'शब्दस्य एकवचनरूपैः रिक्तस्थानानि पूरय—

—मम प्रियं खेलनकम्। मह्यं—ददातु। अहं—खेलिष्यामि। अहं—स्पृहयामि। अहं—दूरे अस्मि। —आकारः गोलः/वर्तुलः। —वायुः अस्ति। हे—, त्वं मम सकाशम् आगच्छ।

(घ) 'बिडाल'शब्दस्य एकवचनरूपैः रिक्तस्थानानि पूरय—

—मूषकं खादति/भक्षयति/मारयति। गृहेषु जनाः—पालयन्ति। —मूषकाः त्रास्यन्ते। —मीनः भृशं रोचते। —मूषकाः द्रुतं पलायन्ते। —लोमानि कोमलानि। —अपुत्रकाणां स्नेहः पुत्रवत् भवति। हे—, त्वं मम गृहात् मूषकान् विद्रावय।

(ङ) 'विद्यालय'शब्दस्य एकवचनरूपैः रिक्तस्थानानि पूरय—

अयम् अस्माकं—। अहं प्रतिदिनम् इमं—गच्छामि। अनेन—अहं बहु उपकृतः भवामि। अस्मै—अहं किमपि न ददामि परन्तु अस्मात्—अहं पुस्तकादिकं प्राप्नोमि/गृह्णामि। अस्य—सम्मुखे अस्माकम् आश्रमः विद्यते। अस्य—अभ्यन्तरे बहवः पादपाः वृक्षाश्च सन्ति। अस्य—वातावरणम् अतीव शान्तम्, पवित्रम् आध्यात्मिकं च। अस्मिन्—मम अतिशयः अनुरागः/स्नेहः अस्ति। हे—, त्वं सर्वदा मम ध्येयं भव। अहं सर्वदा तव छात्रः भवितुम् इच्छामि।

(च) 'हस्त'शब्दस्य एकवचनरूपैः रिक्तस्थानानि पूरय—

अयं मम—। अहं—दर्शयामि। अहं—लिखामि, कमपि न ताडयामि। —दानं शोभते न तु परपीडनम्। मम—खटी पतिता। —भूषणं दानम्। अधुना मम—खटी अस्ति। हे—, त्वं सज्जनान् कदापि न ताडय किन्तु दुष्टान् दमय।

(छ) 'हस्त'शब्दस्य द्विवचनरूपैः रिक्तस्थानानि पूरय—

इमौ मम—। अहं—उत्थापयामि। अहं—प्रणमामि। —दानं शोभते न तु परपीडनम्। मम—इमं हस्तपं कृपया निःसारय/बहिः कुरु। —भूषणं

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

दानम् । मम द्वयोः—द्वे तर्पिके स्तः । हे—, युवां भगवत्कार्याय सदा सज्जौ तिष्ठतम् ।

(ज) 'कर्ण'शब्दस्य द्विवचनरूपैः रिक्तस्थानानि पूरय—

इमौ मम— । युवां मम—पश्यथः । अहं—शृणोमि/आकर्णयामि । —सत्यश्रवणं शोभते । अहं प्रतिशनिवारं—मलं निःसारयामि । मम—श्रवणशक्तिः अतीव तीव्रा/प्रखरा । त्वं मम—तैलं पातय । हे—, युवां कदापि बधिरौ न भवतम् ।

(झ) 'पाद'शब्दस्य द्विवचनरूपैः रिक्तस्थानानि पूरय—

एतौ मम— । एतौ लोहवत् दृढौ तूलवत् कोमलौ च । यूयम् एतौ—पश्यथ । अहं—चलामि धावामि च । अहं—आयुर्वेद-विभागात् सर्षपतैलम् आनयामि । कृपया मम—कण्टकं निःसारय । सर्वदा — रक्षा कर्तव्या । अहं रात्रौ—तैलं मर्दयामि । हे—, मार्गधावने युवां क्लान्तौ न भवतम् ।

(ञ) 'केश'शब्दस्य बहुवचनरूपैः रिक्तस्थानानि पूरय—

एते मम— । एते कृष्णाः । अहम् एतान्—नित्यं प्रसाधयामि । एतैः—मस्तकम् आच्छादितम्/आवृतम् । अहम् एतेभ्यः—तैलम् आश्रमात् प्राप्नोमि । स्नानात् परम् एतेभ्यः—जलं निःसरति । एतेषां—रङ्गः कृष्णः । वृद्धानां—प्रायः धवलाः । एतेषु—यूकाः न सन्ति । हे—, यूयं सदा कृष्णाः एव तिष्ठत, कदापि धवलाः मा भवत । अहं चिरयौवनम् इच्छामि । अहं सदा तरुणः/णी स्थातुम् इच्छामि ।

(ट) 'वादक'शब्दस्य एकवचनरूपैः रिक्तस्थानानि पूरय—

अयं—अस्ति । अयं वाद्यं वादयति । अयं स्वरन्धरां वादयति । अयं तानपूरं वादयति । अहं—रोचये । अहं वाद्यं रोचये । अहं गानं रोचये । —वाद्यं वाद्यते । अहं—सह गायामि । अहं वाद्येन सह गायामि । —अहम् उपाहारम्/तर्पिकां ददामि । —अहं वादनं शिक्षे । —स्वभावः अतीव भद्रः । —मम स्नेहः अगाधः । हे—, त्वं सदा वाद्यं वादय । त्वं सदा मां वाद्यं शिक्षय । वाद्येन अहं भगवति तल्लीनः भवितुमिच्छामि ।

(ठ) 'शुक'शब्दस्य सर्वैः विभक्तिरूपैः रिक्तस्थानानि पूरय—

मम एकः—अस्ति । रामस्य द्वौ—स्तः । गोविन्दस्य त्रयः—सन्ति । अहं—प्रतिदिनं कृष्णनाम शिक्षयामि । रामः—प्रतिदिनं कृष्णनाम शिक्षयति । गोविन्दः—प्रतिदिनं राधानाम शिक्षयति । अहं—सह बहु आलपामि । रामः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

—सह बहु आलपति । गोविन्दः—सह बहु आलपति । अहं—फलं (सेवम्) ददामि । रामः—फलं ददाति । गोविन्दः—फलं ददाति । अहं—नित्यं कृष्णनाम शृणोमि । रामः—नित्यं कृष्णनाम शृणोति । गोविन्दः—नित्यं राधानाम शृणोति । मम—वर्णः हरितः । रामस्य—वर्णः हरितः । गोविन्दस्य—वर्णः हरितः । अहं—अत्यधिकं स्निह्यामि/प्रीणामि । रामः—अत्यधिकं स्निह्यति/प्रीणाति । गोविन्दः—अत्यधिकं स्निह्यति/प्रीणाति । हे—, त्वं सदा कृष्णनामैव रट । हे—, युवां सदा कृष्णनामैव रटतम् । हे—, यूयं सदा राधानामैव रटत ।

(ड) 'वेद'शब्दस्य सर्वैः विभक्तिरूपैः रिक्तस्थानानि पूरय—

अयं— । इमौ— । इमे— । अहम् इमं—पठामि । सः इमौ—पठति । त्वम् इमान्—पठसि । अहम् अनेन—अमृतत्वं प्राप्स्यामि । सः आभ्यां—पराज्ञानं प्राप्स्यति । त्वम् एभिः—अध्यात्मज्ञानं प्राप्स्यसि । अस्मै—नमः । आभ्यां—नमः । एभ्यः—नमः । अहम् अस्मात्—सर्वविधं ज्ञानं प्राप्स्यामि । सः आभ्यां—सर्वविधं ज्ञानं प्राप्स्यति । त्वम् एभ्यः—सर्वविधं ज्ञानं प्राप्स्यसि । अस्य—प्रकाशयिता कः ? अनयोः—महिमा अपारः । एषां—महिमा अपारः । अस्मिन्—मम अनुरागः अस्ति । अनयोः—तस्य अनुरागः अस्ति । एषु—तव अनुरागः अस्ति किम् ? हे—, त्वं ज्ञानग्रन्थः ननु । त्वं मयि प्रसन्नः भव, स्वगूढरहस्यं मयि उद्घाटय । अहं वेदाचार्यः भवितुम् इच्छामि । अहं पराज्ञानम् इच्छामि । हे—, युवां तस्मिन् प्रसन्नौ भवतम् । हे—, यूयं सर्वेषु स्वरहस्यं प्रकटयत ।

(ढ) 'आश्रम'शब्दस्य सर्वैः विभक्तिरूपैः रिक्तस्थानानि पूरय—

अयम् अस्माकम्— । अत्र 'आनन्दाश्रमः' इति अन्यः—अपि अस्ति । एवं पुदुच्चेरीनगरे द्वौ—प्रसिद्धौ स्तः । भारतवर्षे बहवः—सन्ति । सर्वे—न समानाः । तेषु सर्वेषु आश्रमेषु अस्माकम्—विलक्षणः/विशिष्टः/अप्रतिमः/अतुलनीयः/अद्वितीयः/विशिष्यते । अहं प्रतिदिनं प्रातः सायं च—गच्छामि । अहम् आनन्दाश्रमं न दृष्टवान्/दृष्टवती । किन्तु इमौ द्वौ बालकौ पुदुच्चेरीनगरस्थौ द्वौ अपि—दृष्टवन्तौ । अत्र बहवः जनाः अन्यान् बहून्—दृष्टवन्तः । अनेन—अहं लालितः, पालितः पोषितश्च/लालिता, पालिता पोषिता च । अहम् अनेन—सह घनिष्ठं सम्बद्धः/सम्पृक्तः/सम्बद्धा/सम्पृक्ता । इमौ द्वौ बालकौ पुदुच्चेरीस्थिताभ्यां द्वाभ्याम्—सह घनिष्ठं सम्बद्धौ । अत्रत्याः बहवः जनाः आभ्यां द्वाभ्याम्—सह सम्बद्धाः । बहवः भारतीयाः अन्यैः बहुभिः—सह सम्बन्धयुताः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अहम् अस्मै—कार्यं करोमि । इमौ द्वौ सज्जनौ पुदुच्चेरीस्थिताभ्यां द्वाभ्याम्—आर्थिकसहायतां/धनसाहाय्यं कुरुतः । बहवः आस्तिकजनाः अन्येभ्यः बहुभ्यः—धनं यच्छन्ति । अहम् अस्मात्—ऋद्धिं प्राप्नोमि । इमौ द्वौ नागरिकौ पुदुच्चेरीस्थिताभ्यां द्वाभ्याम्—आशीर्वादान् प्राप्नुतः । बहवः धार्मिकजनाः अन्येभ्यः बहुभ्यः — आशीर्वादान् प्राप्नुवन्ति । अहम् अस्य — साधकः / भक्तः / कर्मी / साधिका / भक्ता / कर्मिणी । इमौ द्वौ नागरिकौ / नागरौ पुदुच्चेरीस्थितयोः द्वयोः — भक्तौ / पृष्ठपोषकौ । बहवः सुविधावादिजनाः समकालम् अन्येषां बहूनाम्—भक्ताः भवन्ति । अहम् अस्मिन् —वसामि । इमौ द्वौ प्रतिवेशिनौ नित्यं पुदुच्चेरीस्थितयोः द्वयोः—ईश्वरं/भगवन्तं प्रार्थयतः । बहवः साधकाः अन्येषु बहुषु—साधनां कुर्वन्ति । हे—, त्वमेव ममाश्रयः । हे पुदुच्चेरीस्थौ द्वौ—, इमौ प्रतिदिनं युवां द्रष्टुकामौ । हे भारतवर्षस्थाः अन्ये बहवः—, यूयं पार्थिवजीवने भगवन्तं प्रकाशयत/अभिव्यञ्जयत/मूर्तयत ।

(ण) 'काक', 'पिक' इति एतयोः शब्दयोः एकवचनरूपैः रिक्तस्थानानि पूरय—

एषः काकः । एषः कृष्णः । एषः पिकः । एषोऽपि कृष्णः । तस्मै—रोचते । तस्मै—न रोचते । मह्यं तु—रोचते, —अपि रोचते । एतौ द्वौ पिककाकौ मह्यं रोचेते । अहम् एतौ द्वौ रोचये । किमर्थम् ? काँ काँ इति कुर्वन् (कायन्) काकः मां निद्रायाः प्रबोधयति/जागरयति/उत्थापयति । अहं—प्रबोधितः भवामि । अहम् एतेन प्रातर्जागरणे उपकृतः भवामि । —सह मम मिलनं न भवति । एषः दूरे आम्रकुञ्जस्य गहने कोणे प्रच्छन्नः/गुप्तः तिष्ठति । अहं—बलिं ददामि । अहम् एतस्मै प्रचुरं खाद्यं ददामि । अहं—बलिं दातुं न शक्नोमि । अहम् एतस्मै किमपि दातुं न शक्नोमि । अतः मम दुःखं भवति । अहं—लोककल्याणं शिक्षे । अहम् एतस्मात् परोपकारं शिक्षे । काकः—अण्डानि स्फोटयति । सः एतस्य शावकान् पालयति । अहं—पञ्चमस्वरं शिक्षे । अहम् एतस्मात् कण्ठमाधुर्यं शिक्षे । अहं—परोपकारं प्रशंसामि । अहम् एतस्य सङ्घबद्धतां प्रशंसामि । अहं—धूर्ततां न रोचये । सः— अण्डानि त्रोटयति/नाशयति/दूरे क्षिपति । —मम स्नेहः अस्ति । एतस्मिन् मम आदरः अस्ति । अहं—स्निह्यामि । अहम् एतस्मिन् प्रीणामि । हे—, त्वं पिकापेक्षया जनानाम् अधिकतरम् उपकारं करोपि । तथापि कुतः सर्वे त्वयि न स्निह्यन्ति ? कुतस्ते त्वां निन्दन्ति ? कुतस्ते त्वत् जुगुप्सन्ते ? हे—, त्वम् आम्रकुञ्जप्रियः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वसन्तप्रेमी च। तव मधुरकण्ठं वयं भृशं रोचयामहे । किन्तु त्वं सदा दूरे तिष्ठसि, अस्मभ्यं दर्शनं न ददासि। त्वं निर्जनताप्रियः। त्वं सङ्घसुखं न जानासि। त्वं सङ्गतिसुखं न जानासि। त्वं सदा अस्मत् दूरे भवसि। किन्तु तव पञ्चमतानम् अहं भृशं रोचये। त्वं केवलं वसन्तसमये गायसि, अन्यसमये किं गातुं न शक्नोषि ? तदा कः मह्यं श्रवणसुखं/कर्णरसायनं दास्यति ? अहं पञ्चमस्वरेण गातुमिच्छामि । यदि त्वम् अन्यसमये गातुं न शक्नोषि (इच्छसि वा) तर्हि निकटम् आगच्छ। अहं तव स्वरस्य ध्वनिलेखं करिष्यामि।

अवधेयम्

१. र्, ष् इति एताभ्यां वर्णाभ्यां परस्य 'न'कारस्य 'ण'कारः भवति समानपदे (अखण्डपदे)।* यथा—नृणाम्, तिसृणाम्, पितॄणाम्, भ्रातॄणाम्, चतुर्णाम्, विस्तीर्णम्, विकीर्णम्, पुष्णाति, मुष्णाति।

२. यदि समानपदं न स्यात्, पदद्वयं ततोऽधिकपदानि वा स्युः तदा 'न'कारस्य 'ण'कारः न भवति। यथा—नृ-यानम्, वृष-यानम्, गिरि-नन्दिनी, त्रिनेत्रः, त्रिनयनः, सर्वनाम, चारुनेत्रा, दुर्नाम, अद्रिनाथः, वारिनिधिः, रघुनन्दनः, रघुनाथः, दीर्घनयना, चित्रभानुः, वृषवाहनः, गिरिगहनम्। इमे शब्दाः 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रस्य अपवादभूताः।

३. अट्कुप्वाङ्नुम्व्यवायेऽपि ।। पा. ८. ४. २. ।।

अट्—स्वरवर्णाः (अच्) + ह्, य्, व्, र् (ट्) → अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, ऌ, ए, ऐ, ओ, औ, ह्, य्, व्, र्।

कुः—कवर्गः → क्, ख्, ग्, घ्, ङ।

पुः—पवर्गः → प्, फ्, ब्, भ्, म्।

नुम्—अनुस्वारः।

आङ्—(उपसर्गः)

समानपदे (अखण्डपदे) अट्, कुः, पुः, नुम्, आङ् इति एतेषां व्यवधाने सत्यपि र्, ष् इति आभ्यां परवर्तिनः 'न'कारस्य 'ण'कारः भवति। यथा—

अट्—करणम्, हरणम्, तरणम्, मरणम्, कराणाम्, नराणाम्, कुमाराणाम्, हरिणा, ऋषिणा, हरीणाम्, ऋषीणाम्, प्रभुणा, गुरुणा, प्रभूणाम्, गुरूणाम्,

---

* रषाभ्यां नो णः समानपदे ।। पा. ८, ४, १, ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नरेण, करेण, कुमारेण, वर्षणम्, घर्षणम्, परायणम्, उत्तरायणम्, अग्रणीः, ग्रामणीः, इक्षुवणम्, आम्रवणम्, खदिरवणम्, पूर्वाह्णः, अपराह्णः ।

कुः—अर्केण, मूर्खाणाम्, अर्घ्येण, गर्गेण ।

पुः—दर्पेण, गर्भेण, चर्मणा, कर्मणा ।

आङ्—परि+आ(ङ)+नद्धम्=पर्याणद्धम् ।

नुम् (अनुस्वारः)—बृंहणम्, तृंहणम् (हिंसनम्) ।

रामेण, नृपेण, रेखकेण, वृक्षेण, मनुष्येण, रामायणम्, शूर्पणखा, परिणयः, परिणामः, प्रणामः, प्रणिपतति, प्रणिपातः, प्रमाणम् इत्यादि ।

प्रत्युदाहरणानि—

भरतेन→भ्+अ+र्+अ+त् (अट्कु० इति सूत्रेण अननुमतं व्यवधानम्)+ए+न्+अ=भरतेन ।

गरलेन, शृगालेन, अर्थेन, आर्त्तेन, पर्वतेन, कृष्णेन, दर्शनम्, स्पर्शनम्, रटनम्, अर्चनम् । एषु सर्वेषु शब्देषु नियमविरुद्धः वर्णः क्रमेण ल, ल, थ, त, त, ण, श, श, ट, च इति बोद्धव्यम् ।

४. पदान्तस्य 'न'कारस्य 'ण'कारः न भवति । यथा—नरान्, गिरीन्, द्रुमान्, गुरून्, भ्रातॄन्, मृगान् इत्यादि ।

५. अपवादाः—कृन्तति, ग्रन्थनम्, वृन्दम्, रन्धनम्, तृप्नोति, क्षुभ्नाति ।

अकारान्तपुंलिङ्गशब्दाः

[प्रत्येकशब्दस्य अन्ते विसर्गं (:) योजयित्वा पठ्यताम्]

अवतार	अङ्क	अक्ष	अंश	अङ्कुर /रम्
अङ्गप्रोञ्छ	अङ्गार /रम्	अङ्गुल /लम्	अङ्गुष्ठ	अज
अजगर	अज्ञ	अट्टहास	अण्ड /डम्	अतिशय
अत्याचार	अधर	अधिकार	अधिप	अध्यापक
अध्याय	अनध्याय	अनन्त	अनल	अनादर
अनामय /यम्	अनिल	अनुग्रह	अनुचर	अनुज
अनुताप	अनुच्छेद	अनुभव	अनुराग	अनुरोध
अनुवाद	अनुस्वार	अन्त	अन्तराय	अन्याय
अन्वय	अन्वेषक	अन्ध	अन्धकार	अपभ्रंश

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अपकार	अपूप	अपमान	अपराध	अपराह्ण
अपशब्द	अभाव	अभिनय	अभिप्राय	अभिमान
अभियोग	अभिलाष	अभ्यास	अमात्य	अर
अरुण	अर्क	अर्चक	अर्थ	अर्भक
अलङ्कार	अलस	अवकर	अवकाश	अवसाद
अवधूत	अवयव	अवरोध	अवरोह	अवशेष
अवसर	अश्व	अश्वतर	अश्वत्थ	असुर
अस्त	अहंकार	अग्रज	अध्यक्ष	अध्यवसाय
आनन्द	आकाश /शम्	आदेश	आवास	आधार
आवेश	आयास	आर्य	आचार्य	आलय /यम्
आश्रम /मम्	आश्रय	आश्लेष	आश्वास	आहार
आहव	आस्वाद	आकार	आक्रोश	आक्षेप
आगन्तुक	आग्रह	आचार	आघात	आदर
आदर्श	आदित्य	आपण	आपणिक	आभास
आमय	आम्र (वृक्षः)	आय	आयाम	आयुध /धम्
आरम्भ	आरक्षक	आरोह	आलाप	आलोक
आशय	आस्फोट	आसव	आह्लाद	आतप
इन्द्र	इन्द्रगोप	उरग	उपग्रह	उष्ट्र
उपाय	उपवास	उपहास	उत्साह	उत्सव
उच्चन्यायालय	उपकार	उपस्कर	उपभोग	उपहार
उपचार	ऊर्णनाभ	एरण्ड (वृक्षः)	ऐरावत	ऐन्द्रजालिक
ओष्ठ	ओङ्कार	औषधालय	कण	कृषक
कफ	कर	काल	किरण	कोकिल (पिक)
काक	काच	कुक्कुर	कुठार	कण्ठ
कपोल	कपोत	कन्धर	केश	कुटीर
कुमार	कपित्थ (वृक्षः)	कण्टक /कम्	कङ्कत	कङ्काल /लम्
कङ्कण /णम्	कक्ष	कीट	कूप	कल्लोल
कुम्भ	कुक्कुट	कोलाहल	कु(कू)ष्माण्ड	क्लेश
किल	कुश	कार्यालय	कास	कोप
क्रकच	कोष	कलह	क्रोध	क्रोश
करवीर (वृक्षः)	कदम्ब (वृक्षः)	कटाह	करण्ड	कारण्ड

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कारागार	कच्छप	कृकलास	क्रम	कार्यक्रम
कूर्म	कर्कट	काष्ठकूट	कूर्पर	कर्दम
क्षय	क्षुर	क्षत्रिय	क्षोभ	क्षेप
क्षेपक	खग	खर्जूर (वृक्षः)	खेद	खड्ग
खुर	खण्ड /ण्डम्	ग्रह	गोवत्स	गर्दभ
गण्डक	गरुड	गृध्र	गल्ल	गज
गुच्छ	गन्ध	ग्रन्थ	गण्डक	गुप्तचर
गर्व	गर्भ	ग्राम	ग्रीष्म	गायक
घोटक	घास	घट	घुण	धर्म
घट्ट	चन्द्र	चटक	चिल्ल	चित्रक
चीत्कार	चित्रल	चातक	चिकित्सक	चालक
चन्दन (वृक्षः)	चमस /सम्	चषक /कम्	चम्पक (वृक्षः)	चपेट
चरण /णम्	चौ(चो)र	चाण्डाल	छाग /छगल	छात्रावास
छल /लम्	छाद	छुछुन्दर	जप	जन
जम्बु(बू)क	जीव	जय	जीरक	ज्वर
जरद्गव	टेर (टेरकः)	टङ्क /ङ्कम्	ठक्कुर	ढौल
तरुण	तनय	ताल (वृक्षः)	तरङ्ग	ताप
तस्कर	तिरस्कार	तक्षक	तगर (वृक्षः)	तल्प /ल्पम्
तल /लम्	तुषार	तुष	तर्क	तूर्य /र्यम्
तूल /लम्	तैलकार	तट /टम्	तैलचोर	तर्णक
तडाग	तण्डुल	त्रास	दर्शक	दिवस
देह	दन्त	दाडिम (वृक्षः)	दर्पण	दर्प
दूत	दण्ड /ण्डम्	दास	देश	देवदूत
दोष	दानव	दुष्ट	दुर्जन	दरिद्र
दीन	दम्भ	दीनभाव	दाह	दंश
दीपस्तम्भ	द्राक्तर	देवर	दीप	द्वीप /पम्
दम्य	धावक	धर्म	धनिक	धूर्त
धीवर	धूम	धत्तूर (वृक्षः)	धूसर	नियामक
नकुल	नाग	नारिकेल (वृक्षः)	नख /खम्	निम्ब (वृक्षः)
न्याय	न्यायालय	नृप	नाश	नापित
नारङ्ग	नील	निनील	नियम	निवास

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

निर्धन	न्यायाधीश	नाविक	निर्झर	नर्तक
निबन्ध	नीड /डम्	पालक	पूजक	पूग (वृक्षः)
पाठक	पुरुष	पुच्छ /च्छम्	पवन	पर्वत
पक्ष	पेचक (उलूकः)	पतङ्ग	पितृव्य	पितामह
पुरोहित	पुस्तकालय	पनस (वृक्षः)	पेरुक (वृक्षः)	पिप्पल
परिच्छद	परिवार	परिचय	परिवेश	पाषाण
पार्श्व /र्श्वम्	पावक	पागल	पामर	पार /रम्
प्रणय	प्रत्यूष	प्रस्तर	प्रवाह	पराजय
पुष्पवाट	प्रबन्ध	प्रकाश	प्रयत्न	प्रयास
प्रदेश	प्रति(ती)कार	पुरस्कार	प्रसङ्ग	प्रदीप
प्रसेव	प्रकोष्ठ	प्रलय	प्रपात	प्रतारक
प्रवञ्चक	प्रावार	पाटल	पतङ्ग	पातक /कम्
पथिक	पोत	पारावत	प्रासाद	प्रसाद
प्रदोष	प्रेक्षालय	प्रस्ताव	प्रातराश	परिहास
पराभव	फण	फुप्फुस	बालक	बलीवर्द
बलद	बिडाल	बान्धव	बोध	बहिष्कार
बकुल (वृक्षः)	बुद्बुद	बिल्व (वृक्षः)	ब्राह्मण	भिक्षुक
भल्लूक	भृङ्ग	भ्रमर	भेक	भुज
भागिनेय	भ्रातृव्य	भोग	भेद	भार
भूत	भुजङ्ग	मानव	मनुष्य	मेघ
मास	मेष	मेषपाल	महिष	मयूर
मत्स्य (मीनः)	मृग	मधुप	मत्कुण	मशक
मणिबन्ध	मातामह	मुक्ताहार	मुहूर्त	मन्त्र
मूढ	मूर्ख	मल्ल	मालाकार	मध्याह्न
मुद्रणालय	मत्त	महाशय	महोदय	मनस्ताप
मोह	मार्ग	मठ	मकर	मर्कट
मीनरङ्क	महाग्रीव	मातुल	यजमान	याचक
योग	यज्ञ	याग	यूप /पम्	राक्षस
रस	रङ्ग	रथ	रव	रजक
रुग्ण	रोष	रोग	रक्त (वर्णः)	रक्षक
राजहंस	राजकुमार	लवङ्ग (वृक्षः)	लोभ	लोक

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

लोप	लेख	लय	लम्फ	लोमश
लेश	वत्स	वार	वृष	वृषभ
व्याघ्र	वृश्चिक	वृक	वानर	वराह
वट (न्यग्रोधः)	व्यय	वंश	वर	वसन्त
वात	वेग	वेष (श)	वर्षोपल	वल्मीक /कम्
वेद	विज्ञ	वैश्य	वैद्य	वास
विलम्ब	विवाह	विकल्प	व्यायाम	विरोध
वाचनालय	वस्त्रालय	वाचाल	वामन	विकार
विराम	विराग	विवाद	वियोग	वाक्कील
वर्ण	वर्ग	विमर्श	विवेक	विषाद
विशेष	विषय	व्यवहार	विश्वास	शूकर
शशक	शुक	श्रुतलेख	शौचालय	शोक
शम्बु(बू)क	शर	शलभ	श्येन	श्वशुर
श्याल	शब्द	शिष्य	श्रम	श्लोक
शिष्ट	शपथ	शाप	शूद्र	श्वास
शृङ्गार	शृगाल	शाव	शावक	शैल
षण्ड	सुर	सप्ताह	सूर्योदय	सूर्यास्त
सूर्यातप	स्वर्ग	स्वप्न	स्वाप	स्वर
सिंह	सर्प	स्कन्ध	सन्तान	सहोदर
समुद्र	सरोवर	सेवक	सायक	समय
सैनिक	सज्जन	स्तव	स्तावक	सुवर्णकार
सूचीकार	सम्मान	सन्देह	संवत्सर	स्वभाव
स्वागतविभाग	संसार	संस्कृतकोष	स्तम्भ	स्तर
स्तूप	स्पन्द	स्पर्श	सम्पर्क	सङ्केत
स्नेह	सुयोग	सर्वोच्चन्यायालय	सन्तोष	समास
सङ्ग्रह	सङ्ग्राम	संक्षेप	संशय	सहाय
समाचार	समाज	सरट	सूद	सर्वकार
समागम	सचिवालय	सम्बन्ध	सङ्कोच	सम्पुट
समर /रम्	समीर	स्फुलिङ्ग /ङ्गम्	सर्षप	हार
हठ	हट्ट	हर्ष	हुङ्कार	हरित
हस्तिप	हल /लम्	ह्रद	ह्रास	हंस

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अग्रदीपः front light. अञ्चलः/लम् border or end (of a garment).
अपातकन्दुकः volley ball.
अध्यादेशः ordinance. आरामः park.
आखेटः hunting. आयोगः commission.
ईक्षणिकः fortune-teller. उच्च/उल्लम्फः high jump.
उदञ्चः pump. उत्तरच्छदः bedsheet.
कटः mat. नलदीपः tube light. पटलदीपः table lamp
कारण्डकः duckling. कटोरः bowl. कुट्टिमः mosaic floor.
कूर्पासः blouse. कुठारः axe. कुद्दालः spade.
कटिबन्धः belt. भोज्यवाहः tiffin carrier. गणः group.
गोधूमः wheat. गुम्फः mustache. गोहः pocket.
गोलक्षेपः shot-put throw. गिरिजालयः church. घनः hammer.
घनक्षेपः hammer throw. चक्रक्षेपः discus throw.
चषकः cup. चायः tea. राजिगर्दभः zebra.
छत्त्राकः mushroom. तरः stroke. तरकः swimmer.
तरणवेषः swimming costume. त्रिलम्फः triple jump.
त्रिकोणः triangle. दिनाङ्कः date. दूरभाषः telephone.
द्रुतचारः fast walking. दोलः bucket. धायः almirah.
धूममार्गः chimney. निधायः shelf. निकर्तः stencil.
निगः plug. पुस्तप्रेषः book-post. प्रलम्फः long jump.
प्रासक्षेपः javelin throw. पादच्छदः socks. प्रच्छदः wrapper.
पटलच्छदः table cloth. परिवेष्टः parcel. प्रेषावाहकः post-man.
पक्षः side. विपक्षः opposite side. पादकन्दुकः football.
पृष्ठतरः back stroke. पादयामः pyjama. फलपाकः jam.
भीमवानरः gorilla. मार्गदीपः street-lamp.
मण्डलाधीशः district magistrate. यष्टिकन्दुकः hockey.
माप/अङ्करेखकः scale. रेखकः ruler.
रक्षिकः (रक्षिपुरुषः) police man. रज्जुकर्षः tug of war.
रक्षाप्लवः life-boat. लेखाधारः desk. लानकः tennis player.
विद्युत्कन्दः bulb. वाग्गुदः bat (animal). वागोलः baloon.
वल्लः (cricket) bat. वक्षस्तरः breast stroke. शिशुमारः dolphin.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

श्लेषः glue. शिक्यकन्दुकः basket ball. शकलादः salad.
शयनच्छदः bed cover. शिंशुकतरः dolphin stroke.
सुरङ्गः tunnel. समुद्रकाकः sea gull. संयावः halwa.
स्वफेनः soap. सृपः slide. स्वजः clip. हस्तपः glove.

अभ्यासाः

१. एषु शब्देषु के तव भाषायां सन्ति के च न सन्ति ? तेषां सूचीं कुरु ।

२. वृक्ष-शाक-पशु-पक्षि-मानव-वाचकशब्दानां पृथक् पृथक् सूचीं कुरु ।

३. उपरिस्थशब्दसङ्ग्रहे प्रत्यक्षरं प्रदत्ताः शब्दाः कोषरीत्या अनुक्रमबद्धाः न सन्ति । तान् व्यवस्थापयितुं शक्नोषि किम् ?

४. एकेन एव शब्देन (यथा—गणेश, श्रीकृष्ण, आश्रम इत्यादि) अस्माभिः बहूनि वाक्यानि रचितानि । तथैव एतैः शब्दैः वाक्यानि रच्यन्ते चेत् कियन्ति भविष्यन्ति ! अपि कल्पयितुं शक्नोषि ?—एषु शब्देषु स्वाभीष्ट-शब्दैः वाक्यानि रचय ।

५. उपर्युक्तशब्दान् विहाय कान् अकारान्त-व्यावहारिक-पुंलिङ्गशब्दान् त्वं जानासि ? तेषां सूचीम् अक्षरक्रमेण कुरु ।

द्वादशः पाठः

सः

सोऽहमस्मि । सः अहम् अस्मि । तमहं जानामि । तम् अहं जानामि । तेनाहं सृष्टः/ष्टा । तेन अहं सृष्टः/ष्टा । नमस्तस्मै । नमः तस्मै । तस्मादहं जातः/ता । तस्मात् अहं जातः/ता । तस्याहमंशः । तस्य अहम् अंशः । तस्मिन् मम लयः ।

सः एकः एव आसीत् । सः एकलः आसीत् । सः एकलत्वं नारोचयत् । सः स्वस्मात् प्रकृतिमसृजत् । सः द्वौ अभवत् । तौ द्वौ सृष्टिम् अरचयताम्/अकुरुताम् । तौ द्वौ एव जगतां पितरौ । तौ द्वौ अहं नमामि । ताभ्याम् इदं जगत् सृष्टम् । ताभ्यां चराचरं सर्वं व्याप्तम् । नमस्ताभ्यां प्रकृतिपरमेश्वराभ्याम् । स्वं स्वकीयं सर्वं च ताभ्यामहं समर्पयामि । ताभ्याम् अहम् उत्पन्नः/ना । ताभ्यां

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सर्वम् उद्भूतम् । तयोः वयं सन्तानाः । तयोः वयम् अंशाः । तयोः अस्माकं लयः । तयोः अस्माकं निवासः ।

सः 'बहु' अभवत् । सः जीवान् असृजत् । सः ते अभवत् । सः तान् पालयति, पोषयति, वर्धयति संहरति च । सः तैः सह सदा वर्तते । सः तैः सह योगमायया वर्तते । सः तेभ्यः सर्वं ददाति । सः तेभ्यः सर्वं करोति । सः तेभ्यः आत्मदानम् इच्छति । सः तेभ्यः समर्पणम् इच्छति । सः तेषां जनकः/स्रष्टा/पिता । सः तेषां हृदये/हृद्गुहायाम् वर्तते । सः तेषाम् अन्तिमं धाम/श्रेष्ठाश्रय-स्थलम् । सः तेषु विद्यते । सः तेषु आत्मानं क्रमशः प्रकाशयति/प्रकटयति/अभिव्यञ्जयति ।

धनिकः

कोऽपि धनिकः अस्ति । सोऽतीव कृपणः । तस्य द्वौ पुत्रौ । तौ अपि पिता इव कृपणौ । धनिकस्य चत्वारः भृत्याः (सन्ति) । ते अतीव कर्मठाः । ते बहु कार्यं कुर्वन्ति । धनिकः तैः कृषिकार्यं कारयति । सः तैः सह प्रतिदिनं कृषिक्षेत्रं गच्छति । तेन सह तस्य कनिष्ठः पुत्रः अपि तत्र गच्छति । मार्गे धनिकः तं कथां श्रावयति । कदाचित् सः द्वाभ्यां पुत्राभ्यां सह कृषिक्षेत्रं गच्छति । यदा सः ताभ्यां सह कृषिक्षेत्रं गच्छति तदा सः तौ रुचिराम् अप्सरःकथां श्रावयति । किन्तु सः कदापि भृत्यान् कथां न श्रावयति । सः तान् सदा भर्त्सयते । सः एकस्मै भृत्याय प्रतिदिनं पञ्च रूप्यकाणि, अन्यस्मै सार्धपञ्च रूप्यकाणि, अपरस्मै पादोनषड् रूप्यकाणि, इतरस्मै सपादसप्त रूप्यकाणि ददाति । सः द्वाभ्यां भृत्याभ्यां प्रातराशं ददाति । ताभ्यां सः शाकादिकमपि ददाति । अपराभ्यां द्वाभ्यां सः प्रातराशं न ददाति । सः तेभ्यः मध्याह्ने किमपि न ददाति । मध्याह्ने ते सर्वे गृहं गत्वा खादन्ति । धनिकः जनेभ्यः ऋणं ददाति । द्वौ भृत्यौ तस्मात् ऋणं गृहीतवन्तौ । सः ताभ्याम् अधिकं कुसीदं गृह्णाति । सः तेभ्यः सर्वेभ्यः भृत्येभ्यः कुसीदं गृह्णाति । तस्य स्वभावः क्रूरः/निष्ठुरः । तस्य पुत्रयोः स्वभावोऽपि निष्ठुरः । तयोः स्वभावः जनकस्य स्वभावादपि निष्ठुरतरः । परन्तु भृत्यानां स्वभावः सरलः । तेषाम् आचरणं निश्छलम् । धनिके कस्यापि स्नेहः न भवति । तस्मिन् कोऽपि प्रसन्नः न भवति । तस्य पुत्रयोः कोऽपि न स्निह्यति । सर्वे तौ निन्दन्ति । किन्तु तेषु भृत्येषु सर्वे स्निह्यन्ति यतो हि ते सदाचारिणः, कर्मपरायणाः निष्ठावन्तश्च । हे धनिक, त्वं कृपणः मा भव । हे धनिकपुत्रौ, युवां पितृवत् निष्ठुरौ मा भवतम् । हे भृत्याः, यूयं सुखिनः भवत ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सर्वः

सर्वः सर्वं न जानाति । सर्वः सर्वं न बोधति । सर्वेण सर्वं न क्रियते/ज्ञायते । सर्वस्मै सर्वं न दीयते । सर्वस्मात् सर्वं न गृह्यते । सर्वस्य सर्वं न भवति । सर्वस्मिन् सर्वः न स्निह्यति । हे सर्व, तव सर्वस्वं कुत्र ? तत् मह्यं कृपया दर्शय ।

अन्यः कः

अन्यः कोऽपि मम सहायः नास्ति । अन्यं कमपि अहं न जानामि । अन्येन केनापि सह मम सम्बन्धः/सम्पर्कः नास्ति । अन्यस्मै कस्मै अपि अहं न स्पृहयामि । अन्यस्मात् कस्मादपि अहं किमपि न इच्छामि । अन्यस्य कस्यापि अहं न अधमर्णः । अन्यस्मिन् कस्मिन्नपि अहं न आसक्तः । हे मातः, त्वमेव मम सर्वम् । त्वां विना जीवनं मरणोपमम्/मरणतुल्यम् । त्वामेव अहं सर्वभावेन शरणं गच्छामि/प्रपद्ये ।

यः

यः तव/युष्माकं/भवतः/भवतां गुरुदेवः सः ममापि गुरुदेवः । यं त्वं पूजयसि (यूयं पूजयथ/भवान् पूजयति/भवन्तः पूजयन्ति) तम् अहमपि पूजयामि । येन त्वं दीक्षितः/ता तेन अहमपि दीक्षितः/ता । यस्मै त्वम् अत्र वससि/कार्यं करोषि तस्मै अहमपि अत्र वसामि/कार्यं करोमि । यस्मै त्वं सर्वं समर्पयितुकामः/मा तस्मै अहमपि सर्वं समर्पयितुकामः/मा । यस्मात् त्वं योगैश्वर्यं प्राप्स्यसि तस्मात् अहमपि योगैश्वर्यं प्राप्स्यामि । यस्य त्वं शिष्यः/ष्या तस्य अहमपि शिष्यः/ष्या । यस्मिन् तव भक्तिः तस्मिन् ममापि भक्तिः ।

श्रीमाता श्रीअरविन्दश्च मम गुरुदेवौ । तौ परस्परम् अभिन्नौ । तौ एकस्याः मुद्रायाः द्वौ पार्श्वौ इव अविच्छिन्नौ । ईदृशौ यौ मम गुरुदेवौ तौ तवापि गुरुदेवौ । यौ अहं नित्यं प्रणमामि तौ त्वमपि नित्यं प्रणमसि । याभ्याम् अहं पालितः/ता ताभ्यां त्वमपि पालितः/ता । याभ्याम् अहं जीवामि ताभ्यां त्वमपि जीवसि । याभ्याम् अहं सर्वं प्राप्नोमि ताभ्यां त्वमपि सर्वं प्राप्नोषि । ययोः अहं सन्तानः तयोः त्वमपि सन्तानः । ययोः अहं श्रद्दधामि (श्रद्धां करोमि) तयोः त्वमपि श्रद्दधासि ।

येऽत्र वसन्ति ते सर्वे श्रीमातृश्रीअरविन्दयोः भक्ताः, शिष्याः, सन्तानाः अनुयायिनश्च । यान् तौ अत्र सयत्नं पालयतः ते सर्वेऽपि सदैव तदनुवर्तिनः भवेयुः । यैः अत्र श्रीमातृश्रीअरविन्दयोः कार्यं क्रियते तैः फलाकाङ्क्षिभिः/महत्त्वाकाङ्क्षिभिः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

न भाव्यम्, तैः निष्कामकर्मिभिः भाव्यम् । यैः सह तौ सततं तिष्ठतः ते कथम् अन्यमुखाः भवेयुः/अन्यदेवान् भजेयुः । येभ्यः तौ सर्वं कुरुतः/दत्तः/व्यवस्थापयतः ते तौ प्रति सदा कृतज्ञाः तिष्ठेयुः/वर्तेरन् । येभ्यः तौ किमपि न इच्छतः अपि तु येभ्यः सर्वम् अबाधं दत्तः ते किं ताभ्यां सर्वं दातुकामाः, ते किं तौ प्रति सतत कृतज्ञाः ? येषां तौ पितरौ तेषां कस्मात् कुतः वा भयम् । येषु तौ स्निह्यतः ते त्रिकालेऽपि निर्भीकाः/निर्भयाः ।

यस्मिन् सर्वं यतः सर्वं यः सर्वं सर्वतश्च यः ।
यश्च सर्वमयो नित्यं तस्मै सर्वात्मने नमः ॥

ईदृश (प्रातिपदिकम्)

यः श्रीमातुः आदर्शबालकः सः तस्याः अभीष्टैः सद्गुणैः भूषितः भवति । सः धैर्यसाहसोदारता-सहिष्णुता-विनम्रता-सत्यनिष्ठता-प्रफुल्लचित्ततादिगुणैः सम्पन्नः भवति ।

ईदृशः बालकः सर्वेषां प्रियः । ईदृशं बालकं सर्वे वरयन्ति । ईदृशेन बालकेन सह त्वं सदा सङ्गतिं कुरु । ईदृशाय बालकाय सर्वविधं साहाय्यं दातव्यम् । ईदृशात् बालकात् दुर्व्यवहारः स्वप्नेऽपि अकल्पनीयः । ईदृशस्य बालकस्य कोऽपि अप्रियः न भवति । ईदृशे बालके सर्वे स्निह्यन्ति ।

*

ईदृशाः आत्मोन्मुखाः बालकाः अन्यत्र विरलाः । ईदृशः कुटिलः जनः मया कदापि न दृष्टः । कीदृशः सः यः जानन्नपि प्रमादान् कुरुते ? यः यादृशः तेन सह तादृशं व्यवहर्तव्यम् । भवादृशः महानुभावः कथम् इत्थं वदेत् ? एतादृशाः सत्याचाराः बालकाः संस्कृतपठनार्थं योग्याः । युष्मादृशान् सच्चरित्रान्/सद्वृत्तान् छात्रान् प्राप्य शिक्षकः धन्यः । अस्मादृशैः साधकैः स्वचरित्ररूपान्तरं कर्तव्यम् । अत्र कतिपयाः छात्राः संस्कृते श्लोकान् लिखन्ति । अत्र अत्यल्पाः छात्राः संस्कृते भाषितुं न जानन्ति ।

त्वादृशा मादृशा बालास्तादृशाः सन्ति सर्वतः ।
एतादृशास्तु ये बालास्ते हि दुर्लभदर्शनाः ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सर्वनामशब्दाः सङ्ख्याशब्दाश्च पुंलिङ्गे*

प्रथमा विभक्तिः

	एकव०	द्विव०	बहुव०			एकव०	द्विव०	बहुव०
(तद्)	सः	तौ	ते	।	(स्व)	स्वः	स्वौ	स्वे
(एतद्)	एषः	एतौ	एते	।	(उभय)	उभयः	—	उभये
(यद्)	यः	यौ	ये	।	(एक)	एकः	—	—
(किम्)	कः	कौ	के	।	(द्वि)	—	द्वौ	—
(सर्व)	सर्वः	सर्वौ	सर्वे	।	(उभ)	—	उभौ	—
(अन्य)	अन्यः	अन्यौ	अन्ये	।	(त्रि)	—	—	त्रयः
(इदम्)	अयम्	इमौ	इमे	।	(चतुर्)	—	—	चत्वारः
(इतर)	इतरः	इतरौ	इतरे	।	(पञ्च)	—	—	पञ्च
(अपर)	अपरः	अपरौ	अपरे	।	(षष्)	—	—	षट्/ड्
(पूर्व)	पूर्वः	पूर्वौ	पूर्वे	।	(सप्त)	—	—	सप्त

द्वितीया विभक्तिः

एकव०	द्विव०	बहुव०		एकव०	द्विव०	बहुव०
तम्	तौ	तान्	।	स्वम्	स्वौ	स्वान्
एतम्	एतौ	एतान्	।	उभयम्	—	उभयान्
यम्	यौ	यान्	।	एकम्	—	—
कम्	कौ	कान्	।	—	द्वौ	—
सर्वम्	सर्वौ	सर्वान्	।	—	उभौ	—
अन्यम्	अन्यौ	अन्यान्	।	—	—	त्रीन्
इमम्	इमौ	इमान्	।	—	—	चतुरः
इतरम्	इतरौ	इतरान्	।	—	—	पञ्च
अपरम्	अपरौ	अपरान्	।	—	—	षट्/ड्
पूर्वम्	पूर्वौ	पूर्वान्	।	—	—	सप्त

---

* अत्र वैकल्पिकरूपाणि वारितानि सरलतादृष्ट्या ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तृतीया विभक्तिः

एकव०	द्विव०	बहुव०	एकव०	द्विव०	बहुव०
तेन	ताभ्याम्	तैः ।	स्वेन	स्वाभ्याम्	स्वैः
एतेन	एताभ्याम्	एतैः ।	उभयेन	—	उभयैः
येन	याभ्याम्	यैः ।	एकेन	—	—
केन	काभ्याम्	कैः ।	—	द्वाभ्याम्	—
सर्वेण	सर्वाभ्याम्	सर्वैः ।	—	उभाभ्याम्	—
अन्येन	अन्याभ्याम्	अन्यैः ।	—	—	त्रिभिः
अनेन	आभ्याम्	एभिः ।	—	—	चतुर्भिः
इतरेण	इतराभ्याम्	इतरैः ।	—	—	पञ्चभिः
अपरेण	अपराभ्याम्	अपरैः ।	—	—	षड्भिः
पूर्वेण	पूर्वाभ्याम्	पूर्वैः ।	—	—	सप्तभिः

चतुर्थी विभक्तिः

एकव०	द्विव०	बहुव०	एकव०	द्विव०	बहुव०
तस्मै	ताभ्याम्	तेभ्यः ।	स्वस्मै	स्वाभ्याम्	स्वेभ्यः
एतस्मै	एताभ्याम्	एतेभ्यः ।	उभयस्मै	—	उभयेभ्यः
यस्मै	याभ्याम्	येभ्यः ।	एकस्मै	—	—
कस्मै	काभ्याम्	केभ्यः ।	—	द्वभ्याम्	—
सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः ।	—	उभाभ्याम्	—
अन्यस्मै	अन्याभ्याम्	अन्येभ्यः ।	—	—	त्रिभ्यः
अस्मै	आभ्याम्	एभ्यः ।	—	—	चतुर्भ्यः
इतरस्मै	इतराभ्याम्	इतरेभ्यः ।	—	—	पञ्चभ्यः
अपरस्मै	अपराभ्याम्	अपरेभ्यः ।	—	—	षड्भ्यः
पूर्वस्मै	पूर्वाभ्याम्	पूर्वेभ्यः ।	—	—	सप्तभ्यः

पञ्चमी विभक्तिः

एकव०	द्विव०	बहुव०	एकव०	द्विव०	बहुव०
तस्मात्	ताभ्याम्	तेभ्यः ।	स्वस्मात्	स्वाभ्याम्	स्वेभ्यः
एतस्मात्	एताभ्याम्	एतेभ्यः ।	उभयस्मात्	—	उभयेभ्यः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यस्मात्	याभ्याम्	येभ्यः ।	एकस्मात्	—	—
कस्मात्	काभ्याम्	केभ्यः ।	—	द्वाभ्याम्	—
सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः ।	—	उभाभ्याम्	—
अन्यस्मात्	अन्याभ्याम्	अन्येभ्यः ।	—	—	त्रिभ्यः
अस्मात्	आभ्याम्	एभ्यः ।	—	—	चतुर्भ्यः
इतरस्मात्	इतराभ्याम्	इतरेभ्यः ।	—	—	पञ्चभ्यः
अपरस्मात्	अपराभ्याम्	अपरेभ्यः ।	—	—	षड्भ्यः
पूर्वस्मात्	पूर्वाभ्याम्	पूर्वेभ्यः ।	—	—	सप्तभ्यः

षष्ठी विभक्तिः

एकव०	द्विव०	बहुव०	एकव०	द्विव०	बहुव०
तस्य	तयोः	तेषाम् ।	स्वस्य	स्वयोः	स्वेषाम्
एतस्य	एतयोः	एतेषाम् ।	उभयस्य	—	उभयेषाम्
यस्य	ययोः	येषाम् ।	एकस्य	—	—
कस्य	कयोः	केषाम् ।	—	द्वयोः	—
सर्वस्य	सर्वयोः	सर्वेषाम् ।	—	उभयोः	—
अन्यस्य	अन्ययोः	अन्येषाम् ।	—	—	त्रयाणाम्
अस्य	अनयोः	एषाम् ।	—	—	चतुर्णाम्
इतरस्य	इतरयोः	इतरेषाम् ।	—	—	पञ्चानाम्
अपरस्य	अपरयोः	अपरेषाम् ।	—	—	षण्णाम्
पूर्वस्य	पूर्वयोः	पूर्वेषाम् ।	—	—	सप्तानाम्

सप्तमी विभक्तिः

एकव०	द्विव०	बहुव०	एकव०	द्विव०	बहुव०
तस्मिन्	तयोः	तेषु ।	स्वस्मिन्	स्वयोः	स्वेषु
एतस्मिन्	एतयोः	एतेषु ।	उभयस्मिन्	—	उभयेषु
यस्मिन्	ययोः	येषु ।	एकस्मिन्	—	—
कस्मिन्	कयोः	केषु ।	—	द्वयोः	—
सर्वस्मिन्	सर्वयोः	सर्वेषु ।	—	उभयोः	—
अन्यस्मिन्	अन्ययोः	अन्येषु ।	—	—	त्रिषु

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अस्मिन्	अनयोः	एषु ।	—	—	चतुर्षु
इतरस्मिन्	इतरयोः	इतरेषु ।	—	—	पञ्चसु
अपरस्मिन्	अपरयोः	अपरेषु ।	—	—	षट्सु
पूर्वस्मिन्	पूर्वयोः	पूर्वेषु ।	—	—	सप्तसु

इत्थम् अष्टन्, नवन्, दशन्, एकादशन्, द्वादशन्, त्रयोदशन्, चतुर्दशन्, पञ्चदशन्, षोडशन् सप्तदशन्, अष्टादशन्, नवदशन् इत्यासां सर्वासां सङ्ख्यानामपि रूपाणि बोध्यानि । 'कति' इति शब्दस्य रूपाणि 'पञ्च'वत् भवन्ति ।

*

एकः परमेश्वरः अस्ति । अहम् एकमेव परमेश्वरं भजे । एकेन एव परमेश्वरेण व्याप्तं सर्वं चराचरम् । तस्मै एकस्मै परमेश्वराय नमः । एकस्मादेव परमेश्वरात् अखिलं विश्वं जातम् । एकस्यैव परमेश्वरस्य सन्तानाः वयम् । एकस्मिन्नेव परमेश्वरे अस्माकम् अविचला भक्तिः भवतु ।

*

इमौ द्वौ मम पादौ । इमौ द्वौ लौहवत् दृढौ तूलवत् कोमलौ च । यूयम् इमौ द्वौ पादौ पश्यत । अहम् आभ्यां द्वाभ्यां पादाभ्यां चलामि धावामि च । हे चर्मकार, मम आभ्यां द्वाभ्यां पादाभ्यां सुन्दरे पादत्रे निर्माहि/रचय । हे सखे, आभ्यां द्वाभ्यां पादाभ्यां कण्टकं निःसारय कृपया । सर्वदा अनयोः द्वयोः पादयोः रक्षा मया कर्तव्या । अहं रात्रौ अनयोः द्वयोः पादयोः तैलं मर्दयामि । हे पादौ, मार्गधावने युवां कदापि क्लान्तौ न भवतम्, सर्वदा मम साहाय्यं कुरुतम् ।

*

त्रयः लोकाः सन्ति । त्वम् एतान् त्रीन् लोकान् जानासि किम् ? एतैः त्रिभिः लोकैः सह तव सम्बन्धः अस्ति किम् ? अहं तु भूर्लोकः, भुवर्लोकः, स्वर्लोकः इति एभ्यः त्रिभ्यः लोकेभ्यः स्पृहयामि । एभ्यः त्रिभ्यः लोकेभ्यः मयि किमपि अमङ्गलं नापततु इति अहं मातरं प्रार्थये । त्रयाणां लोकानां नामानि अधुना त्वं जानासि न वा ? त्रिषु लोकेषु कस्मिन् लोके त्वं वससि ?

*

चत्वारः वेदाः सन्ति । अहं चतुरः वेदान् पठामि । चतुर्भिः वेदैः सह अहं ब्राह्मणग्रन्थान् अपि पठामि । चतुर्भ्यः वेदेभ्यः मया त्रिंशत् रूप्यकाणि

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

दत्तानि। चतुर्भ्यः वेदेभ्यः अहम् अध्यात्मज्ञानं सर्वाः विद्याः च लभे। अपि त्वं चतुर्णां वेदानां नामानि जानासि ? चतुर्षु वेदेषु मम महती श्रद्धा अस्ति।

*

कन्दर्पस्य **पञ्च** बाणाः[1] सन्ति। अपि त्वमेतान् पञ्च बाणान् जानासि ? एतैः पञ्चभिः बाणैः सः जनान् कामपीडितान्/जर्जरान् करोति। शिवः कामदेवस्य एतेभ्यः पञ्चभ्यः बाणेभ्यः अकुप्यत्। एतेभ्यः पञ्चभ्यः बाणेभ्यः मुक्तिः सदैव मे भूयात्। एतेषां पञ्चानां वाणानां प्रभावः असामान्यः/अप्रतिहतः/दुर्धर्षः। एतेषु पञ्चसु बाणेषु मोहिनी शक्तिः अस्ति।

*

षड् रसाः[2] सन्ति। अहम् एतान् षड् रसान् एकसार्थं कदापि न आस्वादितवान्/वती। एतैः षड्भिः रसैः युक्तं भोजनं कस्य न प्रियम् ? अहम् एतेभ्यः षड्भ्यः रसेभ्यः स्पृहयामि। एतेभ्यः षड्भ्यः रसेभ्यः अहं विविधास्वादान् प्राप्नोमि। एतेषां षण्णां रसानां नामानि कानि ? एतेषु षट्सु रसेषु तव कः रसः प्रियतमः ?

*

सप्त समुद्राः सन्ति। अपि त्वमेतान् सप्त समुद्रान् दृष्टवान्/वती ? एतैः सप्तभिः समुद्रैः पृथिवी परिवेष्टिता। एतेभ्यः सप्तभ्यः समुद्रेभ्यः नमः। एतेभ्यः सप्तभ्यः समुद्रेभ्यः वयं बहुविधानि वस्तूनि प्राप्नुमः। एतेषां सप्तानां समुद्राणां नामानि कानि ? एतेषु सप्तसु समुद्रेषु सर्वत्र नौचालनं न शक्यम्।

—प्रत्येकं सर्वनामशब्दस्य सङ्ख्याशब्दस्य च सर्वासां विभक्तीनां रूपाणि एकत्र लिख।

त्रयोदशः पाठः

फल (प्रातिपदिकम्)

एतत् किं फलम् ? अपि त्वम् एतत् फलम् इच्छसि ? एतेन फलेन तव उदरं पूर्णं भवेत् किम् ? एतस्मै फलाय त्वं स्पृहयसि किम् ? एतस्य विनिमयेन

---

[1]अरविन्दमशोकं च चूतं च नवमल्लिका।
नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः॥

[2] कटु-अम्ल-मधुर-लवण-तिक्त-कषायाः।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

त्वं मह्यं किं प्रतिदास्यसि ? एतस्मात् फलात् कियान् रसः भवेत् ? चपकमितः ? एतस्य फलस्य नाम किम् ? एतस्मिन् फले तव लालसा अस्ति किम् ? हे फल, त्वं तं गच्छ। सः त्वां बहु रोचयते।

जम्बूफलानि पक्वानि पतन्ति विमले जले।
कपिकम्पितशाखाभ्यः श्रूयते ग्लु गुलुक् गुलुक्॥

अन्वयः—पक्वानि जम्बूफलानि कपिकम्पितशाखाभ्यः विमले जले पतन्ति, ग्लु गुलुक् गुलुक् श्रूयते। [कपिना (वानरेण) कम्पिताभ्यः शाखाभ्यः= कपिकम्पितशाखाभ्यः।]

पुण्यस्य फलमिच्छन्ति पुण्यं नेच्छन्ति केचन।
फलं पापस्य नेच्छन्ति पापं कुर्वन्ति यत्नतः॥

अन्वयः अर्थः च—केचन [जनाः] पुण्यस्य फलम् इच्छन्ति [किन्तु] पुण्यं न इच्छन्ति। [ते] पापस्य फलं न इच्छन्ति [किन्तु] पापं यत्नतः (यत्नेन/यत्नपूर्वकं) कुर्वन्ति।

सत्कर्मणः फलं शान्तिः सुखं समृद्धजीवनम्।
व्याधिसन्तापदुःखानि जायन्ते हीनकर्मणः॥

सार्थान्वयः—सत्कर्मणः (सत्कार्यस्य) फलं (परिणामः) शान्तिः, सुखम्, समृद्धजीवनम् (ऐश्वर्यमयजीवनम्)। व्याधिसन्तापदुःखानि (रोगक्लेशकष्टानि) हीनकर्मणः (दुष्कर्मणः/कुकार्यात्) जायन्ते (उद्भवन्ति/उत्पद्यन्ते)।

पत्त्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः॥

अन्वयः अर्थः च—यः [जनः] मे (मह्यम्) पत्त्रम्, पुष्पम्, फलम्, तोयम् (जलम्) भक्त्या (भक्तिपूर्वकम्/भक्तिभावेन) प्रयच्छति (ददाति/अर्पयति) अहं [श्रीकृष्णः] प्रयतात्मनः (शुद्धचित्तस्य निष्कामभक्तस्य तस्य) भक्त्या उपहृतम् (उपहारीकृतम्/उपहाररूपेण दत्तम्/निवेदितम्) तत् (पत्त्रपुष्पादिकम्) अश्नामि (प्रीत्या स्वीकरोमि, उपभुञ्जे)। (भगवान् भक्तिप्रियः इति अनेन सिद्धं स्पष्टं च भवति।)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नेत्र

मम द्वे नेत्रे स्तः। किन्तु शिवस्य त्रीणि नेत्राणि सन्ति। श्रीमातुः पृष्ठतोऽपि एकं नेत्रम् आसीत् इति वयं जानीमः। त्वं मम इमे द्वे उज्ज्वले नेत्रे पश्य। अपि त्वं शिवस्य त्रीणि नेत्राणि दृष्टवान्/दृष्टवती ? अहं द्वाभ्यां नेत्राभ्यां पश्यामि। शिवः त्रिभिः नेत्रैः पश्यति। मम नेत्राभ्याम् उपनेत्रे नावश्यके। शिवस्य नेत्रेभ्यः उपनेत्राणि नावश्यकानि। दुःखितस्य मम नेत्राभ्याम् अश्रूणि निपतन्ति/विगलन्ति। अपि त्वया शिवस्य त्रिभ्यः नेत्रेभ्यः निर्गतः रोषाग्निः दृष्टः ? मम नेत्रयोः दृष्टिशक्तिः तीव्रा। शिवस्य नेत्राणां दीप्तिः प्रोज्ज्वला भीषणा च। मम द्वयोः नेत्रयोः द्वे कनीनिके स्तः। शिवस्य त्रिषु नेत्रेषु तिस्रः कनीनिकाः सन्ति। हे मदीये द्वे नेत्रे, युवां सदा वस्तुसत्यमेव पश्यत। हे शिवस्य त्रीणि नेत्राणि, यूयं सदा मयि कृपादृष्टिं धारयत।

कमल

एतत् कमलम् (अस्ति)। एते कमले (स्तः)। एतानि कमलानि (सन्ति)। कमलं विकसति। कमले विकसतः। कमलानि विकसन्ति। सः/सा कमलं पश्यति। तौ/ते कमले पश्यतः। ते/ताः कमलानि पश्यन्ति। पवनः कमलेन सह क्रीडति। भक्तः कमलेन प्रभुं पूजयति। भक्तौ कमलाभ्यां प्रभुं पूजयतः। भक्ताः कमलैः समाधिं भूषयन्ति। भक्तः कमलाय सरोवरं गच्छति। भक्तौ कमलाभ्यां सरोवरं गच्छतः। भक्ताः कमलेभ्यः सरोवरं गच्छन्ति। मधुमक्षिका कमलात् मधु आहरति। मधुमक्षिके कमलाभ्यां मकरन्दम् आहरतः। मधुमक्षिकाः कमलेभ्यः मधु आहरन्ति। कमलस्य वर्णः अतीव रम्यः। श्वेतकमलस्य नाम पुण्डरीकम्। रक्तकमलस्य नाम कोकनदम्। नीलकमलस्य नाम इन्दीवरम्। अस्य कमलस्य शोभा अनुपमा। अनयोः कमलयोः शोभा अनुपमा। एषां कमलानां शोभा अनुपमा। कमलानां मधु नेत्ररोगस्य औषधम्। कमले अनेके गुणाः सन्ति। अस्मिन् कमले भ्रमरः उपविष्टः। अनयोः कमलयोः भ्रमरौ उपविष्टौ। एषु कमलेषु भ्रमराः उपविष्टाः। हे कमल, धन्यं तव जीवितं यतो हि त्वयि कमला (लक्ष्मीः) वसति। हे श्वेतकमलनीलकमले, युवाम् उच्चतमचैतन्यस्य प्रतीके, सर्वाङ्गपूर्णसौन्दर्यस्य प्रतीके। हे कमलानि, यूयं सत्य-शिव-सुन्दरस्य सङ्कीर्तनाय कविभ्यः कमनीयप्रेरणां प्रदत्त।

Digitization by Hindu-Heritage Foundation of America. HHFA(USA)

कमले कमला शेते हरः शेते हिमालये ।
क्षीराब्धौ च हरिः शेते मन्ये मत्कुणशङ्कया ।।

सार्थान्वयः—कमला (लक्ष्मीः) कमले (पद्मे) शेते (स्वपिति/शयनं करोति), हरः (शिवः/महादेवः) हिमालये शेते, हरिः (विष्णुः) च क्षीराब्धौ (क्षीर-सागरे/दुग्धसिन्धौ) शेते। किमर्थम् ?—मन्ये मत्कुणशङ्कया ! (मत्कुणभयेन/-भयात् इति मे मतिः/विचारः ।) (मत्कुणः—उद्दंशः, रक्तपायी कीटविशेषः) ।

कमल त्वं खलु धन्यं यस्माज्जातः प्रजापतिर्ब्रह्मा ।
सच्छिवसुन्दरमूर्तिर्यस्मिन् नित्यं विराजते लक्ष्मीः ।। (आर्याछन्दः)

अन्वयः—[हे] कमल, त्वं खलु धन्यम् यस्मात् प्रजापतिः ब्रह्मा जातः यस्मिन् च सच्छिवसुन्दरमूर्तिः लक्ष्मीः नित्यं विराजते ।

अर्थः—हे पद्म, तव जन्म ननु सार्थकम् । त्वत्तः एव सृष्टिकर्ता ब्रह्मा उत्पन्नः त्वयि च सत्य-शिव-सुन्दर-मूर्तिः/विग्रहः लक्ष्मीः नित्यं विद्यते/वसति ।

अभ्यासाः

फल (अकारान्त-नपुंसकलिङ्गशब्दः)

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	फलम्	फले	फलानि
सम्बोधनम्	फल	फले	फलानि
द्वितीया	फलम्	फले	फलानि

शेषं 'देव'शब्दवत् ।

पक्व (विशेषणशब्दः नपुंसके)

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	पक्वम्	पक्वे	पक्वानि
सम्बोधनम्	पक्व	पक्वे	पक्वानि
द्वितीया	पक्वम्	पक्वे	पक्वानि

शेषम् 'ईदृश'शब्दवत् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सर्वनामशब्दाः सङ्ख्याशब्दाश्च नपुंसकलिङ्गे

प्रथमा विभक्तिः

	एकव०	द्विव०	बहुव०		एकव०	द्विव०	बहुव०
(तद्)	तत्, तद्	ते	तानि ।	(स्व)	स्वम्	स्वे	स्वानि
(एतद्)	एतत्, एतद्	एते	एतानि ।	(उभय)	उभयम्	—	उभयानि
(यद्)	यत्, यद्	ये	यानि ।	(एक)	एकम्	—	—
(किम्)	किम्	के	कानि ।	(द्वि)	—	द्वे	—
(सर्व)	सर्वम्	सर्वे	सर्वाणि ।	(उभ)	—	उभे	—
(अन्य)	अन्यत्	अन्ये	अन्यानि ।	(त्रि)	—	—	त्रीणि
(इदम्)	इदम्	इमे	इमानि ।	(चतुर्)	—	—	चत्वारि
(इतर)	इतरत्	इतरे	इतराणि ।	(पञ्च)	—	—	पञ्च
(अपर)	अपरम्	अपरे	अपराणि ।	(षष्)	—	—	षट्/ड्
(पूर्व)	पूर्वम्	पूर्वे	पूर्वाणि ।	(सप्त)	—	—	सप्त

द्वितीया प्रथमावत्, शेषं पुंलिङ्गवत् ।

—एषु प्रत्येकशब्दस्य सर्वविभक्तिषु रूपाणि एकत्र लिख ।

*

अकारान्त-नपुंसकलिङ्गशब्दाः

[प्रत्येकशब्दस्य अन्ते मकारं (म्) योजयित्वा पठ्यताम्]

अमृत	अङ्ग	अङ्गन	अञ्जन	अज्ञान
अन्तःकरण	अन्तर	अन्न	अपत्य	अब्ज
अभ्र	अस्त्र	असत्य	अभय	अङ्गुलीयक
अक्षर	आसन	आनन	आर्द्रक	आर्द्रमरीच
आलस्य	आस्तरण	आवरण	आलुक	आम्र
आपनस	आमिष	इन्धन	इन्द्रिय	उदर
उद्यान	उपादान	उपाधान	उपस्थ /स्थः	ऋण
ऋजीष	ऐक्य	औषध	काव्य	काञ्चन
कानन	कारण	कार्य	काष्ठ	कन्दर /रः
कुटीर /रः	कुमुद	कुल	कुसुम	कूल

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कुण्ड	कुण्डल	काण्ड	कुटुम्ब	कम्बल
कज्जल	कटिसूत्र	कङ्कण	कांस्य	कपाट
कादल	कौशेय	कौतुक	क्रीडनक	कबन्ध /न्धः
कुसीद	क्षेत्र	खाद्य	खनित्र	गृह
गेह	गाजर	गरल /लः	गोधन	गौरव
गद्य	गुल्म /ल्मः	गीत	गर्त /र्तः	गोष्ठ
घृत	घोल /लः	चित्त	चिह्न	चक्र
चूर्ण /र्णः	चन्दन	चरण /णः	चातुर्य	चाञ्चल्य
चीर	चलचित्र	चरित्र	चित्र	चिबु(बु)क
छत्र	छिद्र	जल	जाल	जठर /रः
जङ्गल	जतुक	जीवन	ज्ञान	डलक
तृण	तोय	तल /लः	तल्प /ल्पः	ताम्र
तेमन	ताम्बूल	तैल	त्रिकाल	त्रिभुवन
तथ्य	तालक	तीर	तेजपत्र	तट
दिन	दुःख	दुग्ध	दुर्ग	द्रव्य
द्वार	दात्र	दारिद्रय	दल /लः	दैव
धन	ध्यान	धन्याक	धैर्य	नक्षत्र
नगर	नयन	नृत्य	नैपुण्य	नवनीत
निम्बूक	नीर	नाटक	नेपथ्य	निकेतन
पत्त्र	पुष्प	पायस /सः	पात्र	पाप
पाताल	पद	पण्य	पञ्चत्व	पानीय
पञ्जर	पीठ	पिशित	पिधान	पीयूष
पुच्छ /च्छः	पुण्डरीक	पुरीष	पुस्तक	पृष्ठ
प्रभात	पल	पलाल /लः	पित्तल	पद्य
पनस	फल	बल	बीज	बदर
बडिश	भाग्य	भाजन	भोजन	भय
भुवन	भवन	भूगोल	मित्त्र	मांस
मुख	मूल	मूल्य	मेथिकाबीज	मूत्र
मल	मरीच	मूलक	मस्तक	मुकुट
मरकत	मण्डल	मानचित्र	मन्दिर	मस्तिष्क
युद्ध	यौवन	यौतुक	यन्त्र	यान

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

रक्त	रजत	राज्य	रुधिर	रूप
लशु(शू)न /नः	रक्तमरीच	रत्न	रहस्य	रूप्यक
लावण्य	लास्य	लोष्ट /ष्टः	लवण	लवङ्ग
ल(ला)ङ्गल	लाङ्गु(ङ्गू)ल	लक्ष्य	वचन	वन
वल्कल /लः	वसन	व्यसन	व्याकरण	वहित्र
व्रत	वस्त्र	वातायन	विज्ञान	वित्त
वि(बि)ल	विवरण	विष	वृत्त	वृन्त
व्यजन	वा(बा)ष्प	वलय /यः	वर्ष	वीर्य
वेतन	वाताम	विज्ञापन	शस्त्र	श(स)स्य
शास्त्र	शरण	शील	श्रोत्र	शृङ्ग
श्राद्ध	शकट	शिखर /रः	शाक /कः	सुख
सङ्गीत	सामीप्य	साक्ष्य	सादृश्य	सामर्थ्य
साहस	साहित्य	सिंहासन	सोपान	सौन्दर्य
स्मित	स्वर्ण	स्वास्थ्य	सत्त्व	सत्य
स्थान	स्थल	स्नानागार	संस्कृत	स्नान
हास्य	हृदय	हड्ड	हिम	हल

अन्तरायधावनम् hurdles. अग्रपः (pen) cap. अभिघट्यम् plastic.
आलेखनम् drawing. आस्कन्दपञ्चकम् pentathlon.
आस्कन्ददशकम् decathlon. आङ्गिकम् banyan.
आरक्षणम् reservation. ईरित्रम् motor (engine).
उद्घर्षणम् eraser. उपनेत्रे (n.) spectacles. ऊरुकम् shorts.
कापेयम् coffee. कूर्चम् (र्चः) brush. कपिशाकम् cabbage.
करवस्त्रम् handkerchief. कुड्यम् wall. कुड्मम् button.
कर्षित्रम् tractor. क्षेप्यभाण्डम् dustbin.
क्षैतिजदण्डम् horizontal bar. क्षुरफलम् razor blade.
खेलाङ्गनम् play-ground. खनित्रम् pick-axe.
जनित्रम् generator. टङ्कित्रम् type writer. तालकम् lock.
तलिमम् floor. तापमानम् thermometer. तरणम् swimming.
दीर्घधावनम् long distance running. दधिजम् cheese.
दुर्गयानम् jeep. धूलिचयनकम् dust collector.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

परिधावनम् circuit race. पुष्पभाजनम् flower vase.
पटललानम् table tennis. पृष्ठसर्पणम् back crawl.
पादत्रे (n.) sandals. पटलम् table. पयोहिमम् ice-cream.
पुष्पशाकम् cauliflower. प्रियाणम् piano. परिकौतुकम् circus.
पानिलम् tumbler. पिधानम् lid. फालकम् cricket.
भारोत्तोलनम् weight lifting. भाचित्रम् photograph.
भाचित्रकः photographer. भाटकम् rent. भारयानम् lorry.
भाण्डयानम् truck. मण्डलम् district. मार्गधावनम् road race.
मुष्टियुद्धम् boxing. मुखवाद्यम् mouth organ.
मल्लयुद्धम् wrestling. मसीपात्रम् ink-pot. प्रतैलम्, मार्त्तैलम् petrol.
कुतैलम्, मृत्तैलम् kerosine. युतकम् shirt.
युग्मदण्डम्/समान्तरदण्डम् parallel bars. युग्मवलयम् rings.
यात्रा-/प्रवेश-पत्रकम् ticket. रूपित्रम् camera.
रुग्णवाहनम् ambulance. लानक्षेत्रम् tennis ground.
लानम् tennis. लाघवम् agility. लूताजालम् cobweb.
लक्ष्मकम् badge. लेख-/कृष्णफलकम् black board.
लोठचरणम् roller skate. लोठचारः skating. विपक्वकम् biscuit.
वर्षत्रम् rain coat. वल्लनम् batting.
वार्तापत्त्रम्/समाचारपत्त्रम् newspaper. वह्यम् rickshaw.
वृत्तचित्रम् documentary film. वीजनम् fan.
विधेयकम् bill (before passing into law). शिशुयानम् pram.
सर्वयानम् bus. संयानम् train. स्थेशनम् (railway) station.
सुचीरम् ribbon. संवियुत्कम् switch. सर्पणम् crawl.
सेवम् apple. सीवित्रम् sewing machine. स्योतम् bag.
संवेष्टनम् packing. सङ्गणित्रम् computor (machine).
सुखासनम्/सुखासन्दिका armchair. सन्धितम् pickles.
स्वफेनम् soap. सृपम् slide. प्रेषपत्त्रकम् postcard.
आवरकम् envelope. उत्तरपत्त्रकम् reply postcard.
अन्तर्देशीयपत्त्रम् inland letter. धनप्रेषः money order.
पुस्तप्रेषः book-post. देयमूल्यप्रेषः V. P. P.
पञ्जीयितपत्त्रम् registered letter. वितन्तुकम् radio.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ध्वनिवादित्रम् tape recorder. सम्प्रथकम् transistor.
इयम् आकाशवाणी this is All India Radio.
सम्प्रति वार्ताः श्रूयन्ताम् now hear the news.
प्रवाचकः/चिका announcer. द्विचक्रम् bicycle. आरोधः brake.
शृङ्खला chain. पद्दलः pedal. नालः tube. पविः (m.) tyre.
हस्तलः handle. अक्षः axle. घण्टिका bell. प्रकाशः light.
दृतिः (f.) puncture. दृत punctured. स्कुन्दनम् scooter.
नवयोगः repair.

अवधेयम्

(क) एकोन/ऊनशतम्, शतम्, सहस्रम्, अयुतम्, लक्षम् इति एषां रूपाणि विशेषणार्थे नित्यं नपुंसकलिङ्गैकवचने एव भवन्ति । एषां लिङ्गवचनानि न विशेष्याधीनानि । तद्यथा—शतं पुस्तकानि, ग्रन्थाः पुस्तिकाः वा । सः शतं पुस्तकानि, ग्रन्थान् पुस्तिकाः वा पठितवान् । तस्य एतैः शतेन पुस्तकैः, ग्रन्थैः पुस्तिकाभिः वा प्रयोजनं नास्ति इत्यादि ।

किन्तु संज्ञार्थे एषां रूपाणि नपुंसकलिङ्गे सर्वेष्वपि वचनेषु भवन्ति । तद्यथा—पुस्तकानाम् एकं शतम् (१००), द्वे शते (२००), त्रीणि बहूनि वा शतानि ।

(ख) एकाधिकं शतम् (१०१), द्व्यधिकं शतम् (१०२), त्र्यधिकं शतम् (१०३), एकादशाधिकं शतम् (१११), विंशत्यधिकं शतम् (१२०) । द्वे शते, द्विशती, द्विशतम् (२००); त्रीणि शतानि, त्रिशती, त्रिशतम् (३००); चत्वारि शतानि, चतुःशती, चतुःशतम् (४००); पञ्च शतानि, पञ्चशती, पञ्चशतम् (५००); षट् शतानि, षट्शती, षट्शतम् (६००); सप्त शतानि, सप्तशती, सप्तशतम् (७००); अष्ट शतानि, अष्टशती, अष्टशतम् (८००); नव शतानि, नवशती, नवशतम् (९००); दश शतानि, दशशती, दशशतम्, सहस्रम् (१०००); द्वे सहस्रे, द्विसहस्री, द्विसहस्रम् (२०००); त्रीणि सहस्राणि, त्रिसहस्री, त्रिसहस्रम् (३०००); दश सहस्राणि, दशसहस्री, दशसहस्रम् (१००००); दश अयुतानि, दशायुती, दशायुतम्, लक्षम् (१०००००) ।

(ग) संस्कृते द्विवचनं सूचयितुं द्वयम्/द्विकम् बहुवचनं च द्योतयितुं त्रयम्/त्रिकम्, चतुष्टयम्/चतुष्कम्, पञ्चकम्, षट्कम्, सप्तकम्, अष्टकम्, नवकम्,

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

दशकम्, एकादशकम्, विंशतिकम्, त्रिंशत्कम्, षष्टिकम्, शतकम् इत्यादयः सङ्ख्यावाचिशब्दाः विशेष्यपदस्य अन्ते योजयितुं शक्यन्ते। तदा क्रियापदम् एकवचने एव भवति। तद्यथा—यदि तव सकाशे लड्डुकद्वयम् अस्ति तर्हि मह्यं देहि। (अहं लड्डुकद्वयम् इच्छामि। अहं द्वौ लड्डुकौ इच्छामि।)

यदि तव सकाशे कुण्डलिकाद्वयम् अस्ति तर्हि मह्यं देहि। (अहं कुण्डलिकाद्वयम् इच्छामि। अहं द्वे कुण्डलिके इच्छामि।)

यदि एतद् आम्रद्वयं विक्रेतुम् इच्छसि तर्हि मह्यं देहि। (अहम् एतद् आम्रद्वयम् इच्छामि। अहं द्वे आम्रे इच्छामि।)

यदि तव सकाशे वेदचतुष्टयम् अस्ति तर्हि तस्मै देहि। (सः वेदचतुष्टयम् इच्छति। सः चतुरः वेदान् इच्छति।)

यदि तव सकाशे मालाचतुष्टयम् अस्ति तर्हि तस्मै देहि। (सः मालाचतुष्टयम् इच्छति। सः चतस्रः मालाः इच्छति।)

यदि तव सकाशे कुमुदचतुष्टयम् अस्ति तर्हि तस्मै देहि। (सः कुमुदचतुष्टयम् इच्छति। सः चत्वारि कुमुदानि इच्छति।)

अभ्यासाः

वाक्यस्य अर्थं न परिवर्त्य एकवचने लिख—

(क) अपि तव सकाशे चत्वारः वेदाः सन्ति ?
(ख) शिवस्य त्रीणि नेत्राणि सन्ति।
(ग) मम गेहे तिस्रः तर्पिकाः सन्ति।
(घ) मम सञ्चिकायां त्रयः रुचिराः श्लोकाः सन्ति।
(ङ) तस्य सञ्चिकायाम् अष्ट श्लोकाः सन्ति।
(च) रावणस्य दश आननानि आसन्।
(छ) सः इमानि चत्वारि पुस्तकानि पठितुम् इच्छति।
(ज) अहम् एतान् शतं मन्त्रान् कण्ठे धारयितुम् इच्छामि।
(झ) सा एताः विंशतिं कविताः अभ्यसितुम् इच्छति।

तद्यथा (क) अपि तव सकाशे वेदचतुष्टयम्/-चतुष्कम् अस्ति ?
(च) रावणस्य आननदशकम् आसीत्।

FOR SHAIVA STUDIES Pondicherry

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

चतुर्दशः पाठः

वर्तमानकालः (लट्लकारः) (Present tense)

अहं पठामि। आवां पठावः। वयं पठामः।

पठ्—अहं पठामि। अहं संस्कृतं पठामि। अहं संस्कृतं शुद्धं पठामि। अहं संस्कृतं कदापि अशुद्धं न पठामि।

उपरिलिखित-वाक्यानि द्विवचने बहुवचने च लिख। यथा—आवां पठावः।··· वयं पठामः।···

पश्य, एकेन क्रियापदेन वाक्यं कियत् दीर्घं जायते। तद्यथा—

वयं पठामः। वयं वेदमन्त्रान् पठामः। वयं वेदमन्त्रान् उच्चैः पठामः। वयं वेदमन्त्रान् एकसार्थम्, उच्चैः पठामः। वयं वेदमन्त्रान् एकसार्थम्, उच्चैः, समस्वरेण पठामः। वयं वेदमन्त्रान् एकसार्थम्, उच्चैः, समस्वरेण, सुस्पष्टं पठामः। गुरुवारे प्रातः वयं वेदमन्त्रान् एकसार्थम्, उच्चैः, समस्वरेण, सुस्पष्टं पठामः। गुरुवारे प्रातः सपादषड्वादने वयं विद्यालयस्य रङ्गमञ्चे वेदमन्त्रान् एकसार्थम्, उच्चैः, समस्वरेण, सुस्पष्टं पठामः। गुरुवारे प्रातः सपादषड्वादने संस्कृतानुरागिणः/संस्कृतप्रेमिणः संस्कृतभाषिणः आश्रमिकाः वयं विद्यालयस्य रङ्गमञ्चे प्राङ्मुखम् उपविष्टाः श्रीमातरं ध्यात्वा पवित्रान् वेदमन्त्रान् एकसार्थम्, उच्चैः, समस्वरेण, सुस्पष्टं पठामः। ···

वद्—अहं वदामि। अहं सत्यं वदामि। अहं सदा सत्यं वदामि। अहं कदापि असत्यं न वदामि।

लिख्—अहं लिखामि। अहं संस्कृतं लिखामि। अहं संस्कृतं शुद्धं लिखामि। अहं संस्कृतं कदापि अशुद्धं न लिखामि।

धाव्—अहं धावामि। अहं त्रिसहस्रमानं धावामि। अहं त्रिसहस्रमानं द्रुतं धावामि। अहं कदापि मन्दं न धावामि।

खाद्—अहं खादामि। अहं मिष्टान्नं खादामि। अहं मिष्टान्नम् अल्पं खादामि। अहं कदापि मिष्टान्नम् अधिकं न खादामि।

एतानि वाक्यानि द्विवचने बहुवचने च लिख।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अभ्यासाः

पूर्ववत् वाक्यानि रचय—

जप्—मातुः नाम, मन्दम्, उच्चैः न ।

नम्—मातरम्, भक्तिपूर्वकम्, साष्टाङ्गम् ।

हस्—मन्दम्, उच्चैः न ।

क्रीड्—क्रीडाक्षेत्रे, कन्दुकेन ।

खेल्—लानक्षेत्रे, शिक्यकन्दुकेन ।

जल्प्—अधुना बन्धुभिः सह, वर्गे न, अधिकं न ।

यथा—अहं जपामि । अहं मातुः नाम जपामि ।··· अहं जल्पामि । अहम् अधुना बन्धुभिः सह जल्पामि । अहं वर्गे बन्धुभिः सह न जल्पामि । अहम् अधिकं न जल्पामि ।

एतानि वाक्यानि द्विवचने बहुवचने च लिख, अन्यधातुभिः अपि कानिचिद् वाक्यानि रचय । एतानि सर्वाणि वाक्यानि भविष्यत्काले लिख । यथा—(अहं) पठिष्यामि । (आवां) पठिष्यावः । (वयं) पठिष्यामः ।

श्लोकाः

वसामि मातुरङ्केऽहं पठामि संस्कृतं सदा ।
नमामि मातरं मीरां वदामि संस्कृतं मुदा ॥

सार्थान्वयः—अहं मातुः (श्रीमातुः) अङ्के (क्रोडे, तस्याः पावनाश्रमे नित्यसान्निध्ये च) वसामि, सदा (प्रतिदिनम्) संस्कृतं पठामि, मातरं मीरां (श्रीमातरम्) नमामि, मुदा (सानन्दम्) संस्कृतं वदामि ।

वसामि मातस्तव पुण्यपीठे
करोमि कार्यं तव पूजनार्थम् ।
स्मरामि शुद्धे हृदये सदा त्वां
नमामि नित्यं शिरसाऽऽनतोऽहम् ॥ (उपेन्द्रवज्राच्छन्दः)

भावार्थः—हे मातः, अहं तव पुण्यपीठे वसामि, पूजाभावेन तव कार्यं करोमि, शुद्धे हृदये सदा त्वां स्मरामि, नित्यं भक्तिभावेन मस्तकम् अवनमय्य त्वां नमामि ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः ।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥ (गीता १०.२२)

अन्वयसहितः अर्थः—[अहं श्रीकृष्णः] वेदानां [मध्ये] सामवेदः अस्मि, देवानां वासवः (इन्द्रः) अस्मि, इन्द्रियाणां मनः भूतानां (प्राणिनां) च चेतना अस्मि ।

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् ।
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः ॥ (गीता १०.२५)

अन्वयेन सह अर्थः—अहं महर्षीणां भृगुः, गिराम् (वाचाम्, वाक्यानाम्) एकम् अक्षरम् (ॐकारः) अस्मि, यज्ञानां जपयज्ञः, स्थावराणां (स्थितिशीलपदार्थानाम्, अचलवस्तूनाम्) हिमालयः अस्मि ।

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ।
गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥ (गीता १०.२६)

सार्थान्वयः—सर्ववृक्षाणाम् (सर्वेषां वृक्षाणाम्) अश्वत्थः, देवर्षीणाम् (देवाश्च ऋषयश्च इति देवर्षयः तेषाम्) च नारदः, गन्धर्वाणां चित्ररथः, सिद्धानां कपिलः मुनिः (अस्मि) ।

अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च ।
अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ॥ (गीता १०.३३)

सार्थान्वयः—अक्षराणाम् अकारः अस्मि सामासिकस्य च द्वन्द्वः (समासानां द्वन्द्वसमासः) । अहम् एव अक्षयः कालः, अहं विश्वतोमुखः धाता । (अहम् अनन्तमुखः, सर्वव्यापकः धर्ता विधाता च ।)

वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः ।
मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥ (गीता १०.३७)

सार्थान्वयः—वृष्णीनां (वृष्णिवंशीयानाम्, यादवानाम्, यदुवंशीयानाम्) वासुदेवः अस्मि, पाण्डवानां धनञ्जयः (अर्जुनः), मुनीनाम् अपि अहं व्यासः कवीनाम् [च] उशनाः कविः (शुक्राचार्यः) ।

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ।
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ॥ (गीता १८.७३)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सार्थान्वयः—[हे] अच्युत, त्वत्प्रसादात् [मम] मोहः नष्टः, मया स्मृतिः लब्धा (प्राप्ता)। [अहम् अधुना] गतसन्देहः (सन्देहरहितः) स्थितः अस्मि, तव वचनम् (आज्ञां) करिष्ये (करिष्यामि/पालयिष्यामि)।

लोट्लकारः (Imperative mood)

अहं पठानि। आवां पठाव। वयं पठाम।

संप्रश्नः

वद्—(अहं) वाक्यमेकं (वाक्यम्+एकं) वदानि किम्?

पठ्—श्लोकमेकं पठानि किम्?

खाद्—लड्डुकमेकं खादानि किम्?

लिख्—पद्यमेकं लिखानि किम्?

खेल्—तेन सह खेलानि किम्?

अधुना अहं संस्कृतं लिखानि वा पठानि वा वदानि वा?

अधुना अहं किं करवाणि, कुत्र गच्छानि, कं पृच्छानि?

—इमानि वाक्यानि द्विवचने बहुवचने च लिख।

प्रार्थना

हे मातः, प्रसीद, येनाहं संपूर्णं जीवनं त्वत्कार्ये एव यापयानि, त्वामेव स्मराणि, ध्यायानि, अविरतं त्वया एव परिचालितः भवानि, त्वां प्रति सदैव उन्मुखः तिष्ठानि अन्ते च त्वमेव भवानि।

इमम् अनुच्छेदं द्विवचने बहुवचने च लिख। यथा—हे मातः, प्रसीद, येन आवां ......

*

ध्यायानि मातर्हृदि सन्ततं त्वां
पठानि सर्वाः सुकृतीस्त्वदीयाः।
चराणि मार्गे ऋतचिन्मये च
भवानि शश्वत् तव सत्यसूनुः॥*

---

* उपजातिः

इन्द्रवज्रा + उपेन्द्रवज्रा = उपजातिः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अन्वयः अर्थश्च—[हे] मातः, [प्रसीद येन] त्वां हृदि (हृदये) सन्ततं (सततम्, निरन्तरम्) ध्यायानि (तव ध्यानं करवाणि), त्वदीयाः (तव) सर्वाः सुकृतीः (सर्वोत्तमरचनाः) पठानि, ऋतचिन्मये मार्गे च चराणि (सत्यस्य, ऋतस्य दिव्यचेतनायाः च मार्गम् अनुसराणि), शश्वत् (शाश्वतकालाय) तव सत्यसूनुः (सत्यसुतः, सत्पुत्रः) भवानि ।

अभ्यासाः

द्वितीय-तृतीय-चतुर्थ-सप्तम-पाठेषु दत्तानां धातूनां लोट्लकार-उत्तम-पुरुष रूपाणि लिख । यथा—

प्र-नम्—प्रणमानि	प्रणमाव	प्रणमाम
धाव्—धावानि	धावाव	धावाम
निन्द्—निन्दानि	निन्दाव	निन्दाम
आ-नन्द्—आनन्दानि	आनन्दाव	आनन्दाम
उप-हृ—उपहराणि	उपहराव	उपहराम
कथ्—कथयानि	कथयाव	कथयाम
कृ—करवाणि	करवाव	करवाम
अस्—असानि	असाव	असाम

लङ्लकारः [अनद्यतन-भूत(अतीत)-कालः—Imperfect tense]

अहम् अपठम् । आवाम् अपठाव । वयम् अपठाम ।

पठ्—अहम् अपठम् । अहं ह्यः अपठम् । अहं ह्यः श्लोकम् अपठम् । अहं ह्यः रामायणात् श्लोकम् अपठम् । अहं ह्यः रामायणात् श्लोकं सस्वरम् अपठम् । अहं ह्यः भरतेन सह रामायणात् श्लोकं सस्वरम् अपठम् । अहं ह्यः विद्यालये प्रथमान्तरे भरतेन सह रामायणात् श्लोकं सस्वरम् अपठम् ।···

—एतानि वाक्यानि द्विवचने बहुवचने च लिख ।

स्यादिन्द्रवज्रा यदि तौ जगौ गः ।। त, त, ज, ग, ग (५.७) ।।
(गा गा ल गा गा ल ल गा ल गा गा)
उपेन्द्रवज्रा प्रथमे लघौ सा ।। ज, त, ज, ग, ग (५.७) ।।
(ल गा ल गा गा ल ल गा ल गा गा)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

खाद्—अहम् अखादम् । अहं भोजनालये अखादम् । अहं भोजनालये दलितकम् अखादम् । अहं भोजनालये सुमिष्टं दलितकम् अखादम् । अहं भोजनालये गुड-दुग्ध-नारिकेलमिश्रितं सुमधुरं दलितकम् अखादम् । अहं भोजनालये मित्रैः सह गुड-दुग्ध-नारिकेलमिश्रितं सुमधुरं दलितकम् अखादम् । अहं भोजनालये मित्रैः सह गुड-दुग्ध-नारिकेलमिश्रितं सुमधुरं दलितकं सुखेन (ससुखम्/सुखपूर्वकम्) अखादम् ।···

—एतानि वाक्यानि द्विवचने बहुवचने च लिख ।

अभ्यासाः

द्वितीय-तृतीय-चतुर्थ-सप्तम-पाठेषु दत्तानां धातूनां लङ्लकार-उत्तमपुरुष-रूपाणि लिख ।

कतिचित्-सोपसर्ग-धातूनां लङ्लकार-उत्तमपुरुष-रूपाणि अधस्तात् वाचय—

गम्	अगच्छम्	अगच्छाव	अगच्छाम
आ-गम् (आ+अगच्छम्)	आगच्छम्	आगच्छाव	आगच्छाम
अनु-गम् (अनु+अगच्छम्)	अन्वगच्छम्	अन्वगच्छाव	अन्वगछाम
प्रति-गम् (प्रति+अगच्छम्)	प्रत्यगच्छम्	प्रत्यगच्छाव	प्रत्यगच्छाम
प्रति-आ-गम् (प्रति+आ+अगच्छम्)	प्रत्यागच्छम्	प्रत्यागच्छाव	प्रत्यागच्छाम
अनु+भू (अनु+अभवम्)	अन्वभवम्	अन्वभवाव	अन्वभवाम
प्र+नम् (प्र+अनमम्)	प्राणमम्	प्राणमाव	प्राणमाम
उद्+तॄ (उद्+अतरम्)	उदतरम्	उदतराव	उदतराम
नि+गद् (नि+अगदम्)	न्यगदम्	न्यगदाव	न्यगदाम
नि+क्षिप् (नि+अक्षिपम्)	न्यक्षिपम्	न्यक्षिपाव	न्यक्षिपाम
नि+पत् (नि+अपतम्)	न्यपतम्	न्यपताव	न्यपताम
नि+वृ १० उ. (नि+अवारयम्)	न्यवारयम्	न्यवारयाव	न्यवारयाम
वि+लप् (वि+अलपम्)	व्यलपम्	व्यलपाव	व्यलपाम
वि+हस् (वि+अहसम्)	व्यहसम्	व्यहसाव	व्यहसाम
वि+चर् (वि+अचरम्)	व्यचरम्	व्यचराव	व्यचराम
वि+हृ (वि+अहरम्)	व्यहरम्	व्यहराव	व्यहराम
प्र+आप् (प्र+आप्नवम्)	प्राप्नवम्	प्राप्नुव	प्राप्नुम

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अवधेयम्

वर्तमानकालस्य रूपेभ्यः परं 'स्म' इति अव्ययं योजयित्वा भूतकालस्य भावः प्रकाशयितुं शक्यते। किन्तु सामान्यतः भूतकाले कस्यापि कार्यस्य सातत्य-(सततता/निरन्तरता) सूचनार्थम् अस्य प्रयोगः/व्यवहारः क्रियते। यथा—

अहम् अधुना संस्कृतं पठामि। अहं बाल्यकालेऽपि संस्कृतं पठामि स्म। अहं बाल्यकाले विद्यालये संस्कृतं पठामि स्म। अहं बाल्यकाले विद्यालये संस्कृतम् उत्साहेन/सोत्साहम्/उत्साहपूर्वकं पठामि स्म। तदाहं संस्कृतात् न दरामि स्म। तदाहं तत् रोचये स्म।

यदाहं क्रीडाक्षेत्रे त्रिसहस्रमानं धावामि स्म तदा मीनार्या मां 'शीघ्रं धाव, वेगेन धाव, द्रुतं धाव' इति भृशम् उत्साहयति स्म। परोह्यः अहं क्रीडाक्षेत्रे धावामि स्म। जितेन्द्रः माम् अनुधावति स्म। यदा सः माम् अतिक्रामति स्म तदनु अहम् अपि तम् अतिक्रामामि स्म। अहं सदा तस्य अग्रे भवामि स्म/धावामि स्म।

—एतानि वाक्यानि द्विवचने वहुवचने च लिख। यथा—अहं पठामि स्म। आवां पठावः स्म। वयं पठामः स्म। ··· (माम् आवाम् अस्मान्)

लृङ्लकारः (क्रियातिपत्त्यर्थकः—unfulfilled/conditional past)

अहम् अपठिष्यम्। आवाम् अपठिष्याव। वयम् अपठिष्याम।

यदा भूतकाले क्रियाद्वयं संपन्नं न भवति तदा अस्य लकारस्य प्रयोगः क्रियते। हेतुहेतुमद्भावयुक्तयोः भविष्यत्कालविषयकक्रिययोः अनिष्पत्तिः (अतिपत्तिः) अस्य लकारस्य विषयः। तद्यथा—

यदि अहं समये स्थेशनम् अगमिष्यं तर्हि संयानम् अवश्यं प्राप्स्यम्। यदि अहं कदाचित् मातुः सकाशम् अगमिष्यं तर्हि तस्याः आशीर्वादान् उपहारान् च अवश्यं प्राप्स्यम्। यदि अहं वाल्यकाले अत्र आगमिष्यं तर्हि बहुषु क्षेत्रेषु प्रगतिम् अकरिष्यम्। यदि अहं भारतस्य प्रधानमन्त्री अभविष्यं तर्हि संस्कृतं सर्वत्र व्यवहारभाषाम् अकारयिष्यम्। यदि अहं शिशुकालात् आश्रमभोजनालये अखादिष्यम् तर्हि कदापि अस्वस्थः न अभविष्यम्। यदि अहं वाल्यकाले पर्याप्तम्, विशुद्धं दुग्धम् अपास्यं घृतं च अखादिष्यं तर्हि अधुना ईदृशः क्षीणः दुर्वलः च न अभविष्यम् अपि तु स्वस्थः, सुपुष्टः सुरूपः च अभविष्यम्। यदि अहम् आ बाल्यात् सर्वाः खेलाः अकरिष्यं तर्हि अधुना तासु सुनिपुणः अभविष्यम्। यदि

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अहं मातरम् आ बाल्यात् अवालोकयिष्यं तर्हि बहुकालपूर्वमेव आश्रमम् आगमिष्यम्। यदि अहम् आ शैशवात् संस्कृतं संस्कृत-माध्यमेन अपठिष्यं तर्हि अधुना तत् अनर्गलम्/धाराप्रवाहम् अवदिष्यम्। यदि अहं त्वां पूर्वम् अज्ञास्यं तर्हि संस्कृतम् अन्यभाषापेक्षया सरलतरम् इति एतत् तथ्यम् अकथयिष्यम्। यदि अहं स्वग्रामे एव अस्थास्यं तर्हि बहुविषयेषु अज्ञः अभविष्यम्।

—एतानि वाक्यानि द्विवचने बहुवचने च लिख। (अवधेयम्—यदि अहं भारतस्य प्रधानमन्त्री अभविष्यं तर्हि......। यदि आवां भारतस्य प्रधानमन्त्री शिक्षामन्त्री च......। यदि वयं भारतस्य प्रधानमन्त्री, शिक्षामन्त्री, राष्ट्रपतिः संसत्सदस्याः च......।)

कतिपयधातूनां लृङ्लकार-उत्तमपुरुष-रूपाणि अधस्तात् दीयन्ते—

गम् (गमिष्यामि)	अगमिष्यम्	अगमिष्याव	अगमिष्याम
पठ् (पठिष्यामि)	अपठिष्यम्	अपठिष्याव	अपठिष्याम
वद् (वदिष्यामि)	अवदिष्यम्	अवदिष्याव	अवदिष्याम
खाद् (खादिष्यामि)	अखादिष्यम्	अखादिष्याव	अखादिष्याम
कथ् (कथयिष्यामि)	अकथयिष्यम्	अकथयिष्याव	अकथयिष्याम
लोक् (लोकयिष्यामि)	अलोकयिष्यम्	अलोकयिष्याव	अलोकयिष्याम
अव-लोक्(अव+अलोकयिष्यम्)	अवालोकयिष्यम्	अवालोकयिष्याव	अवालोकयिष्याम
भू (भविष्यामि)	अभविष्यम्	अभविष्याव	अभविष्याम
कृ (करिष्यामि)	अकरिष्यम्	अकरिष्याव	अकरिष्याम
स्था (स्थास्यामि)	अस्थास्यम्	अस्थास्याव	अस्थास्याम
ज्ञा (ज्ञास्यामि)	अज्ञास्यम्	अज्ञास्याव	अज्ञास्याम
आप् (आप्स्यामि)	आप्स्यम्	आप्स्याव	आप्स्याम
प्र+आप् (प्र+आप्स्यम्)	प्राप्स्यम्	प्राप्स्याव	प्राप्स्याम

अवधेयम्

पठसि, लिखसि, गच्छसि, आगच्छसि, यासि, आयासि, ज्ञास्यसि, स्थास्यसि, पास्यसि, वत्स्यति, शप्स्यति इत्यादिषु

मनसि, वचसि, नामसु, कर्मसु, युवसु, राजसु, आत्मसु, लतासु, मालासु, बालासु, विद्वत्सु, आपत्सु, सुहृत्सु, महत्सु, श्रीमत्सु, धावत्सु, सम्राट्सु (सम्राट्त्सु) इत्यादिषु

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पयःसु/पयस्सु, मनःसु, वक्षःसु इत्यादिषु

शब्दरूपेषु धातुरूपेषु च अ, आ, विसर्गः, त्, प्, ट् इति एभ्यः परः 'स'कारः यथावत् तिष्ठति, तस्य 'ष'कारः न भवति । अन्यवर्णेभ्यः परस्य सकारस्य 'ष'कारः भवति । तद्यथा—

करोषि, शृणोषि, पठिष्यति, गमिष्यामि इत्यादि ।

मुनिषु, कविषु, मतिषु, नदीषु, ज्ञानिषु, साधुषु, धेनुषु, वधूषु, नरेषु, देवेषु, गोषु, वाक्षु, वणिक्षु, आशीःषु/आशीष्षु, धनुःषु/धनुष्षु इत्यादि ।

अपदान्तस्य (पदस्य अन्ते न विद्यमानस्य) सकारस्य यः मूर्धन्यः (षकारः) भवति सः इणः (इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ, ह्, य्, व्, र्, ल् इति एभ्यः) कवर्गाच्च परस्य सकारस्यैव भवति इति बोध्यम् ।

इण्कोः ।। पा. ८. ३. ५७ ।।

विध्यर्थे लिङ्लकारः (Potential mood)

अहं पठेयम् । आवां पठेव । वयं पठेम ।

विधि-सम्भावना-औचित्याद्यर्थेषु अस्य लकारस्य उपयोगः भवति । यथा—

अहम् आजीवनम् अत्रैव तिष्ठेयम्, संस्कृतसाहित्यं पठेयम्, आश्रम-भोजनालये खादेयम् आश्रमकार्यं च श्रीमातुः सेवाभावेन कुर्याम् । सुखेषु दुःखेषु च मातरं स्मरेयम्, भजेयं जपेयं च । अहं नियमितं खेलाङ्गने, क्रीडाक्षेत्रे लानक्षेत्रे च खेलेयम्, धावेयं तरणकुण्डे च तरेयम् ।

अहं सदा सत्यं वदेयम्, धर्मं चरेयम्, गुरुजनानाम् उपदेशान् पालयेयम्/अनुसरेयम्/अनुतिष्ठेयम् । अहं कदापि असत्यम्/अनृतं न वदेयम्, अधर्मं न चरेयम्, गुरुजनान् न अवगणयेयम्/अवहेलयेयम्/अवमानयेयम्/अवधीरयेयम्/अवजानीयाम्/तिरस्कुर्याम् । अहं सर्वेषां सदुपदेशान् अवहितेन मनसा शृणुयाम् तान् च जीवने अनुष्ठातुम्/आचरितुं सततं प्रयत्नपरः स्याम् । अहं सदा सत्यं प्रियं च ब्रूयाम्, असत्यम् अप्रियं च कदापि न ब्रूयाम् ।

अहं निर्दिष्ट/नियत-समयात् पञ्चकलापूर्वं विद्यालयं गच्छेयम्, संस्कृतं साधुरूपेण पाठयेयम्, सर्वान् हर्षयेयम्/मोदयेयम्, संस्कृतम् अतीव सरलम् इति प्रतिपादयेयम्/प्रमाणयेयम् । अहं सर्वाः भाषाः बोधेयं कठिनान् प्रश्नान् च उत्तरेयम्/उत्तरयेयम् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अहं मातरं ध्यायेयम्, तस्याः गुणान् स्मरेयं तान् च जीवने प्रकटयेयम्/प्रकाशयेयम्/अभिव्यञ्जयेयम् ।

अहं सर्वेषां दुःखानि हरेयं तेभ्यः सुखानि च यच्छेयम् । अहं कस्माद् अपि न दरेयम्, कदापि न जरेयं भवसागरं च सुखेन तरेयम् ।

अहं सर्वेषां गुणान् प्रशंसेयम्, कमपि न निन्देयम्, कमपि न हिंसेयम्, कस्मै अपि न ईर्ष्येयम् । अहं सदा हसेयम्, कदापि न क्रन्देयम् । अहम् अन्तस्थ-रिपून् जयेयं मातरं च श्रयेयम्/आश्रयेयम् । अहम् आत्मोपलब्धेः आस्पृहां विहाय अन्याः सर्वाः कामनाः त्यजेयं शरदः शतं च जीवेयम् । अहं योगस्य पिच्छिलपथे/-थात् कदापि न स्खलेयम् । अहं सदा प्रोज्ज्वलशिखा इव ज्वलेयम् । अहं मातरम् एव सर्वं प्रार्थयेयं न तु अन्यं कमपि जनम् । यदि अहं कदापि/कदाचित् अचेतनायाः गह्वरे पतेयं तर्हि तस्मात् सज्ञानं सत्वरं च उत्तिष्ठेयम् । अहं सर्वेषां कर्णयोः मातुः वचनामृतं गुञ्जयेयं तेषां दुःखं च वहेयम् । अहं सर्वत्र सत्यम्, शिवं सुन्दरं च पश्येयम्, मातुः श्रीअरविन्दस्य च उपस्थितिम् अनुभवेयम् । अहं तयोः सत्यः सूनुः भवेयम् ।

अहं श्लोकान् शुद्धम्, सरलं ललितं च लिखेयम् । रात्रौ चिरं न भ्रमेयम् । वर्गे न जल्पेयम् । गुरुभोजनं सुखेन जरयेयम्/पचेयम् ।

यदि अहं सायं सप्तवादने आश्रमं न अधिगच्छेयं/प्राप्नुयां तर्हि त्वं तत्र मां न प्रतीक्षेथाः/प्रतीक्षस्व । यदि अहं तुभ्यं दश रूप्यकाणि दद्याम्, त्वं मह्यं कति प्रतिदास्यसि/प्रतिदद्याः ? अपण्डितेषु यदि किमपि वदेयं तर्हि नूनम्/निश्चितम् अपमानितः भवेयम् । यदि अहं संस्कृतं न पठेयं तर्हि नूनं मातरम् अवजानीयाम् । यदि अहं भारतस्य प्रधानमन्त्री भवेयं तर्हि संस्कृतं राष्ट्रभाषापदे प्रतिष्ठापयेयं देशं न पृथिव्याः गुरुस्थानीयं कुर्याम् । यदि अहं प्रातः तव गृहं गच्छेयं तर्हि त्वां तत्र प्राप्नुयां न वा ?

अहम् अधुना कुत्र गच्छेयम्—खेलाङ्गनं वा क्रीडाक्षेत्रं वा ? अहम् अधुना किं खादेयम्—निरामिषं वा सामिषं वा ? अहम् अधुना किं पठेयम्—रामायणं वा महाभारतं वा ?

—एतानि सर्वाणि वाक्यानि द्विवचने बहुवचने च लिख ।

कतिचिद्-विशेषधातूनां विधिलिङि उत्तमपुरुषे रूपाणि—

कृ—	कुर्याम्	कुर्याव	कुर्याम

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

श्रु—	शृणुयाम्	शृणुयाव	शृणुयाम
ज्ञा—	जानीयाम्	जानीयाव	जानीयाम
प्र-आप्—	प्राप्नुयाम्	प्राप्नुयाव	प्राप्नुयाम
दा—	दद्याम्	दद्याव	दद्याम
ब्रू—	ब्रूयाम्	ब्रूयाव	ब्रूयाम
अस्—	स्याम्	स्याव	स्याम

पञ्चदशः पाठः

लट्लकारः (वर्तमानकालः—Present tense)

त्वं पठसि । युवां पठथः । यूयं पठथ ।

त्वं तत्र किं करोषि ?—अहं पठामि । त्वं किं पठसि ?—अहं संस्कृतं पठामि । युवां तत्र किं कुरुथः ?—आवां पठावः । युवां किं पठथः ?—आवां श्लोकं पठावः । यूयं तत्र किं कुरुथ ?—वयं पठामः । यूयं किं पठथ ?—वयं कथां पठामः ।

प्रातः त्वं कदा आश्रमं गच्छसि ?—प्रातः अहं सप्तवादने आश्रमं गच्छामि । प्रातः युवां कदा आश्रमं गच्छथः ?—प्रातः आवां सार्धषड्वादने आश्रमं गच्छावः । प्रातः यूयं कदा आश्रमं गच्छथ ?—प्रातः वयं सपादषड्वादने आश्रमं गच्छामः ।

अपि त्वम् वर्गे उच्चैः हससि जल्पसि च ?—न आर्य, अहम् उच्चैः न हसामि न च जल्पामि । अपि युवां वर्गे उच्चैः हसथः जल्पथः च ?—न आर्य, आवाम् उच्चैः न हसावः न च जल्पावः । अपि यूयं वर्गे उच्चैः हसथ जल्पथ च ? — न आर्य, वयं वर्गे उच्चैः न हसामः न च जल्पामः ।

अभ्यासाः

१. रिक्तस्थानं पूरय उत्तरं च देहि—

(क) त्वं कुत्र खादसि ? कोणगृहे वा भोजनालये वा ?
युवां कुत्र — ? गृहे वा भोज्यापणे वा ?
यूयं कुत्र — ? बन्धुगृहे वा स्वगृहे वा ?

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(ख) त्वं किं वरयसि ? निरामिषं वा सामिषं वा ?
युवां किं — ? शाकाहारं वा मांसाहारं वा ?
यूयं किं — ? सात्त्विकाहारं वा राजसाहारं वा ?

(ग) त्वं कुत्र वससि ? ग्रामे वा नगरे वा ?
युवां कुत्र — ? कुटीरे वा प्रासादे वा ?
यूयं कुत्र — ? भूमितले वा उपरितले वा ?

(घ) सोमवारे त्वं कुत्र खेलसि/क्रीडसि ? लानक्षेत्रे वा क्रीडाक्षेत्रे वा ?
मङ्गलवारे युवां कुत्र — ? खेलाङ्गने वा क्रीडाक्षेत्रे वा ?
बुधवारे यूयं कुत्र — ? दाक्ष्यशालायां वा प्रशालायां वा ?

(ङ) त्वम् अधुना किं श्रोतुम् इच्छसि ? कथां वा श्लोकं वा ?
युवाम् " " " — ? मन्त्रं वा गीतं वा ?
यूयम् " " " — ? वंशीं वा वीणां वा ?

(च) त्वं किं वदसि ? संस्कृतं वा लोकभाषां वा ?
युवां किं — ? तथ्यं वा काल्पनिकं वा ?
यूयं किं — ? भूतं वा भविष्यं वा ?

(छ) त्वम् अत्र सप्ताहे कतिवारम् आगच्छसि ? षड्वारं वा सप्तवारं वा ?
युवाम् अत्र सप्ताहे कतिवारम् — ? " " ?
यूयम् अत्र सप्ताहे कतिवारम् — ? " " ?

२. रिक्तस्थानं पूरय—

अहम् अद्य संस्कृतं पठामि । श्वोऽपि पठिष्यामि । श्वः त्वं किं करिष्यसि ? संस्कृतं पठिष्यसि किम् ?—आम्, श्वोऽहं संस्कृतं पठिष्यामि । श्वः युवां किं करिष्यथः ? संस्कृतं पठिष्यथः किम् ?—आम्, श्वः आवां··· । श्वः यूयं किं करिष्यथ ? संस्कृतं पठिष्यथ किम् ?—आम्,··· ।

❋

त्वमेव मम मातासि देवी भगवती स्वयम् ।
अङ्के ज्योतिर्मये तेऽहं सुधां सेवे सुखी शिशुः ॥

सार्थान्वयः—देवी, स्वयं भगवती त्वम् एव मम माता असि । सुखी शिशुः अहं ते (तव) ज्योतिर्मये अङ्के (क्रोडे) सुधाम् (अमृतं) सेवे (आस्वादयामि) ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ।। (गीता ८.२७)

सार्थान्वय —[हे] कौन्तेय (कुन्तीपुत्र/अर्जुन) [त्वम्] यत् करोषि, यद् अश्नासि (खादसि, भोजनं करोषि), यत् जुहोषि (हवनं/यागं यज्ञं वा करोषि), यत् ददासि (दानं करोषि), यत् तपस्यसि (तपः चरसि/अनुतिष्ठसि/तपसि) तत् [सर्वमेव] मदर्पणं कुरुष्व (मां श्रीकृष्णं प्रति अर्पणं कुरु/मह्यं निवेदय) ।

लोट्लकारः (आज्ञार्थकः—Imperative mood)

त्वं पठ । युवां पठतम् । यूयं पठत ।

अहं प्रतिदिनं संस्कृतं पठामि । त्वमपि प्रतिदिनं संस्कृतं पठ । आवां प्रतिदिनं संस्कृतं पठावः । युवाम् अपि प्रतिदिनं संस्कृतं पठतम् । वयं प्रतिदिनं संस्कृतं पठामः । यूयम् अपि प्रतिदिनं संस्कृतं पठत ।

अभ्यासाः

१. द्विवचने बहुवचने च लिख—

(क) अहं नियतसमये विद्यालयं गच्छामि, भोजनालये खादामि क्रीडाक्षेत्रे च खेलामि । त्वमपि नियतसमये विद्यालयं गच्छ, भोजनालये खाद क्रीडाक्षेत्रे च खेल । आवां.........। युवाम् अपि.........। वयं.........। यूयम् अपि.........।

(ख) अहं सत्यं वदामि, धर्मं चरामि गुरुजनान् च संमानयामि । त्वमपि सत्यं वद, धर्मं चर गुरुजनान् च संमानय । आवां.........

(ग) अहं निरामिषं खादामि । यदि रोचते, त्वमपि निरामिषं खाद ।

(घ) अहं श्रीमातरं स्मरामि, ध्यायामि भजामि च । त्वमपि श्रीमातरं स्मर, ध्याय भज च ।

(ङ) रात्रौ अहं पादोन-दशवादनात् परं समुद्रतीरे न भ्रमामि । त्वमपि रात्रौ पादोन-दशवादनात् परं समुद्रतीरे मा भ्रम ।

(च) अहं कमपि न निन्दामि, कदापि न क्रन्दामि, सदैव हसामि सर्वस्य च सद्गुणान् पश्यामि । त्वमपि कमपि न निन्द, कदापि न क्रन्द, सदैव हस सर्वस्य च सद्गुणान् पश्य ।

Digitization by Hindu-Heritage-Foundation of America, HHFA(USA)

(छ) अहं सदैव आनन्दामि, कमपि न आक्रामामि, प्रहरामि ताडयामि वा। त्वमपि सदैव आनन्द, कमपि न आक्राम, प्रहर ताडय वा।

(ज) अहं सत्पथं न त्यजामि। त्वमपि सत्पथं न त्यज।

(झ) अहं प्रातः सायं च दुग्धं पिबामि। त्वमपि प्रातः सायं च दुग्धं पिब।

(ञ) अहम् एतत् करोमि। त्वमपि एतत् कुरु।
आवाम् एतत् कुर्वः। युवाम् अपि एतत् कुरुतम्।
वयम् एतत् कुर्मः। यूयम् अपि एतत् कुरुत।

श्लोकाः

कुमारोत्तिष्ठ शय्याया आलस्यं मुञ्च सत्वरम्।
मुखं प्रक्षालय स्नानमाचर प्रणम प्रभुम्॥
पाठशालां समं मित्रैर्गच्छ वाचय पुस्तकम्।
एवं समादिशत् पुत्रं तातः पुत्रहिते रतः॥

सार्थान्वयः—[हे] कुमार, सत्वरं (शीघ्रं) शय्यायाः उत्तिष्ठ (शय्यात्यागं कुरु), आलस्यं मुञ्च (त्यज), मुखं प्रक्षालय, स्नानम् आचर (कुरु), प्रभुं प्रणम, मित्रैः समं (सह) पाठशालां गच्छ, पुस्तकं वाचय (पठ)। एवम् (इत्थम्, अनेन प्रकारेण) पुत्रहिते रतः तातः (पुत्रस्य हिताकाङ्क्षी/मङ्गलकामी पिता) पुत्रं समादिशत् (आज्ञापयत्)।

त्यज दुर्जनसंसर्गं भज साधुसमागमम्।
कुरु पुण्यमहोरात्रं स्मर नाम हरेः सदा॥

सार्थान्वयः—[त्वं] दुर्जनसंसर्गं (दुर्जनमेलं/-सङ्गं) त्यज, साधुसमागमं (साधुसङ्गतिं/सत्सङ्गं) भज (सेवस्व, कुरु)। अहोरात्रं (दिवारात्रम्/रात्रिन्दिवम्, रात्रौ च दिने च) पुण्यं कुरु, सदा हरेः नाम स्मर (भज/जप)।

दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम्।
व्याधितस्यौषधिः पथ्यं नीरुजस्य किमौषधैः॥

सार्थान्वयः—[हे] कौन्तेय, दरिद्रान् भर (पालय पोषय च), ईश्वरे (ऐश्वर्यशालिने/धनिकाय) धनं मा प्रयच्छ (न देहि)। औषधिः (औषधं) व्याधितस्य (व्याधियुक्तस्य/रुग्णस्य) पथ्यम् (स्वास्थ्यकरम्), नीरुजस्य (नीरोगस्य) औषधैः किम् [प्रयोजनम्] ?

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

धर्मं चरत माऽधर्मं सत्यं वदत माऽनृतम् ।
दीर्घं पश्यत मा ह्रस्वं परं पश्यत माऽपरम् ॥

सार्थान्वयः—[यूयं] धर्मं चरत (आचरत), मा अधर्मम्, सत्यं वदत, मा अनृतम् (असत्यम्), दीर्घं (दूरं) पश्यत, मा ह्रस्वम् (निकटम्), परं (परतत्त्वं/परमतत्त्वं) पश्यत, मा अपरम् [अवरतत्त्वम्] । यूयं विशाल/व्यापक/प्रसारित-दृष्टयः भवत न तु क्षुद्र/सीमित/सङ्कुचितदृष्टयः । यूयं किञ्चिदेव दूरे न पश्यत, सुदूरभविष्यं प्रति दृक्पातं कुरुत/उच्चलक्ष्ये दृष्टिं निबद्धां कुरुत, तदनुसारेण विचारं कृत्वा निर्णयं कुरुत । यूयं समीक्ष्यकारिणः/दूरदर्शिनः भवत न तु असमीक्ष्यकारिणः/अदूरदर्शिनः ।

तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः
सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनान् ।
मान्यान् मानय विद्विपोऽप्यनुनय प्रख्यापय स्वान् गुणान्
कीर्तिं पालय दुःखिते कुरु दयामेतत् सतां चेष्टितम् ॥

सार्थान्वयः—तृष्णां छिन्धि । (तृष्णायाः/कामनायाः छेदनं कुरु । ताम् उन्मूलय/निर्मूलय/नाशय ।) क्षमां भज (कुरु) (क्षमापरायणः भव) । मदम् (औद्धत्यं/गर्वं) जहि (घातय/विनाशय) । पापे (पापकर्मणि) रतिं (प्रीतिं) मा कृथाः (कुरु) । (पापकार्ये रतः/व्यापृतः मा भव) । सत्यं ब्रूहि (वद) । साधुपदवीम् अनुयाहि । (साधुमार्गम्/सज्जनानां मार्गम् अनुसर ।) विद्वज्जनान् सेवस्व । (विदुषां/ज्ञानिनां सेवां कुरु ।) मान्यान् मानय । (सम्मानयोग्यान् प्रति सम्मानं दर्शय) । विद्विपः (शत्रून्) अपि अनुनय । (शत्रून् अपि स्वस्य अनुकूलतां नय/प्रापय, तान् स्वानुकूलान् कुरु) । स्वान् गुणान् प्रख्यापय (आचरणेन प्रकाशय) । कीर्तिं पालय (कीर्तिशाली/यशस्वी भव) । दुःखिते दयां कुरु ।—एतत् [सर्वं] सतां (सज्जनानां) चेष्टितम् (कर्म) ।

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ (गीता १८.६५)

सार्थान्वयः—त्वं मन्मनाः (मदेकचित्तः), मद्भक्तः (मद्भजनशीलः), मद्याजी (मद्यजनशीलः) भव । मां नमस्कुरु (प्रणम) । [एवम् आचरन् त्वं मत्प्रसादात्] माम् एव एष्यसि (प्राप्स्यसि) । [अत्र सन्देहं/संशयं मा कुरु ।] [अहं] ते (तुभ्यं) सत्यं प्रतिजाने (सत्यप्रतिज्ञां करोमि) [यतो हि] त्वं मे (मम) प्रियः असि ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ।। (गीता १८.६६)

सार्थान्वयः—सर्वधर्मान् परित्यज्य एकं मां [श्रीकृष्णं] शरणं व्रज (गच्छ) । अहं त्वा (त्वां) सर्वपापेभ्यः मोक्षयिष्यामि (मुक्ति दास्यामि/मोक्ष्यामि/मोचयिष्यामि) । मा शुचः (शोकं मा कुरु) ।

वीर्यप्रार्थना

तेजोऽसि तेजो मयि धेहि । —स्वाहा ।
वीर्यमसि वीर्यं मयि धेहि । —स्वाहा ।
बलमसि बलं मयि धेहि । —स्वाहा ।
ओजोऽस्योजो मयि धेहि । —स्वाहा ।
मन्युरसि मन्युं मयि धेहि । —स्वाहा ।
सहोऽसि सहो मयि धेहि । —स्वाहा ।

[त्वं] तेजः असि, मयि तेजः धेहि (धापय/स्थापय/प्रतिष्ठापय) । [हे भगवन्, हे प्रभो,] त्वं तेजःस्वरूपः/तेजस्वी असि । माम् अपि त्वद्रूपं तेजस्विनं कुरु । स्वाहा । एतदर्थम् अहम् आत्मानं तुभ्यं समर्पयामि ।

[त्वं] वीर्यम् असि, मयि वीर्यं धेहि । त्वं वीर्यवान् असि । माम् अपि त्वत्तुल्यं वीर्यवन्तं कुरु । एतदर्थम् अहम् आत्मानं तुभ्यं समर्पयामि ।

[त्वं] बलम् असि, मयि बलं धेहि । त्वं बलवान् असि । माम् अपि त्वत्समं बलवन्तं कुरु । एतदर्थम् अहं त्वां प्रति आत्मसमर्पणं करोमि ।

[त्वं] ओजः असि, मयि ओजः धेहि । त्वम् ओजस्वी असि । माम् अपि त्वत्समानम् ओजस्विनं कुरु । एतदर्थम् अहं तुभ्यम् आत्मनिवेदनं करोमि ।

[त्वं] मन्युः असि, मयि मन्युं धेहि । त्वं मन्युमान्/सज्ञानकोपकारी असि । त्वं कोपसमयेऽपि सचेतनः असि । माम् अपि मन्युमन्तं/सज्ञानकोपकारिणं/कोपसमयेऽपि सचेतनं कुरु । एतदर्थम् अहम् आत्मानं त्वत्पादपद्मे जुहोमि ।

[त्वं] सहः असि, मयि सहः धेहि । त्वं सर्वं सहसे । त्वं परमसहिष्णुः, सहनशक्तियुक्तः असि । माम् अपि परमसहिष्णुम्, सहनशक्तियुक्तं कुरु । एतदर्थम् अहं तुभ्यम् आत्मदानं करोमि ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

लङ्लकारः (अनद्यतन-भूतकालः—Imperfect tense)

त्वम् अपठः । युवाम् अपठतम् । यूयम् अपठत ।

परोह्यः कोणगृहस्य वार्षिकोत्सवः आसीत् ।
अहं तत्र अगच्छम् । अपि त्वम् अगच्छः ?
आवां तत्र अगच्छाव । अपि युवाम् अगच्छतम् ?
वयं तत्र अगच्छाम । अपि यूयम् अगच्छत ?

अभ्यासाः

१. अधोलिखितवाक्यानि द्विवचने बहुवचने च लिख—

(क) परोह्यः सार्धचतुर्वादनेऽहं कोणगृहे आतृप्ति/ससन्तोषम् उदरपूरं च अखादम् । त्वं कदा अखादः ? अपि त्वम् आतृप्ति उदरपूरं च अखादः ?

(ख) अद्य प्रातरहं संस्कृतम् अपठम् । अपि त्वम् अपठः ?

(ग) ह्योऽहं लानक्षेत्रे अखेलम् । अपि त्वम् अखेलः ?

(घ) ह्यः सायम् अहं खेलाङ्गने चलचित्रम् अपश्यम् । किं त्वम् अपि अपश्यः ?

(ङ) गतवारेऽहं कथाम् अकथयम्/अश्रावयम् । किं त्वमपि अकथयः/अश्रावयः ?

(च) गतवारेऽहं श्लोकम् अगायम् । अपि त्वम् अगायः ?

(छ) ह्यः अहम् आश्रमफलके सूचनाम् अपश्यम् । अपि त्वम् अपश्यः ?

२. (क) ह्यः अहं गृहे न आसम् । अपि त्वम् आसीः ?
ह्यः आवां गृहे न आस्व । अपि युवाम् आस्तम् ?
ह्यः वयं गृहे न आस्म । अपि यूयम् आस्त ?

(ख) ह्यः अहं गृहकार्यं किमपि न अकरवम् । अपि त्वम् अकरोः ?
ह्यः आवां गृहकार्यं किमपि न अकुर्व । अपि युवाम् अकुरुतम् ?
ह्यः वयं गृहकार्यं किमपि न अकुर्म । अपि यूयम् अकुरुत ?

लृङ्लकारः (क्रियातिपत्त्यर्थकः—unfulfilled/conditional past)

त्वम् अपठिष्यः । युवाम् अपठिष्यतम् । यूयम् अपठिष्यत ।

यदा भूतकाले क्रियाद्वयं संपन्नं न भवति तदा अस्य लकारस्य प्रयोगः क्रियते । तद्यथा—

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यदि त्वं समये स्थेशनम् अगमिष्यः तर्हि संयानम् अवश्यं प्राप्स्यः। (अस्य अयम् अर्थः—त्वं समये स्थेशनं न अगच्छः संयानं च न प्राप्नोः/यदि त्वं समये स्थेशनं गतः स्याः तर्हि संयानं प्राप्तं स्यात्।)

यदि त्वं बाल्यकाले संस्कृतम् अवदिष्यः तर्हि अधुना भाषणे किमपि काठिन्यं न अभविष्यत्। यदि युवां बाल्यकाले संस्कृतम् अवदिष्यतं तर्हि अधुना भाषणे किमपि काठिन्यं न अभविष्यत्। यदि यूयं बाल्यकाले संस्कृतम् अवदिष्यत तर्हि अधुना भाषणे किमपि काठिन्यं न अभविष्यत्।

अभ्यासाः

१. निम्नलिखितवाक्यानि द्विवचने बहुवचने च लिख—

(क) यदि त्वं शैशवे आश्रमम् आगमिष्यः तर्हि अधुना संस्कृतम् अवश्यम् अवदिष्यः।

(ख) यदि त्वं बाल्यकाले व्यायामं सम्यक् अकरिष्यः तर्हि अधुना तव इयं रुग्णता न अभविष्यत्।

(ग) यदि त्वं किमपि न अकथयिष्यः तर्हि अहमपि किमपि न अकथयिष्यम्।

(घ) यदि ह्यस्त्वं किञ्चिद् बलेन ताम् अताडयिष्यः तर्हि सा वराकी तत्क्षणम् एव रक्तम् अवमिष्यत्।

(ङ) यदि त्वं गतवर्षे संस्कृतम् अपठिष्यः तर्हि अस्मिन् वर्षे संस्कृते आलापः बोधश्च सरलः अभविष्यत्।

(च) यदि त्वं तां न अकथयिष्यः तर्हि सा एतत् न अकरिष्यत्।

(छ) यदि त्वं द्राक्तरम् अगमिष्यः तर्हि रोगमुक्तः अभविष्यः।

विध्यर्थे लिङ्लकारः (Potential mood)

त्वं पठेः। युवां पठेतम्। यूयं पठेत।

त्वं प्रतिदिनं संस्कृतं पठेः। युवां प्रतिदिनं संस्कृतं पठेतम्। यूयं प्रतिदिनं संस्कृतं पठेत।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अभ्यासाः

१. इमानि वाक्यानि द्विवचने बहुवचने च लिख—

(क) त्वं नियमेन अत्र आगच्छेः ।

(ख) त्वं कार्यं कुर्वन्* अपि मातरं स्मरेः ।

(ग) त्वम् आश्रमस्य नियमान् पालयेः/अनुतिष्ठेः/न अवहेलयेः ।

(घ) त्वं विषमेऽपि/सङ्कटेऽपि असत्यं मा वदेः ।

(ङ) त्वं कमपि न निन्देः ।

(च) त्वं श्लोकान् लिखेः/रचयेः/गुम्फेः ।

(छ) त्वं वर्गे उच्चैः न हसेः जल्पेः वा ।

(ज) श्रीमाता सर्वेषु वर्तते इति त्वं सदैव भावयेः/चिन्तयेः ।

२. रिक्तस्थानानि पूरय—

त्वं सत्सङ्गं कुर्याः, कुसङ्गं मा कुर्याः ।
युवां सत्सङ्गं कुर्यातम्, कुसङ्गं मा — ।
यूयं सत्सङ्गं कुर्यात, कुसङ्गं मा — ।

३. इमानि वाक्यानि द्विवचने बहुवचने च लिख—

(क) यदि त्वं नियमेन संस्कृतं पठेः/अभ्यस्येः/अनुशीलयेः तर्हि वर्षेण एकेन संस्कृतं मातृभाषावत् वदेः ।

(ख) यदि त्वम् अधर्मम् आचरेः तर्हि प्रतिपदं सङ्कटे पतेः ।

(ग) यदि त्वम् ईषदपि तां ताडयेः तर्हि दण्डितः भवेः ।

(घ) यदि त्वम् एतद् विषफलं खादेः, तत्कालम् एव मृत्युं गच्छेः ।

(ङ) यदि त्वं मम गृहम् आगच्छेः तर्हि लाभान्वितः भवेः ।

---

* (त्वम्) पुं. कुर्वन्	(युवाम्) कुर्वन्तौ	(यूयम्) कुर्वन्तः
(त्वम्) स्त्री. कुर्वती	(युवाम्) कुर्वत्यौ	(यूयम्) कुर्वत्यः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

षोडशः पाठः

लट्लकारः (वर्तमानकालः—Present tense)

पठति	पठतः	पठन्ति
सः	तौ	ते
एषः	एतौ	एते
अयम्	इमौ	इमे
बालकः	बालकौ	बालकाः
भवान्	भवन्तौ	भवन्तः
सा	ते	ताः
एषा	एते	एताः
इयम्	इमे	इमाः
बालिका	बालिके	बालिकाः
भवती	भवत्यौ	भवत्यः
पठति	पठतः	पठन्ति

पठ्—एषः बालकः संस्कृतं पठति । एषः बालकः श्रीअरविन्दान्ताराष्ट्रियशिक्षाकेन्द्रे संस्कृतं पठति । एषः बालकः श्रीअरविन्दान्ताराष्ट्रियशिक्षाकेन्द्रे राधिकारञ्जनात् संस्कृतं पठति । एषः बालकः श्रीअरविन्दान्ताराष्ट्रियशिक्षाकेन्द्रे राधिकारञ्जनात् सप्ताहे त्रिवारं संस्कृतं पठति ।

—एतानि वाक्यानि द्विवचने बहुवचने च लिख । ततः लिङ्गपरिवर्तनं कृत्वा पुनः लिख । तद्यथा—एषा बालिका···

खेल्—एते बालकाः खेलन्ति । एते बालकाः कन्दुकेन खेलन्ति । एते बालकाः क्रीडाक्षेत्रे कन्दुकेन खेलन्ति । एते बालकाः क्रीडाक्षेत्रे कन्दुकेन सोत्साहं पूर्णमनोयोगेन च खेलन्ति ।

—एतानि वाक्यानि एकवचने द्विवचने च लिख ।

गै—एषा बालिका गायति । एषा बालिका रङ्गमञ्चे गायति । एषा बालिका रङ्गमञ्चे संस्कृतगीतं गायति । एषा बालिका स्वसङ्गिनीभिः सह

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

रङ्गमञ्चे संस्कृतगीतं गायति। एषा बालिका स्वसङ्गिनीभिः सह रङ्गमञ्चे संस्कृतगीतं मधुरं गायति।

—एतानि वाक्यानि द्विवचने बहुवचने च लिख।

आ-गम्—रामचन्द्रस्य पुत्त्रः अद्य आगच्छति। रामचन्द्रस्य पुत्त्रः अद्य भुवनेश्वरात् आगच्छति। रामचन्द्रस्य पुत्त्रः अद्य भुवनेश्वरात् करमण्डलाख्येन संयानेन आगच्छति। रामचन्द्रस्य पुत्त्रः अद्य स्वपरिवारेण सह भुवनेश्वरात् करमण्डलाख्येन संयानेन आगच्छति। रामचन्द्रस्य पुत्त्रः अद्य स्वपरिवारेण सह भुवनेश्वरात् करमण्डलाख्येन संयानेन आश्रमम् आगच्छति।

—एतानि वाक्यानि भविष्यत्काले लिख। 'अद्य' इत्यस्य स्थाने 'श्वः' इति व्यवहर। ··· श्वः आगमिष्यति। ···

वद्—इयं बालिका संस्कृते वदति। इयं बालिका सर्वैः सह संस्कृते वदति। इयं बालिका सर्वैः सह सदा संस्कृते वदति। इयं बालिका विद्यालये गृहे च सर्वैः सह सदा संस्कृते वदति।

—एतानि वाक्यानि द्विवचने वहुवचने च लिख।

दा—सः धनिकः (अस्ति)। सः उदारः (अस्ति)। सः दरिद्रेभ्यः धनं यच्छति। सः स्वार्जितं धनं दरिद्रेभ्यः यच्छति। सः स्वार्जितं धनम् अधिकोषात् अपि आनीय दरिद्रेभ्यः यच्छति।

—एतानि वाक्यानि द्विवचने वहुवचने च लिख।

हृ—गङ्गा पापं हरति। शशी (चन्द्रः) तापं हरति। कल्पतरुः दैन्यं (दीनतां/दारिद्र्यं) हरति। श्रीहरेः कृपा (भगवत्कृपा) पापम्, तापं (सन्तापं) दैन्यं च हरति।

गङ्गा पापं शशी तापं दैन्यं कल्पतरुस्तथा।
पापं तापं च दैन्यं च हरति श्रीहरेः कृपा॥

अग्निः शीतं हरति। रामः कुक्कुरं दण्डेन प्रहरति। एषा बाला नद्याः जलम् आहरति। सः उद्यानात् पुष्पाणि आहरति। सर्पः मूषकं संहरति। शिवः सृष्टिं संहरति। संयमी क्रोधं संहरति। एते बालाः नदीतीरे विहरन्ति (खेलन्ति, भ्रमन्ति)। वैद्यः औषधेन रोगं परिहरति। श्रीमाता अस्माकं दुःखानि परिहरति। आर्याः संस्कृते व्यवहरन्ति स्म। सः एतद् वस्त्रमेव व्यवहरति।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सा इदं पुस्तकं मह्यम् उपहरति । पशवः सिंहाय पशुमेकम् उपहरन्ति स्म । चौरः धनम् अपहरति । मित्रादन्यः कः मां विपदः उद्धरेत् । सः गीतायाः श्लोकमेकम् उद्धरति । 'उद्धरेद् आत्मनात्मानम्' ।

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहार-संहार-विहार-परिहारवत् ॥

उपसर्गयोगेन धातोः अर्थः परिवर्तते । प्र, आ, सम्, वि, परि, वि+अव, उप, अप, उद् इति एतेषाम् उपसर्गाणां योगेन 'हृ'धातोः अर्थः अन्यविधः भवति । तद्यथा—हरति 1P.—takes away. प्रहरति—strikes, beats, attacks. आहरति—fetches, collects. संहरति—destroys. विहरति—roams about, plays. परिहरति—removes. व्यवहरति—uses, deals with. उपहरति—presents. अपहरति—steals. उद्धरति—cites, saves.

अभ्यासाः

सः/सा/भवान्/भवती/ अयं बालकः/इयं बालिका प्रतिदिनं संस्कृतं पठति ।
तौ/ते/भवन्तौ/भवत्यौ/इमौ बालकौ/इमे बालिके प्रतिदिनं संस्कृतं पठतः ।
ते/ताः/भवन्तः/भवत्यः/इमे बालकाः/इमाः बालिकाः प्रतिदिनं संस्कृतं पठन्ति ।

अहं प्रतिदिनं न्यूनतः एकहोरां संस्कृतं पठामि ।
आवां प्रतिदिनं न्यूनतः एकहोरां संस्कृतं पठावः ।
वयं प्रतिदिनं न्यूनतः एकहोरां संस्कृतं पठामः ।
त्वं प्रतिदिनं संस्कृतं पठसि न वा ?
युवां प्रतिदिनं संस्कृतं पठथः न वा ?
यूयं प्रतिदिनं संस्कृतं पठथ न वा ?

सः/सा/भवान्/भवती/अयं साधकः/इयं साधिका
प्रतिदिनं प्रातः विंशत्यधिक-षड्वादने आश्रमं गच्छति ।
तौ/ते/भवन्तौ/भवत्यौ/इमौ साधकौ/इमे साधिके
प्रतिदिनं प्रातः पादोनसप्तवादने आश्रमं गच्छतः ।
ते/ताः/भवन्तः/भवत्यः/इमे साधकाः/इमाः साधिकाः
प्रतिदिनं प्रातः पञ्चाधिकसप्तवादने आश्रमं गच्छन्ति ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सः विद्यालये कार्यं करोति । तौ विद्यालये कार्यं कुरुतः । ते विद्यालये कार्यं कुर्वन्ति ।

१. द्विवचने बहुवचने च लिख—

सः समाधौ श्रीमातरं श्रीअरविन्दं च प्रणमति । अयं साधकः प्रतिदिनं नियमितं श्रीमातरं ध्यायति, स्मरति भजति च । एषा प्रतिदिनं क्रीडाक्षेत्रे खेलति । अयं बालकः नित्यं लानक्षेत्रे धावति । एषः आश्रमभोजनालये खादति । सः/सा/अयं जनः/इयं महिला ग्रामे/नगरे वसति । भवान्/भवती कुत्र वसति ?

❋

यः पठति लिखति पश्यति परिपृच्छति पण्डितानुपासयति ।
तस्य दिवाकरकिरणैर्नलिनीदलमिव विकास्यते बुद्धिः ।। (आर्या)

सार्थान्वयः—यः [जनः] पठति, लिखति, पश्यति, परिपृच्छति (परितः पृच्छति/अनेकदृष्टिभिः पृच्छति), पण्डितान् उपासयति (परिचरति, पण्डितानां सेवां करोति), तस्य दिवाकरकिरणैः (सूर्यकिरणैः) नलिनीदलम् इव (पद्मस्य दलम् इव) बुद्धिः विकास्यते (बुद्धिः विकसिता भवति) ।

वहन्ति वर्षन्ति नदन्ति भान्ति
ध्यायन्ति नृत्यन्ति समाश्वसन्ति ।
नद्यो घना मत्तगजा वनान्ताः
प्रियाविहीनाः शिखिनः प्लवङ्गमाः ।।
(रामायणे किष्किन्धाकाण्डे वर्षाकालवर्णनम्)

नद्यः वहन्ति । घनाः (मेघाः) वर्षन्ति । मत्तगजाः नदन्ति (नादं कुर्वन्ति/वृंहन्ति) । वनान्ताः भान्ति । (वनप्रदेशाः शोभन्ते/शोभां धारयन्ति) । प्रियाविहीनाः [स्व-स्वप्रियां] ध्यायन्ति (चिन्तयन्ति) । शिखिनः (मयूराः) नृत्यन्ति । प्लवङ्गमाः (वानराः) समाश्वसन्ति (सुखेन आश्वसन्ति/सुखनिःश्वासं कुर्वन्ति) ।

रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

इत्थं विचिन्तयति कोशगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार ॥*

रात्रिः आगता । पद्मं निमीलितम् । मधुलोलुपः भ्रमरः पद्मकोशे निवद्धः । तत्रैव स एवं विचारयति—

रात्रिः गमिष्यति । सुप्रभातं भविष्यति । भास्वान् (सूर्यः) उदेष्यति । पङ्कजश्रीः हसिष्यति (पद्मं विकसिष्यति, तस्य शोभा उल्लसिष्यति) । कोशगते द्विरेफे इत्थं विचिन्तयति, हा हन्त हन्त गजः नलिनीम् उज्जहार । (पद्मपुटवद्धः भ्रमरः यदा इत्थं विचारयति स्म तदैव गजः नालेन सह पद्मम् उत्पाटितवान्/उन्मूलितवान् इति कविः दुःखेन सूचयति ।)

लोट्लकारः (आज्ञार्थः—Imperative mood)

सः/सा/भवान्/भवती/अयं बालकः/इयं बालिका पठतु ।
तौ/ते/भवन्तौ/भवत्यौ/इमौ बालकौ/इमे बालिके पठताम् ।
ते/ताः/भवन्तः/भवत्यः/इमे बालकाः/इमाः बालिकाः पठन्तु ।

भवान् अद्य सायम् अस्माकं गृहम् आगच्छतु । कृपया अन्यत्र कुत्रापि न गच्छतु, सङ्गिभिः सह समुद्रतीरे न भ्रमतु । एतत् सम्यक् स्मरतु, कदापि न विस्मरतु । भवान् अद्य रात्रौ अस्माकं गृहे वसतु । तत्रैव खादतु, स्वपितु सुखस्वप्नान् च पश्यतु । तत्रैव पठतु, गृहाभ्यासान् करोतु, लेखान् लिखतु यदा च क्लान्तः (भवतु) तदा मत्तः/मत् रुचिराः कथाः रोचकान् श्लोकान् च शृणोतु, मां रुचिराः कथाः रोचकान् श्लोकान् च श्रावयतु । कृपया तदा मया सह वृथा नैव आलपतु ।

अस्माकं गृहे समयं/कालं वृथा न यापयतु/नयतु/क्षिपतु/अतिवाहयतु । यदि तत्र अन्यः कोऽपि आयातु, तेन सह अधिक न वदतु, तं बहून् प्रश्नान् न पृच्छतु, तं प्रश्नबाणैः मा पीडयतु । तेन सह भद्रम्, शिष्टं संयतं च व्यवहरतु । यदि किमपि ज्ञातव्यं प्रष्टव्यं वा, माम् एव पृच्छतु । अस्तु, अद्य एतावत् एव ।

---

* वसन्ततिलका

उक्ता वसन्ततिलका तभजा जगौ गः ॥ त, भ, ज, ज, ग, ग (८.६) ॥

(गा गा ल गा ल ल ल गा ल ल गा ल गा गा)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(अलमद्य एतावता ।) अधिकः समयः नास्ति । अधुना मत्तः/मत् अधिकस्य आशां न करोतु ।

संस्कृतरसः सुमधुरः । तं पर्याप्तं पिबतु, न जातु तृप्तः भवतु । ज्ञानलाभे अतृप्तिः साधु लक्षणम् । भवतः सर्वविधं मङ्गलं भवतु । भवान् सर्वत्र भद्रं पश्यतु, सदैव सर्वत्र च आनन्दतु ।

भवान् श्रीमात्रे जीवतु । तस्यै स्वं स्वकीयं च सर्वं यच्छतु (ददातु)। तस्यै सकलं कार्यं करोतु, तां प्रति उन्मुखः तिष्ठतु । तस्यै सर्वं समर्पयतु । एतदर्थमेव स्मः वयम् अत्र इति भवान् अन्यान् अपि शिक्षयतु/बोधयतु । किन्तु कुत्रापि अधिकं न जल्पतु । अमृत-मधुर-परिमितवचनैः सर्वान् प्रीणयतु/ (सन्तोषयतु/प्रसादयतु/प्रहर्षयतु/सर्वेषां हर्षं जनयतु ।) मयापि अधिकं जल्पितं चेत् कृपया क्षाम्यतु ।

—एतानि वाक्यानि द्विवचने बहुवचने च लिख । कर्तृपरिवर्तनं कृत्वा इमानि वाक्यानि पुनः लेखितुं शक्यन्ते ।

*

वर्गे कोऽपि उच्चैः न हसतु । अत्र सर्वे मौनं भजन्तु/(नीरवताम् अभ्यस्यन्तु/तूष्णीं तिष्ठन्तु) । अधुना सर्वे उपसंहारवाक्यम् आकर्णयन्तु/शृण्वन्तु । वयं सर्वे संमिल्य तां करुणामयीं मातरं प्रार्थयामः यत् सा अस्मासु प्रसीदतु, अस्माकं संस्कृतज्ञानं वर्धयतु ।

*

ॐ सह नाववतु सह नौ भुनक्तु
सह वीर्यं करवावहै ।
तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥
ॐ शान्तिः शान्तिः शान्तिः ।

(कृष्णयजुर्वेदीयशान्तिपाठः)

शब्दार्थाः— ॐ (ओङ्कारस्वरूपः परमेश्वरः) । सह—समानभावेन, युगपत्, समकालम् । नौ—आवाम् (गुरुं शिष्यं च) । अवतु—रक्षतु । भुनक्तु —पालयतु । वीर्यम्—सामर्थ्यम्, अध्यात्मतेजः । करवावहै—करवाव, कुर्याव । अधीतम्—अधिगता विद्या । तेजस्वि—तेजोमयम्, प्रभावशालि । अस्तु— भवतु । मा—न । विद्विषावहै— विद्वेषं कुर्याव ।

शान्तिः शान्तिः शान्तिः—आध्यात्मिकाऽऽधिभौतिकाऽऽधिदैविकतापशमनं भवतु ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भावार्थः— विद्यायाः आदानप्रदानार्थं समवेतौ आवां परमेश्वरः समकालं समानभावेन च रक्षतु । सः आवयोः उभयोः रक्षां युगपत् करोतु, आवां पालयतु, पोषयतु, वर्धयतु विकासयतु च । विद्यालाभाय लक्ष्यप्राप्तये च आवां समानभावेन सामर्थ्यम् अध्यात्मतेजः च प्राप्नुयाव/लभावहै । अस्माभिः उपलब्धं ज्ञानं तेजस्वि, प्रभावशालि सफलं च भवतु । आवां परस्परं प्रति द्वेषयुक्तौ/द्वेषपरायणौ न भवाव ।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ॥

निरामयाः—नीरोगाः । भद्रम्—मङ्गलम्, शुभम्, श्रेयः । दुःखभाग्—दुःखी ।

स्वस्ति प्रजाभ्यः परिपालयन्तां
न्याय्येन मार्गेण महीं महीशाः ।
गोब्राह्मणेभ्यः शुभमस्तु नित्यं
लोकाः समस्ताः सुखिनो भवन्तु ॥

सार्थान्वयः—प्रजाभ्यः स्वस्ति । (प्रजाभ्यः सुखम्, शान्तिः समृद्धिः च भवतु ।) महीशाः महीं न्याय्येन मार्गेण परिपालयन्ताम् । (पृथिवीपालाः/राजानः पृथिवीं न्याययुक्तमार्गेण परिपालयन्तु ।) गोभ्यः ब्राह्मणेभ्यः च नित्यं शुभम् अस्तु । समस्ताः लोकाः (सर्वे जनाः) सुखिनः भवन्तु ।

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।
देशोऽयं क्षोभरहितो ब्राह्मणाः सन्तु निर्भयाः ॥
अपुत्त्राः पुत्त्रिणः सन्तु पुत्त्रिणः सन्तु पौत्त्रिणः ।
अधनाः सधनाः सन्तु जीवन्तु शरदां शतम् ॥

सार्थान्वयः—पर्जन्यः काले वर्षतु । (मेघः आवश्यकतानुरूपं यथाकालं च वर्षतु । समये वृष्टिः भवतु ।) पृथिवी सस्यशालिनी [भवतु] । अयं देशः क्षोभरहितः (निरातङ्कः निरापत् च) [भवतु] । ब्राह्मणाः निर्भयाः (भयरहिताः/भीतिशून्याः/निर्भीकाः) सन्तु । अपुत्त्राः (पुत्त्रहीनाः) पुत्त्रिणः

सुखी	सुखिनौ	सुखिनः
दुःखी	दुःखिनौ	दुःखिनः
दुःखभाक्/ग्	दुःखभाजौ	दुःखभाजः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(सपुत्त्राः) सन्तु । पुत्त्रिणः पौत्त्रिणः (पौत्त्रवन्तः) सन्तु । अधनाः (धनहीनाः) सधनाः (धनिकाः/धनवन्तः) सन्तु । शरदां शतं जीवन्तु । (सर्वे शतं वर्षाणि जीवन्तु ।)

पौत्त्रः—पुत्त्रस्य पुत्त्रः ।

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ।।

सार्थान्वयः—नीतिनिपुणाः निन्दन्तु यदि वा (अथवा) स्तुवन्तु (स्तुतिं कुर्वन्तु/प्रशंसन्तु), लक्ष्मीः समाविशतु (समन्ततः प्रविशतु/प्राप्नोतु/आगच्छतु), यथेष्टम् (यथेच्छम्) वा गच्छतु, मरणम् अद्यैव वा युगान्तरे वा अस्तु (भवतु), [तथापि] धीराः (ज्ञानिनः) न्याय्यात् पथः (न्यायमार्गात्) पदम् (ईषदपि) न प्रविचलन्ति (प्रस्खलन्ति) । परिस्थितिः या कापि भवतु नाम, धीराः न्यायमार्गं न जातु त्यजन्ति ।

लङ्लकारः (अनद्यतनभूतकालः—Imperfect tense)

सः/सा/भवान्/भवती/अयं बालकः/इयं बालिका अपठत् ।
तौ/ते/भवन्तौ/भवत्यौ/इमौ बालकौ/इमे बालिके अपठताम् ।
ते/ताः/भवन्तः/भवत्यः/इमे बालकाः/इमाः बालिकाः अपठन् ।

ह्यः सायं सः एकहोरां संस्कृतम् अपठत् ।
ह्यः सायं तौ एकहोरां संस्कृतम् अपठताम् ।
ह्यः सायं ते एकहोरां संस्कृतम् अपठन् ।

ह्यः अपराह्णे विद्यालये सपादत्रिवादने त्रीणि संस्कृतनाटकानि अभवन् । प्रथमं नाटकं हास्यरसमयम् अभवत् । द्वितीयं नीतिशिक्षाप्रदम् आसीत् तृतीयं च ज्ञानभक्तिभरितम् ।

अपि सा नाटकं द्रष्टुम् अगच्छत् ?
अपि ते नाटकं द्रष्टुम् अगच्छताम् ?
अपि ताः नाटकं द्रष्टुम् अगच्छन् ?

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अभ्यासाः

१. निम्नाङ्कितवाक्यानि द्विवचने बहुवचने च लिख—

ह्यः अयं बालकः सुन्दरम् अनटत् । ह्यः सः कुत्र अगच्छत् ? किम् अकरोत् ? कुतः विद्यालयं न आगच्छत् ? ह्यः सः मद्रपुर्याम् आसीत् । अयम् आगन्तुकः प्रातः आश्रमम् अगच्छत्, श्रीमातुः श्रीअरविन्दस्य च समाधौ पुष्पाणि आर्पयत् नतजानु प्राणमत् च ।

*

खाद्— सः अखादत् । सः मिष्टान्नम् अखादत् । तेन खादितम् । तेन मिष्टान्नं खादितम् ।

तेन मिष्टान्नं खादितम् ।
तेन पूरिका खादिता ।
तेन रसगोलः खादितः ।

लिख्— सः अलिखत् । सः पद्यम् अलिखत् । तेन लिखितम् । तेन पद्यं लिखितम् ।

तेन पद्यं लिखितम् ।
तेन कविता लिखिता ।
तेन निबन्धः लिखितः ।

पठ्— अहम् अपठम् । अहं स्तोत्रम् अपठम् । मया पठितम् । मया स्तोत्रं पठितम् ।

मया स्तोत्रं पठितम् ।
मया गीता पठिता ।
मया वेदः पठितः ।

स्तोत्रम्	स्तोत्रे	स्तोत्राणि
पठितम्	पठिते	पठितानि
कविता	कविते	कविताः
पठिता	पठिते	पठिताः
वेदः	वेदौ	वेदाः
पठितः	पठितौ	पठिताः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मया स्तोत्रे पठिते ।
मया स्तोत्राणि पठितानि ।
तेन कविते पठिते ।
तेन कविताः पठिताः ।
अपि त्वया इमौ वेदौ पठितौ ?
अपि त्वया इमे वेदाः पठिताः ?

सः अपठत् । तेन पठितम् ।
तौ अपठताम् । ताभ्यां पठितम् ।
ते अपठन् । तैः पठितम् ।

त्वम् अपठः । त्वया पठितम् ।
युवाम् अपठतम् । युवाभ्यां पठितम् ।
यूयम् अपठत । युष्माभिः पठितम् ।

अहम् अपठम् । मया पठितम् ।
आवाम् अपठाव । आवाभ्यां पठितम् ।
वयम् अपठाम । अस्माभिः पठितम् ।

सः तौ ते — तेन ताभ्याम् तैः
एषः एतौ एते — एतेन एताभ्याम् एतैः
बालकः बालकौ बालकाः — बालकेन बालकाभ्याम् बालकैः
अयम् इमौ इमे — अनेन आभ्याम् एभिः
भवान् भवन्तौ भवन्तः — भवता भवद्भ्याम् भवद्भिः

सा ते ताः — तया ताभ्याम् ताभिः
एषा एते एताः — एतया एताभ्याम् एताभिः
बालिका बालिके बालिकाः — बालिकया बालिकाभ्याम् बालिकाभिः
इयम् इमे इमाः — अनया आभ्याम् आभिः
भवती भवत्यौ भवत्यः — भवत्या भवतीभ्याम् भवतीभिः

त्वम् युवाम् यूयम् — त्वया युवाभ्याम् युष्माभिः
अहम् आवाम् वयम् — मया आवाभ्याम् अस्माभिः

तेन/ताभ्याम्/तैः/अनेन बालकेन/आभ्यां बालकाभ्याम्/एभिः बालकैः/भवता/भवद्भ्याम्/भवद्भिः कादलं खादितम्/कादले खादिते/कादलानि खादितानि ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तया/ताभ्याम्/ताभिः/अनया बालिकया/आभ्यां बालिकाभ्याम्/आभिः बालिकाभिः/ भवत्या / भवतीभ्याम् / भवतीभिः रोटिका खादिता / रोटिके खादिते / रोटिकाः खादिताः ।

मया/आवाभ्याम्/अस्माभिः/त्वया/युवाभ्याम्/युष्माभिः लड्डुकः खादितः/लड्डुकौ खादितौ/लड्डुकाः खादिताः ।

अभ्यासाः

१. (क) यदि खाद्—खादित, पठ्—पठित, लिख्—लिखित, पत्—पतित भवेत् तर्हि

अङ्क्, अट्, (परा-अय्) पलाय्, अर्च्, अर्ज्, ईक्ष्, ईर्ष्य्, ऊह्, एध्, कम्प्, काङ्क्ष्, प्रकाश्, कास्, क्रन्द्, क्रीड्, कूर्द्, क्षर्, गद्, गर्ज्, गर्ह्, घट्, चर्, चर्व्, चल्, चुम्ब्, चेष्ट्, जप्, जल्प्, जीव्, जृम्भ्, ज्वल्, तर्ज्, त्वर्, दय्, दल्, ध्वन्, नट्, नद्, आनन्द्, धाव्, निन्द्, पण्, प्रथ्, फल्, फुल्ल्, बाध्, भण्, भास्, भाष्, भिक्ष्, भ्राज्, मील्, मुण्ड्, मुद्, याच्, रक्ष्, राज्, रुच्, लङ्घ्, आलप्, अभिलष्, लज्ज्, वन्द्, वाञ्छ्, वेप्, वेष्ट्, व्यथ्, व्रज्, शङ्क्, शिक्ष्, श्लाघ्, सेव्, स्खल्, स्पन्द्, स्पर्ध्, स्फुट्, स्वन्, स्वाद्, हस्, ह्लाद्, आस्, ईश्, रुद्, विद्, श्वस् (आश्वस्त, विश्वस्त), क्षुध्; तृप्, त्रुट्, लुठ्, उज्झ्, उञ्छ्, मिल्, स्फुर्, हिंस्, अश्, ग्रन्थ् (ग्रन्थित, ग्रथित), मन्थ्, मथ्, मुष्, कथ्, क्षप्, गण्, गुण्, चिन्त्, भक्ष्, पूज्, पाल्, पूर्, भूष्, मार्ज्, मिश्र्, रच्, लक्ष्, आलोच्, वञ्च्, सूच्, निरूप्, मण्ड्, मन्त्र्, भर्त्स्, दण्ड्, पीड्, तर्क् इति एतेषां धातूनां क्तप्रत्ययान्तरूपाणि लिख । किञ्च

(ख) कृ, श्रु, हृ, स्मृ, दृ, वि-आ-पृ, भृ, वृ, सृ, क्री, आश्रि, जि, चि, नी, स्मि, प्री, भी, इ, अधि+इ, ज्ञा, ख्या, ध्मा, स्ना, या, भा, च्यु, भू, प्लु, द्रु, स्रु, धु, नु, रु, स्तु, सू, पू, धू (धूत, धून), घ्रा (घ्रात, घ्राण), क्षि (क्षित, क्षीण), ह्री (ह्रीत, ह्रीण), हु ।

यथा, कृ—कृत । वि-आ-पृ—व्यापृत । अधि+इ—अधीत । हु—हुत ।

(ग) गुप्, लुप्, तप्, त्रप्, शप्, सृप्, तृप्, दीप्, दृप्, जप्, आप्, प्र-आप्, क्षिप्, शक्, कृत्, नृत्, यत्, वृत्, अस्, ग्रस्, त्रस्, ।

यथा, गुप्—गुप्त । दीप्—दीप्त । शक्—शक्त । कृत्—कृत्त । अस्—अस्त ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(घ) गम्, नम्, रम्, यम्, हन्, तन्, मन् । यथा—गम्—गत । हन्—हत ।

(ङ) कृष्, क्रुश्, घृष्, तक्ष्, पुष्, द्विष्, दिश्, स्पृश्, दृश्, क्लिश्, तुष्, दुष्, नश्, रुष्, श्लिष्, जुष्, शिष्, विश्, पिष्, घुष् । यथा—कृष्—कृष्ट । स्पृश्—स्पृष्ट, तक्ष्—तष्ट । पिष्—पिष्ट । घुष्—घुष्ट (घुषित, घोषित) ।

(च) त्यज्, भज्, भुज्, युज्, मुच्, रिच्, सम्पृच् । यथा—त्यज्—त्यक्त । मुच्—मुक्त । सम्पृच्—सम्पृक्त ।

(छ) आक्रम्, क्षम्, भ्रम्, शम्, वम्, क्लम्, दम्, श्रम्, आचम् । यथा—आक्रम्—आक्रान्त । दम्—दान्त । आचम्—आचान्त ।

(ज) बुध् ४आ, वृध्, सिध्, क्रुध्, युध्, राध्, साध्, शुध्, रुध् । यथा—बुध्—बुद्ध । रुध्—रुद्ध ।

(झ) छिद्, भिद्, खिद्, क्लिद्, स्विद्, सद्, पद्, तुद्, नुद् (नुत्त, नुन्न), स्यन्द् । यथा—छिद्—छिन्न । सद्—सन्न । स्यन्द्—स्यन्न । इति एतेषां धातूनां क्तप्रत्ययान्तरूपाणि यथानिर्देशं लिख ।

(ञ) शुभ्—शुभित, शोभित । बुध्—बुधित, बोधित । द्युत्—द्युतित, द्योतित । श्चुत्—श्चुतित, श्चोतित । शुच्—शुचित, शोचित । दह्—दग्ध । दिह्—दिग्ध । दुह्—दुग्ध । स्निह्—स्निग्ध, स्नीढ । गुहं—गूढ । रुह्—रूढ । लिह्—लीढ । दंश्—दष्ट । भ्रंश्—भ्रष्ट । ध्वंस्—ध्वस्त । स्रंस्—स्रस्त । शंस्—शस्त । रञ्ज्—रक्त । सञ्ज्—सक्त । स्वञ्ज्—स्वक्त । आरभ्—आरब्ध । लभ्—लब्ध । लुभ्—लुब्ध । क्षुभ्—क्षुब्ध । स्तम्भ्—स्तब्ध । मुह्—मुग्ध, मूढ । भञ्ज्—भग्न । मस्ज्—मग्न । तॄ—तीर्ण । कॄ—कीर्ण । दॄ—दीर्ण । शॄ—शीर्ण । जॄ—जीर्ण । गॄ—गीर्ण । स्तॄ—स्तीर्ण । वद्—उदित । वप्—उप्त । वस्—उषित । वच्—उक्त । ब्रू—उक्त । वह्—ऊढ । वे—उत । भ्रस्ज्—भृष्ट । प्रच्छ्—पृष्ट । सृज्—सृष्ट । मृज्—मृष्ट । यज्—इष्ट । इष्—इष्ट । मुर्च्छ्—मूर्च्छित । सस्ज्—सज्जित । शी—शयित । डी—डयित, डीन । ष्ठिव्—ष्ठ्यूत । स्था—स्थित । ह्वे—हूत । दा—दत्त । परिमा—परिमित । अस्—भूत । पा—पीत । सह्—सोढ । गाह्—गाढ । जागृ—जागरित । धा—हित । त्रै—त्रात,

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

त्राण । ध्यै—ध्यात । स्वप्—सुप्त । शुष्—शुष्क । व्यध्—विद्ध । नह्—नद्ध । हा—हीन । ली—लीन । श्वि—शून । पॄ—पूर्ण । म्लै—म्लान । ग्लै—ग्लान । शास्—शिष्ट । गै—गीत । सिव्—स्यूत । ग्रह्—गृहीत । जन्—जात । कुप्—कुपित, कोपित । बन्ध्—बद्ध । पच्—पक्व । क्षल्—क्षालित । तड्—ताडित । चुर्—चोरित । चुद्—चोदित । चूर्ण्—चूर्णित ।

२. इमानि वाक्यानि द्विवचने बहुवचने च लिख—

वृक्षात् पत्रं पतितम् । हस्तात् गुटिका पतिता । मस्तकात् केशः पतितः । वृक्षात् फलं पतितम् । आकाशात् उल्का पतिता । निधायात् ग्रन्थः पतितः ।

३. उत्तरं देहि—

अद्य प्रातः त्वया किं कृतम् ? कुत्र गतम् ? किं खादितम् ? किं पठितम् ? किं लिखितम् ? किं शिक्षितम् ? अद्य विद्यालयात् त्वया कदा आगतम् ? कुत्र खेलितम् ? आपणात् त्वया किं क्रीतम् ?

४. क्तप्रत्ययान्तं वाक्यं लिख । यथा, 'अहं विद्यालयम् अगच्छम्'—मया विद्यालयः गतः ।

अपि त्वं प्रातः आश्रमम् अगच्छः ? सः त्रीन् प्रश्नान् अपृच्छत् । अद्याहं वर्गे रुचिरां कथाम् अश्रावयम् । ते इमं बालकं प्रेक्षालये अपश्यन् । रक्षिपुरुषः चौरम् अताडयत् । न्यायाधीशः तम् अदण्डयत् । सः ग्रामम् अगच्छत् । सा नद्याः जलम् आनयत् । मुनिशिष्यौ शकुन्तलां दुष्यन्तप्रासादे अत्यजताम् । सर्वकारः इमां सुग्रीवाज्ञां सर्वत्र अघोषयत् । शिक्षकः तस्य श्लोकौ अशोधयत् । वयं दश तर्पिकाः प्राप्नुम । ते फलानि व्यतरन् । अहं द्वे फले प्राप्नवम् । तौ द्वे तर्पिके अदत्ताम् । अपि भवान् आश्रमे शान्तिं भगवतः उपस्थितिं च अन्वभवत् ?

*

धने येन जितो गर्वो यौवने मन्मथो जितः ।
तेन मानुषसिंहेन जितं किं न महीतले ॥

अन्वयः—येन धने गर्वः जितः, यौवने मन्मथः जितः, तेन मानुषसिंहेन महीतले किं न जितम् !

भावार्थः—धनस्य प्राचुर्येण जनः गर्वी, अहङ्कारी, दुराचारः भवति यौवनकाले च कामासक्तः, रमणीरक्तः । येन जनेन सम्पत्तिकाले गर्वः यौवन-

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

काले च कामदेवः जितः (पराभूतः) तेन पुरुषसिंहेन (नरशार्दूलेन) पृथिव्यां किं न जितम् ? (सर्वं जितम् इति भावः) ।

भोगा न भुक्ता वयमेव भुक्ता-
स्तपो न तप्तं वयमेव तप्ताः ।
कालो न यातो वयमेव याता-
स्तृष्णा न जीर्णा वयमेव जीर्णाः ।।

अन्वयः—भोगाः न भुक्ताः, वयम् एव भुक्ताः । तपः न तप्तम्, वयम् एव तप्ताः । कालः न यातः, वयम् एव याताः । तृष्णा न जीर्णा, वयम् एव जीर्णाः ।

भावार्थः—वयं भोगान् भुञ्ज्महे इतीदं कथनं मिथ्या । यत्सत्यम्, प्रतिक्षणं भोगाः अस्मान् भुञ्जते । भोगनिरताः वयं न जानीमः स्वप्राणापचयम् । तपः अस्माभिः न तप्तम् (तपस्या सम्यक् न साधिता), केवलं नानाविधकष्टक्लेशैः परितप्ताः वयम् । कालः न गच्छति । अनन्तः कालः सदैव विद्यते । वस्तुतः वयम् एव गच्छामः । कालम् अतिक्रमितुम् (अतिगन्तुम्/अत्येतुं) को नु समर्थः ? तृष्णा न जीर्यति (वृद्धा भवति) । सा तु नित्यं तरुणायते । वयम् एव जीर्णाः भवामः ।

*

पठ्	पठित	(पुं)पठितवान्/ (स्त्री)पठितवती
लिख्	लिखित	लिखितवान्/लिखितवती
खाद्	खादित	खादितवान्/खादितवती
गम्	गत	गतवान्/गतवती
कृ	कृत	कृतवान्/कृतवती
दृश्	दृष्ट	दृष्टवान्/दृष्टवती इत्यादि

मया पठितम् । अहं पठितवान् । मया संस्कृतं पठितम् । अहं संस्कृतं पठितवान् । अपि त्वया संस्कृतं पठितम् ? अपि त्वं संस्कृतं पठितवान् ? तेन रामायणं पठितम् । सः रामायणं पठितवान् । अनेन बालकेन महाभारतं पठितम् । अयं बालकः महाभारतं पठितवान् । भवता किं पठितम् ? भवान् किं पठितवान् ? भवत्या किं पठितम् ? भवती किं पठितवती ?

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सः/अयं बालकः/भवान् पठितवान् ।
तौ/इमौ बालकौ/भवन्तौ पठितवन्तौ ।
ते/इमे बालकाः/भवन्तः पठितवन्तः ।

अहम्/त्वम् (पुं)पठितवान्/ (स्त्री)पठितवती ।
आवाम्/युवाम् पठितवन्तौ/पठितवत्यौ ।
वयम्/यूयम् पठितवन्तः/पठितवत्यः ।

सा/इयं बालिका/भवती पठितवती ।
ते/इमे बालिके/भवत्यौ पठितवत्यौ ।
ताः/इमाः बालिकाः/भवत्यः पठितवत्यः ।

अभ्यासाः

१. क्तवतु(तवत्)प्रत्ययान्तवाक्यानि रचय । यथा, मया श्लोकः लिखितः — अहं श्लोकं लिखितवान् ।

मया स्तोत्रं पठितम् । मया ऋग्वेदः संपूर्णं न पठितः । अपि त्वया सर्वे वेदाः पठिताः ? अपि त्वया पुराणानि पठितानि ? ह्यः खेलाङ्गने मया चलचित्रं दृष्टम् । अद्य अस्माभिः बहु कार्यं कृतम् । ताभिः अद्य किमपि न भुक्तम् । तया अद्य दुग्धमपि न पीतम् । अपि युवाभ्यां क्रोधः जितः ? ताभ्यां वाराणसी न गता । युष्माभिः श्रीमातुः आशिषः प्राप्ताः । परमेश्वरेण संसारः सृष्टः । कृषकैः क्षेत्राणि कृष्टानि । आभिः बालिकाभिः त्रिसहस्रमानमितं धावितम् । रावणेन सीता हृता । सीतया रावणः न शप्तः । त्वया किम् उक्तम् ? अनया बालिकया रोचिका कथा कथिता । अनेन बालकेन रुचिरौ श्लोकौ श्रावितौ । मया भगवत्कृपा प्रार्थिता ।

लृङ्लकारः (क्रियातिपत्त्यर्थकः—unfulfilled/conditional past)

सः/सा/भवान्/भवती/अयं जनः/इयं महिला अपठिष्यत् ।
तौ/ते/भवन्तौ/भवत्यौ/इमौ जनौ/इमे महिले अपठिष्यताम् ।
ते/ताः/भवन्तः/भवत्यः/इमे जनाः/इमाः महिलाः अपठिष्यन् ।

यदि संस्कृतशिक्षकः आरम्भात् एव संस्कृतमाध्यमेन संस्कृतम् अपाठयिष्यत् तर्हि संस्कृतभाषणे युष्माकं काठिन्यं न अभविष्यत् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यदि सः शेषजीवनेऽपि आश्रमम् आगमिष्यत् तर्हि नूनं शान्तिं भगवतः उपस्थितिं च अन्वभविष्यत् ।

यदि सा ह्यः अपराह्णे सपादत्रिवादने विद्यालयम् अगमिष्यत् तर्हि त्रीणि सरसानि संस्कृतनाटकानि अद्रक्ष्यत् ।

यदि सः भारतस्य प्रधानमन्त्री अभविष्यत् तर्हि तत्कालमेव संस्कृतं भारतस्य व्यवहारभाषाम् अकरिष्यत् ।

यदि भवती असत्यं न आचरिष्यत् तर्हि दुःखं न प्राप्स्यत् ।

यदि रावणः सीतां न अहरिष्यत् तर्हि रामः रावणं न अमारयिष्यत् ।

— एतानि वाक्यानि द्विवचने बहुवचने च लिख ।

*

जानकीं रावणो नाऽहरिष्यद् यदि
राघवो रावणं नाऽहनिष्यत्तदा ।
कर्म निन्द्यं नरो नाऽचरिष्यद् यदि
भूतलं सङ्कटे नाऽपतिष्यत्तदा ।।*

सार्थान्वयः— यदि रावणः जानकीं (सीतां) न अहरिष्यत् तदा (तर्हि) राघवः (रामः) रावणं न अहनिष्यत् (अमारयिष्यत्) । यदि नरः निन्द्यं कर्म न आचरिष्यत् तदा (तर्हि) भूतलं (पृथिवी) सङ्कटे (विपत्तौ दुःखे च) न अपतिष्यत् ।

विध्यर्थे लिङ्लकारः (Potential mood)

सः/सा/भवान्/भवती/अयं बालकः/इयं बालिका पठेत् ।
तौ/ते/भवन्तौ/भवत्यौ/इमौ बालकौ/इमे बालिके पठेताम् ।
ते/ताः/भवन्तः/भवत्यः/इमे बालकाः/इमाः बालिकाः पठेयुः ।

सः प्रतिदिनं न्यूनतः अर्धहोरां संस्कृतं पठेत् ।
तौ प्रतिदिनं न्यूनतः अर्धहोरां संस्कृतं पठेताम् ।
ते प्रतिदिनं न्यूनतः अर्धहोरां संस्कृतं पठेयुः ।

---

* **स्रग्विणी**

कीर्तितैषा चतूरेफिका स्रग्विणी ।। र, र, र, र (६.६) ।।
(गा ल गा गा ल गा गा ल गा गा ल गा)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अभ्यासाः

१. सा प्रतिदिनम् अवरतः एकहोरां गायेत् एकहोरां च नृत्येत्। संस्कृतशिक्षकः संस्कृतमाध्यमेन एव संस्कृतं पाठयेत्। छात्रः नियमितं वर्गम् आगच्छेत्। सः सत्सङ्गं सत्कार्यं च कुर्यात्।

—एतानि वाक्यानि द्विवचने बहुवचने च लिख।

२. यदि सः आश्रमभोजनालये एव खादेत् तर्हि रुग्णः न भवेत्। यदि सा व्यायामं कुर्यात् तर्हि सबला भवेत्। यदि जनः सरलः स्यात् तर्हि दुःखं न प्राप्नुयात्। यदि सा असत्यम् आचरेत् तर्हि तया सह मम मित्रता न तिष्ठेत्। यदि भवान् आश्रमम् आगच्छेत् तर्हि सुखी भवेत्।

—एतानि वाक्यानि द्विवचने बहुवचने च लिख।

श्लोकाः

दिनान्ते च पिबेद् दुग्धं निशान्ते च पिबेत् पयः।
भोजनान्ते पिबेत्तक्रं किं वैद्येन प्रयोजनम् ॥

सार्थान्वयः—[जनः] दिनान्ते (सायम्) दुग्धं पिबेत् निशान्ते (प्रातः) च पयः (जलं) पिबेत् भोजनस्य अन्ते च तक्रं (मथितं दधि) पिबेत्। [ततः] वैद्येन किं प्रयोजनम्? यदि कोऽपि प्रातः उषःपानं (जलपानं) कुर्यात्, सायं दुग्धं मध्याह्नभोजनात् परं च तक्रं पिबेत् तर्हि तस्य वैद्येन प्रयोजनं न स्यात्।

पाठान्तरम्—भोजनान्ते पिबेत्तक्रं वासरान्ते पयः पिबेत्।
निशान्ते च पिबेद् वारि त्रिभी रोगो न जायते ॥

यावत्स्वस्थमिदं देहं यावन्मृत्युश्च दूरतः।
तावदात्महितं कुर्यात् प्राणान्ते किं करिष्यति ॥

अन्वयः—यावत् इदं देहं स्वस्थं यावत् च मृत्युः दूरतः तावत् [जनः] आत्महितं कुर्यात्। [अन्यथा सः] प्राणान्ते किं करिष्यति?

भावार्थः—यावत्कालं वयं स्वस्थाः (नीरोगाः) यावत्कालं च मृत्युः दूरे वर्तते तावत्कालम् अस्माभिः आत्महितं साधनीयम् अन्यथा प्राणान्ते (प्राणान्तकाले मृत्योः परं च) बहुकष्टक्लेशयातनाः भवेयुः। अतः युवावस्थायाम् एव आत्मकल्याणं कर्तव्यम्, भगवन्मार्गे वर्तितव्यम्।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।।

सार्थान्वयः — [जनः] आत्मना आत्मानम् उद्धरेत्, [सः] आत्मानं न अवसादयेत् (विनाशयेत्, पीडयेत्) । आत्मा एव हि (निश्चिततया) आत्मनः बन्धुः, आत्मा एव आत्मनः रिपुः (शत्रुः) ।

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ।। (गीता, १६.२१)

सार्थान्वय :— कामः, क्रोधः तथा लोभः — इदं नरकस्य त्रिविधं द्वारम् आत्मनः नाशनम् । तस्मात् [मोक्षकामी साधकः] एतत् त्रयं त्यजेत् । (कामः, क्रोधः, लोभः इति एते नरकस्य त्रिविधद्वाररूपाः, आत्मनाशकराः । एतैः त्रिभिः जनः नरकमेव प्रविशेत् । अतः एतत् त्रयं सर्वात्मना त्यक्तव्यम् ।)

तव्यत्, अनीयर्

सः नित्यं संस्कृतं पठेत् । तेन नित्यं संस्कृतं पठनीयम्/पठितव्यम् ।* सा नित्यं रामायणं पठेत् । तया नित्यं रामायणं पठनीयम्/पठितव्यम् । भवान् नित्यं वेदं पठेत् । भवता नित्यं वेदः पठनीयः/पठितव्यः । अहं नित्यं गीतां पठेयम् । मया नित्यं गीता पठनीया/पठितव्या । त्वं नित्यं गीतां पठेः । त्वया नित्यं गीता पठनीया/पठितव्या ।

तेन/ताभ्याम्/तैः/
अनेन बालकेन/आभ्यां बालकाभ्याम्/एभिः बालकैः/
भवता/भवद्भ्याम्/भवद्भिः/
तया/ताभ्याम्/ताभिः/
अनया बालिकया/आभ्यां बालिकाभ्याम्/आभिः बालिकाभिः/
भवत्या/भवतीभ्याम्/भवतीभिः/
मया/आवाभ्याम्/अस्माभिः/
त्वया/युवाभ्याम्/युष्माभिः संस्कृतं पठनीयम्/पठितव्यम् ।
" " " वेदः पठनीयः/पठितव्यः ।
" " " गीता पठनीया/पठितव्या ।

---

* पठनीयम्/पठितव्यम् इति अनयोः कस्यापि एकस्य प्रयोगः कर्तव्यः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"	"	"	आम्रं खादनीयम्/खादितव्यम् ।
"	"	"	आम्रे खादनीये/खादितव्ये ।
"	"	"	आम्राणि खादनीयानि/खादितव्यानि ।
"	"	"	लड्डुकः खादनीयः/खादितव्यः ।
"	"	"	लड्डुकौ खादनीयौ/खादितव्यौ ।
"	"	"	लड्डुकाः खादनीयाः/खादितव्याः ।
"	"	"	पूरिका खादनीया/खादितव्या ।
"	"	"	पूरिके खादनीये/खादितव्ये ।
"	"	"	पूरिकाः खादनीयाः/खादितव्याः ।

अभ्यासाः

१. मया प्रतिदिनं किं किं खादनीयम् ?

मया प्रतिदिनं कादलम्/नारङ्गम्/आम्रम्/नारिकेलम्/नवनीतम्/भक्तम् (अन्नम्)/तिमनम् (व्यञ्जनम्) खादनीयम्/खादितव्यम् ।

मया प्रतिदिनं रसगोलः/ लड्डुकः/ पायसः/ मोहनभोगः/ संयावः/ पर्पटः खादनीयः/खादितव्यः ।

मया प्रतिदिनं रोटिका/पूरिका/कृशरा/आमिक्षा/द्राक्षा/कुण्डलिका/लप्सिका खादनीया/खादितव्या ।

— एतानि वाक्यानि द्विवचने बहुवचने च लिख ।

यथा—मया प्रतिदिनं कादलं खादनीयम्/खादितव्यम् । आवाभ्यां प्रतिदिनं कादले खादनीये/खादितव्ये । अस्माभिः प्रतिदिनं कादलानि खादनीयानि/खादितव्यानि इत्यादि । इमानि वाक्यानि कर्तृपरिवर्तनं कृत्वा पुनरपि लेखितुं शक्यन्ते ।

२. कोष्ठकान्तर्गत-धातूनां तव्यान्तरूपैः अनीयान्तरूपैः च रिक्त-स्थानानि पूरय । यथा—हस्—हसनीय/हसितव्य । कृ—करणीय/कर्तव्य । त्वया वर्गे उच्चैः न हसनीयम्/हसितव्यम् ।

त्वया वर्गे न (जल्प्)—/— । त्वया सदा सत्यं (वद्)—/— । अस्माभिः मातुः कार्यं निष्ठया (कृ)—/— । अस्माभिः प्रतिदिनं नियमेन

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

व्यायामः (कृ)—/—। युष्माभिः रात्रौ दशवादनात् पूर्वं शयनं (कृ)—/—। सर्वैः देशसेवा सन्निष्ठया (कृ)—/—।

३. (क) यदि पठ्—पठनीय/पठितव्य, खाद्—खादनीय/खादितव्य, हस्—हसनीय/हसितव्य भवेत् तर्हि

क्रीड्, खेल्, चल्, चर् (चरणीय), जप्, भ्रम् (भ्रमणीय), जीव्, नन्द्, निन्द्, व्रज्, धाव्, रक्ष् (रक्षणीय), अर्च्, अट्, परि-अट्, गर्ज्, पत्, वाञ्छ्, कूज्, ज्वल्, क्षर्, अव्, वन्द्, लष्, अभि-लष्, हिंस्, ईक्ष्, निर्-ईक्ष्, कम्प्, चेष्ट्, ईह्, एध्, काश्, प्र-काश्, लोक्, अव-लोक्, खन्, क्रम्, आ-क्रम्, ग्रस्, घट्, दल्, भण्, भाष्, भिक्ष्, मील्, नि-मील्, यत्, श्लाघ्, शंस्, प्र-शंस्, शङ्क्, सह् (सोढव्य, सहितव्य), शिक्ष्, याच्, सेव्, शास्, अर्ह्, मन्थ्, जन्, गद्, गर्ह्, अश्, लम्ब्, अव-लम्ब्, आस्, निर्-अस्, आ-काङ्क्ष्, क्रन्द्, तन्, दीप्, नश् (नशितव्य, नंष्टव्य), फल्, आ-लोच्, वद्, लङ्घ्, वम्, श्वस् इति एतेषां धातूनां तव्यानीयान्त-रूपाणि लिख।

(ख) यदि कथ्—कथनीय/कथयितव्य, चिन्त्—चिन्तनीय/चिन्तयितव्य भवेत् तर्हि रच्, गण्, वञ्च्, तर्ज्, वर्ण्, भक्ष्, दण्ड्, गवेष्, पाल्, मार्ग्, पीड्, पूज्, सूच्, भूष्, अर्थ्, प्र-अर्थ्, मान्, अर्ज्, उप-अर्ज्, आ-कर्ण् इति एतेषां रूपाणि लिख।

(ग) क्षल्, तड्, तुल्, घुष्, चुर्। यथा—क्षल्—क्षालनीय/क्षालयितव्य। तुल्—तोलनीय/तोलयितव्य।

(घ) पा, ज्ञा, घ्रा, दा, भा, धा, वि-धा, या, स्था, मा, हा, ध्मा। यथा—पा—पानीय/पातव्य। घ्रा—घ्राणीय/घ्रातव्य। स्था—स्थानीय/स्थातव्य।

(ङ) ह्वे, आ-ह्वे, गै, ध्यै, म्लै, ग्लै, त्रै। यथा—ह्वे—ह्वानीय/ह्वातव्य। गै—गानीय/गातव्य।

(च) कृ, हृ, स्मृ, मृ, सृ, अनु-सृ, भृ, पृ, दृ, आ-दृ। यथा—कृ—करणीय/कर्तव्य।

(छ) जि, नी, आ-नी, क्षि, चि, सं-चि। यथा, जि—जयनीय/जेतव्य।

(ज) लिख्, मिल्, विद्, कुप्, मुद्, शुच्, द्युत्, शुभ्, वृत्, वृध्, कृत्,

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

रुच् । यथा—लिख्—लेखनीय/लिखितव्य । कुप्—कोपनीय/कोपितव्य । वृत्—वर्तनीय/वर्तितव्य ।

(झ) गम्, नम्, रम्, क्षम्, मन्, हन्, आप्, प्र-आप्, शप्, तप्, स्वप्, वप् । यथा—गम्—गमनीय/गन्तव्य । मन्—मननीय/मन्तव्य । प्र-आप्—प्रापणीय/प्राप्तव्य । शप्—शपनीय/शप्तव्य ।

(ञ) द्विष्, पिष्, विश्, प्र-विश्, इष् । यथा—द्विष्—द्वेषणीय/द्वेष्टव्य । इष्—एषणीय/एष्टव्य (एषितव्य) ।

(ट) त्यज्—त्यजनीय/त्यक्तव्य । क्षिप्—क्षेपणीय/क्षेप्तव्य । छिद्—छेदनीय/छेत्तव्य । भिद्—भेदनीय/भेत्तव्य । बुध् १उ.—बोधनीय/बोधितव्य । बुध् ४आ—बोधनीय/बोद्धव्य । रुध्—रोधनीय/रोद्धव्य । युध्—योधनीय/योद्धव्य । क्रुध्—क्रोधनीय/क्रोद्धव्य । सिच्—सेचनीय/सेक्तव्य । पच्—पचनीय/पक्तव्य । भज्—भजनीय/भक्तव्य । युज्—योजनीय/योक्तव्य । भुज्—भोजनीय/भोक्तव्य । मुच्—मोचनीय/मोक्तव्य । वच्, ब्रू—वचनीय/वक्तव्य । रुह्—रोहणीय/रोढव्य । लिह्—लेहनीय/लेढव्य । वह्—वहनीय/वोढव्य । पुष्—पोषणीय/पोष्टव्य (पोषितव्य) । तुष्—तोषणीय/तोष्टव्य । आ-क्रुश्—आक्रोशनीय/आक्रोष्टव्य । वस्—वसनीय/वस्तव्य । नृत्—नर्तनीय/नर्तितव्य । प्रच्छ्—प्रच्छनीय/प्रष्टव्य । सृज्—सर्जनीय/स्रष्टव्य । दृश्—दर्शनीय/द्रष्टव्य । स्पृश्—स्पर्शनीय/स्प्रष्टव्य (स्पर्ष्टव्य) । यज्—यजनीय/यष्टव्य । भञ्ज्—भञ्जनीय/भङ्क्तव्य । मस्ज्—मज्जनीय/मङ्क्तव्य । स्तु—स्तवनीय/स्तोतव्य । हु—हवनीय/होतव्य । पू—पवनीय/पवितव्य । लू—लवनीय/लवितव्य । भू—भवनीय/भवितव्य । भी—भयनीय/भेतव्य । श्रु—श्रवणीय/श्रोतव्य । आ-श्रि—आश्रयणीय/आश्रयितव्य । मृज्—मार्जनीय/मार्ष्टव्य (मार्जितव्य) । ग्रह्—ग्रहणीय/ग्रहीतव्य । लभ्—लम्भनीय/लब्धव्य । आ-रभ्—आरम्भणीय/आरब्धव्य । तॄ—तरणीय/तरि(री)तव्य । जॄ—जरणीय/जरि(री)तव्य । दॄ—दरणीय/दरि(री)तव्य । वृ—वरणीय/वरि(री)तव्य । संवृ—संवरणीय/संवरि(री)तव्य । अद्—अदनीय/अत्तव्य । तुद्—तोदनीय/तोत्तव्य । विद् to get—वेदनीय/वेत्तव्य (वेदितव्य) । दुह्—दोहनीय/दोग्धव्य । दिह्—देहनीय/देग्धव्य । जागृ—जागरणीय/जागरितव्य । अधि-इ—अध्ययनीय/अध्येतव्य । कृप्—कल्पनीय/कल्पितव्य (कल्प्तव्य) । शी—शयनीय/शयितव्य । हृष्—हर्षणीय/हर्षितव्य । वृष्—वर्षणीय/वर्षितव्य । तृष्—तर्षणीय/तर्षितव्य । कृष्—कर्षणीय/कर्ष्टव्य/क्रष्टव्य ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

४. तव्यानीयान्तरूपैः रिक्तस्थानानि पूरय—

अस्माभिः प्रतिदिनं कवोष्णजलेन स्नानं (कृ)—/— । त्वया प्रतिदिनम् आश्रमः (गम्)—/— । गुरुवारे रविवारे च खेलाङ्गने अस्माभिः (ध्यै) —/— । कार्यसमयेऽपि अस्माभिः श्रीमातुः नाम (स्मृ)—/— । मया रामायणं (पठ्)—/— । मया रामायणमहाभारते (पठ्)—/— । मया सर्वाणि पुराणानि (पठ्)—/— । श्वस्तन-दर्शनदिनार्थं त्वया माला (रच्)—/— । श्वस्तन-दर्शनदिनार्थं त्वया माले (रच्)—/— । श्वस्तन-दर्शनदिनार्थं त्वया मालाः (रच्)—/— । अद्य तेन श्लोकः श्रावणीयः/श्रावयितव्यः । अद्य तेन श्लोकौ—/— । अद्य तेन श्लोकाः—/— ।

*

न स्थातव्यं न गन्तव्यं क्षणमप्यधमैः सह ।
पयोऽपि शौण्डिकीहस्ते मदिरां मन्यते जनः ।।*

सार्थान्वयः—अधमैः सह क्षणम् अपि न स्थातव्यम्, न गन्तव्यम् । जनः शौण्डिकीहस्ते (मद्यव्यापारिणीकरे) पयः (दुग्धम्) अपि मदिरां (मद्यं) मन्यते (चिन्तयति/भावयति) ।

शतं विहाय भोक्तव्यं सहस्रं स्नानमाचरेत् ।
लक्षं विहाय दातव्यं कोटिं त्यक्त्वा हरिं भजेत् ।।

सार्थान्वयः—शतं [कार्याणि] विहाय (वर्जयित्वा) भोक्तव्यम् (भोजनं कर्तव्यम्), सहस्रं [विहाय] स्नानम् आचरेत् (स्नानं कर्तव्यम्/स्नातव्यम्), लक्षं विहाय दातव्यम् (दानं कर्तव्यम्), कोटिं त्यक्त्वा हरिं भजेत् (हरिः भजनीयः) । अत्र कर्तव्यकर्मसु हरिभक्तेः प्राधान्यम्/प्रामुख्यं कीर्तितम् ।

*

कथ्—अद्याहं कथां कथयामि । आगामिवारेऽपि कथां कथयिष्यामि । अधुनाहं कथां कथयानि किम् ? अपि गतवारेऽहं कथाम् अकथयम् ? अपि गतवारे मया कथा कथिता ? यदि गतवर्षेऽहं वर्गे कथाम् अकथयिष्यं तर्हि संस्कृते बहूनां रुचिः अधिकतरा अभविष्यत् । तदा युष्माकं भाषणाभ्यासः सरलः, सुकरः सुसाध्यश्च अभविष्यत् । अतोऽहं प्रतिवारं कामपि कथां कथयेयम् ।

---

* 'मदिरां मन्यते जनः' इत्यस्य स्थाने 'वारुणीत्यभिधीयते' इति पाठभेदोऽपि प्रसिद्धः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अतः मया प्रतिवारं कापि कथा कथनीया/कथयितव्या । अहमद्य कथां कथयितुम् आगतः । कथां कथयित्वाहं रावणकृतं शिवताण्डवस्तोत्रं पाठयिष्यामि । अपि मयाद्य रुचिरा कथा कथिता ?

ब्राह्मणा भोजनप्रियाः

अस्ति कश्चिद् ब्राह्मणः अतीव उदरम्भरिः । सः भोजनाय योजनं गन्तुं शक्नोति ।

एकदा केनचिद् यजमानेन श्राद्धार्थम् आहूतः सः । श्राद्धानन्तरं यजमानः तं भोजयति । सः तस्मै दधि, गुडम्, पृथुकम्, कादलम्, आमिक्षां सन्धितं च परिवेषयति । एतावतः भोज्यपदार्थान् दृष्ट्वा तस्य जिह्वा लालायतेतराम् । सः यथा कथञ्चित् 'इदम् अग्नये, इदं न मम, ॐ जठराग्नये स्वाहा' इति उच्चार्य महानन्देन भोजनं करोति ।

यजमानः तम् आदरेण श्रद्धया च परिपृच्छ्य तदिष्टं तस्मै परिवेषयति । वृकोदरः सः सर्वम् उदरदेवाय स्वाहा करोति । अन्ते यजमानः तस्मै नारिकेल-निर्मितान् लड्डुकान् ददाति । ब्राह्मणाय ते भृशं रोचन्ते । तेषां हिमशुभ्ररूपेण सः आकृष्टः, उल्लसितः मोहितश्च भवति । किन्तु आकण्ठपूर्णस्य तस्य उदरे स्थानं नास्ति । किं कुर्याद् वराकः ! मधुरेण समाप्तिस्तु कर्तव्या एव । सहसा कस्यचित् महापुरुषस्य अयं श्लोकः तस्य मनसि स्फुरति—

भोजनं कुरु दुर्बुद्धे मा शरीरे दयां कुरु ।
परान्नं दुर्लभं लोके शरीरं तु पुनः पुनः ।। इति ।

अनेन सः पुनर्भोजनाय प्रेरितो भवति । एकतः भोजनाधिक्यात् अस्वस्ति, अन्यतः सुस्वादुलड्डुकाः !

अथ सः किमपि गभीरं चिन्तयित्वा आसनाद् उत्तिष्ठति किन्तु तस्य मनः प्राणाः च लड्डुकैकलग्नानि । उत्तिष्ठन्नेव सः द्वौ लड्डुकौ उदरसात् करोति ।

ततः सः हस्तौ मुखं च प्रक्षालयति । हठात् तस्य उदरे तीव्रा पीडा भवति । कुक्षौ हस्तौ निधाय सः भूमौ विलुठति ।

यजमानः सातङ्कः । सः सत्वरं वैद्यम् आह्वयति । वैद्यः तस्य नाडीं परीक्ष्य रोगस्य किमपि लक्षणं न निरूपयति ।

अथ सः यजमानेन किञ्चित् जलम् आनाययति ब्राह्मणाय च जलेन सह गुटिकाद्वयं सेवनाय ददाति । ब्राह्मणः वदति—कथमेतत् सेवेय ? उदरे

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

स्वल्पमपि स्थानं नास्ति। यदि तत्र किञ्चिदपि स्थानम् अभविष्यत् तर्हि तु अहम् अवशिष्टं लड्डुकम् अभक्षयिष्यम्!

अतः इदमुच्यते—

मा जीव भोजनाय त्वं संभुङ्क्ष्व जीवितुं सदा।
स्निग्धमुष्णं मितं पथ्यं प्रशस्तं भोजनं बुधैः॥

सार्थान्वयः—त्वं भोजनाय मा जीव, सदा जीवितुं संभुङ्क्ष्व (भोजनं कुरु)। बुधैः-(ज्ञानिजनैः) स्निग्धम् (स्नेहयुक्तम्/घृतपक्वम्), उष्णम्, मितम् (परिमितम्), पथ्यं (स्वास्थ्याय हितकरं) भोजनं प्रशस्तम् (प्रशंसितम्, प्रशस्यम्)।

कस्य किं प्रियम्

ब्राह्मणो भोजनप्रियः। बालको मोदकप्रियः। अभिषेकप्रियः शम्भुः। चातकः पर्जन्यप्रियः। उद्यमप्रियाः मधुमक्षिकाः। आलस्यप्रियः अजगरः। पतङ्गो ज्योतिःप्रियः। पिपीलको गुडप्रियः। मत्कुणः रुधिरप्रियः। काकः क्षतप्रियः। उलूकस्तिमिरप्रियः। तित्तिरः अङ्गारप्रियः। शलभः सस्यपर्णप्रियः। गुणी गुणप्रियः। मार्जारो दुग्धप्रियः। सङ्गीतप्रियः सर्पः। स्वच्छताप्रियो हंसः। भक्तिप्रियो भक्तः। स्तुतिप्रियमखिलं जगत्।

❋

योन हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।
शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः॥ (गीता १२.१७)

भावार्थः—[प्रियलाभे] यस्य आकाङ्क्षा हर्षः वा [तदभावे] द्वेषः शोकः वा न भवति, यः शुभस्य अशुभस्य च परित्यागी, भक्तिमान् सः मे (मम) [श्रीकृष्णस्य] प्रियः।

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्॥(गीता ९.२९)

भावार्थः—अहं [श्रीकृष्णः] सर्वेषु भूतेषु समः (समभावः)। नास्ति कोऽपि मम अप्रियः प्रियः वा। ये तु मां भक्त्या (भक्तिपूर्वकं) भजन्ति ते मयि (मदन्तरे) [वर्तन्ते] अपि च अहं तेषु [वर्ते]।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

१. लट्लकारः (वर्तमानकालः — Present tense)

	प्रथमपुरुषः			मध्यमपुरुषः			उत्तमपुरुषः		
	सः	तौ	ते	त्वम्	युवाम्	यूयम्	अहम्	आवाम्	वयम्
अस् 2P. to be	अस्ति	स्तः	सन्ति	असि	स्थः	स्थ	अस्मि	स्वः	स्मः
पठ् 1P. to read	पठति	पठतः	पठन्ति	पठसि	पठथः	पठथ	पठामि	पठावः	पठामः
वद् 1P. to speak	वदति	वदतः	वदन्ति	वदसि	वदथः	वदथ	वदामि	वदावः	वदामः
गम् 1P. to go	गच्छति	गच्छतः	गच्छन्ति	गच्छसि	गच्छथः	गच्छथ	गच्छामि	गच्छावः	गच्छामः
स्था 1P. to stand	तिष्ठति	तिष्ठतः	तिष्ठन्ति	तिष्ठसि	तिष्ठथः	तिष्ठथ	तिष्ठामि	तिष्ठावः	तिष्ठामः
पा 1P. to drink	पिबति	पिबतः	पिबन्ति	पिबसि	पिबथः	पिबथ	पिबामि	पिबावः	पिबामः
दृश् 1P. to see	पश्यति	पश्यतः	पश्यन्ति	पश्यसि	पश्यथः	पश्यथ	पश्यामि	पश्यावः	पश्यामः
नी 1U. to carry	नयति	नयतः	नयन्ति	नयसि	नयथः	नयथ	नयामि	नयावः	नयामः
भू 1P. to be	भवति	भवतः	भवन्ति	भवसि	भवथः	भवथ	भवामि	भवावः	भवामः
कथ् 10U. to tell	कथयति	कथयतः	कथयन्ति	कथयसि	कथयथः	कथयथ	कथयामि	कथयावः	कथयामः
लिख् 6P. to write	लिखति	लिखतः	लिखन्ति	लिखसि	लिखथः	लिखथ	लिखामि	लिखावः	लिखामः
इष् 6P. to wish	इच्छति	इच्छतः	इच्छन्ति	इच्छसि	इच्छथः	इच्छथ	इच्छामि	इच्छावः	इच्छामः
प्रच्छ् 6P. to ask	पृच्छति	पृच्छतः	पृच्छन्ति	पृच्छसि	पृच्छथः	पृच्छथ	पृच्छामि	पृच्छावः	पृच्छामः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नृत् 4P. to dance	नृत्यति	नृत्यतः	नृत्यन्ति	नृत्यसि	नृत्यथः	नृत्यथ	नृत्यामि	नृत्यावः	नृत्यामः
कृ 8U. to do	करोति	कुरुतः	कुर्वन्ति	करोषि	कुरुथः	कुरुथ	करोमि	कुर्वः	कुर्मः
श्रु 5P. to hear	शृणोति	शृणुतः	शृण्वन्ति	शृणोषि	शृणुथः	शृणुथ	शृणोमि	शृणुवः(शृण्वः)	शृणुमः(शृण्मः)
शक् 5P. to be able	शक्नोति	शक्नुतः	शक्नुवन्ति	शक्नोषि	शक्नुथः	शक्नुथ	शक्नोमि	शक्नुवः	शक्नुमः
प्र+आप् 5P. to obtain	प्राप्नोति	प्राप्नुतः	प्राप्नुवन्ति	प्राप्नोषि	प्राप्नुथः	प्राप्नुथ	प्राप्नोमि	प्राप्नुवः	प्राप्नुमः
ज्ञा 9U. to know	जानाति	जानीतः	जानन्ति	जानासि	जानीथः	जानीथ	जानामि	जानीवः	जानीमः
ग्रह् 9U. to take	गृह्णाति	गृह्णीतः	गृह्णन्ति	गृह्णासि	गृह्णीथः	गृह्णीथ	गृह्णामि	गृह्णीवः	गृह्णीमः
क्री 9U. to buy	क्रीणाति	क्रीणीतः	क्रीणन्ति	क्रीणासि	क्रीणीथः	क्रीणीथ	क्रीणामि	क्रीणीवः	क्रीणीमः
दा 3U. to give	ददाति	दत्तः	ददति	ददासि	दत्थः	दत्थ	ददामि	दद्वः	दद्मः
सेव् 1A. to serve	सेवते	सेवेते	सेवन्ते	सेवसे	सेवेथे	सेवध्वे	सेवे	सेवावहे	सेवामहे
लभ् 1A. to get	लभते	लभेते	लभन्ते	लभसे	लभेथे	लभध्वे	लभे	लभावहे	लभामहे
मन् 4A. to think	मन्यते	मन्येते	मन्यन्ते	मन्यसे	मन्येथे	मन्यध्वे	मन्ये	मन्यावहे	मन्यामहे

सह्, दय्, क्षम्, भज्, वन्द्, भाष्, शिक्ष्, भिक्ष्, त्वर्, चेष्ट्, घट्, जृम्भ्, कम्प्, बाध्, ईह्, याच्, एध्, स्पन्द्, स्पर्ध्, लम्ब्, राज्, रम्, वेप्, शङ्क्, लङ्घ्, प्रति-ईक्ष्, प्र-यत्, आ-रभ्, प्र-काश्, परा-अय् (पलायते···), डी (डयते···), त्रै (त्रायते···), मुद् (मोदते···), द्युत् (द्योतते···), रुच् (रोचते···), शुभ् (शोभते···), वृत् (वर्तते···), वृध् (वर्धते···) इति एतेषां धातूनां रूपाणि 'सेव्'वत् 'लभ्'वत् वा भवन्ति। बुध् (बुध्यते···), युध् (युध्यते···), युज् (युज्यते···), विद् (विद्यते···), खिद् (खिद्यते···), क्लिश् (क्लिश्यते···), दीप् (दीप्यते···), ली (लीयते···), प्र-सू (प्रसूयते···), जन् (जायते···) इति एतेषां तु 'मन्'वत्। एषाम् आत्मनेपदिधातूनां रूपाणि परस्मैपदिधातुभ्यः भिन्नानि।

Digitization by Hindu-Heritage-Foundation of America, HHFA(USA)

२. लृट्लकारः (भविष्यत्कालः—Future tense)

	प्रथमपुरुषः			मध्यमपुरुषः			उत्तमपुरुषः		
	सः	तौ	ते	त्वम्	युवाम्	यूयम्	अहम्	आवाम्	वयम्
अस् २प. होना	भविष्यति	भविष्यतः	भविष्यन्ति	भविष्यसि	भविष्यथः	भविष्यथ	भविष्यामि	भविष्यावः	भविष्यामः
पठ् १प. पढ़ना	पठिष्यति	पठिष्यतः	पठिष्यन्ति	पठिष्यसि	पठिष्यथः	पठिष्यथ	पठिष्यामि	पठिष्यावः	पठिष्यामः
वद् १प. बोलना	वदिष्यति	वदिष्यतः	वदिष्यन्ति	वदिष्यसि	वदिष्यथः	वदिष्यथ	वदिष्यामि	वदिष्यावः	वदिष्यामः
गम् १प. जाना	गमिष्यति	गमिष्यतः	गमिष्यन्ति	गमिष्यसि	गमिष्यथः	गमिष्यथ	गमिष्यामि	गमिष्यावः	गमिष्यामः
स्था १प. ठहरना	स्थास्यति	स्थास्यतः	स्थास्यन्ति	स्थास्यसि	स्थास्यथः	स्थास्यथ	स्थास्यामि	स्थास्यावः	स्थास्यामः
पा १प. पीना	पास्यति	पास्यतः	पास्यन्ति	पास्यसि	पास्यथः	पास्यथ	पास्यामि	पास्यावः	पास्यामः
दृश् १प. देखना	द्रक्ष्यति	द्रक्ष्यतः	द्रक्ष्यन्ति	द्रक्ष्यसि	द्रक्ष्यथः	द्रक्ष्यथ	द्रक्ष्यामि	द्रक्ष्यावः	द्रक्ष्यामः
नी १उ. ले जाना	नेष्यति	नेष्यतः	नेष्यन्ति	नेष्यसि	नेष्यथः	नेष्यथ	नेष्यामि	नेष्यावः	नेष्यामः
भू १प. होना	भविष्यति	भविष्यतः	भविष्यन्ति	भविष्यसि	भविष्यथः	भविष्यथ	भविष्यामि	भविष्यावः	भविष्यामः
कथ् १०उ. कहना	कथयिष्यति	कथयिष्यतः	कथयिष्यन्ति	कथयिष्यसि	कथयिष्यथः	कथयिष्यथ	कथयिष्यामि	कथयिष्यावः	कथयिष्यामः
लिख् ६प. लिखना	लेखिष्यति	लेखिष्यतः	लेखिष्यन्ति	लेखिष्यसि	लेखिष्यथः	लेखिष्यथ	लेखिष्यामि	लेखिष्यावः	लेखिष्यामः
इष् ६प. चाहना	एषिष्यति	एषिष्यतः	एषिष्यन्ति	एषिष्यसि	एषिष्यथः	एषिष्यथ	एषिष्यामि	एषिष्यावः	एषिष्यामः
प्रच्छ् ६प. पूछना	प्रक्ष्यति	प्रक्ष्यतः	प्रक्ष्यन्ति	प्रक्ष्यसि	प्रक्ष्यथः	प्रक्ष्यथ	प्रक्ष्यामि	प्रक्ष्यावः	प्रक्ष्यामः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नृत् ४प. नाचना	नर्तिष्यति	नर्तिष्यतः	नर्तिष्यन्ति	नर्तिष्यसि	नर्तिष्यथः	नर्तिष्यथ	नर्तिष्यामि	नर्तिष्यावः	नर्तिष्यामः
कृ ८उ. करना	करिष्यति	करिष्यतः	करिष्यन्ति	करिष्यसि	करिष्यथः	करिष्यथ	करिष्यामि	करिष्यावः	करिष्यामः
श्रु ५प. सुनना	श्रोष्यति	श्रोष्यतः	श्रोष्यन्ति	श्रोष्यसि	श्रोष्यथः	श्रोष्यथ	श्रोष्यामि	श्रोष्यावः	श्रोष्यामः
शक् ५प. समर्थ होना	शक्ष्यति	शक्ष्यतः	शक्ष्यन्ति	शक्ष्यसि	शक्ष्यथः	शक्ष्यथ	शक्ष्यामि	शक्ष्यावः	शक्ष्यामः
प्र+आप् ५प. पाना	प्राप्स्यति	प्राप्स्यतः	प्राप्स्यन्ति	प्राप्स्यसि	प्राप्स्यथः	प्राप्स्यथ	प्राप्स्यामि	प्राप्स्यावः	प्राप्स्यामः
ज्ञा ९उ. जानना	ज्ञास्यति	ज्ञास्यतः	ज्ञास्यन्ति	ज्ञास्यसि	ज्ञास्यथः	ज्ञास्यथ	ज्ञास्यामि	ज्ञास्यावः	ज्ञास्यामः
ग्रह् ९उ. लेना	ग्रहीष्यति	ग्रहीष्यतः	ग्रहीष्यन्ति	ग्रहीष्यसि	ग्रहीष्यथः	ग्रहीष्यथ	ग्रहीष्यामि	ग्रहीष्यावः	ग्रहीष्यामः
क्री ९उ. खरीदना	क्रेष्यति	क्रेष्यतः	क्रेष्यन्ति	क्रेष्यसि	क्रेष्यथः	क्रेष्यथ	क्रेष्यामि	क्रेष्यावः	क्रेष्यामः
दा ३उ. देना	दास्यति	दास्यतः	दास्यन्ति	दास्यसि	दास्यथः	दास्यथ	दास्यामि	दास्यावः	दास्यामः
सेव् १आ. सेवा करना	सेविष्यते	सेविष्येते	सेविष्यन्ते	सेविष्यसे	सेविष्येथे	सेविष्यध्वे	सेविष्ये	सेविष्यावहे	सेविष्यामहे
लभ् १आ. लाभ करना	लप्स्यते	लप्स्येते	लप्स्यन्ते	लप्स्यसे	लप्स्येथे	लप्स्यध्वे	लप्स्ये	लप्स्यावहे	लप्स्यामहे
मन् ४आ. सोचना	मंस्यते	मंस्येते	मंस्यन्ते	मंस्यसे	मंस्येथे	मंस्यध्वे	मंस्ये	मंस्यावहे	मंस्यामहे

सह्, दय्, क्षम्, वन्द्, भाष्, शिक्ष्, भिक्ष्, त्वर्, चेष्ट्, घट्, जृम्भ्, कम्प्, वाध्, ईह्, याच्, एध्, स्पन्द्, स्पर्ध्, लम्ब्, राज्, वेप्, शङ्क्, लङ्घ्, प्रति-ईक्ष्, प्र-यत्, प्र-काश्, परा-अय् । यथा, सेव्—सेविष्यते । सह्—सहिष्यते । दय्—दयिष्यते । प्रति-ईक्ष्—प्रतीक्षिष्यते । परा-अय्—पलायिष्यते । जन्—जनिष्यते । दीप्—दीपिष्यते ।। मुद्, द्युत्, रुच्, शुभ्, वृत्, वृध् । यथा, मुद्—मोदिष्यते । रुच्—रोचिष्यते । वृत्—वर्तिष्यते ।। क्लिश्—क्लेशिष्यते । ली—लेष्यते । प्र-सू—प्रसविष्यते । डी—डयिष्यते । रम्—रंस्यते । आ-रभ्—आरप्स्यते । त्रै—त्रास्यते । भज्—भक्ष्यते । युज्—योक्ष्यते । बुध्—भोत्स्यते । युध्—योत्स्यते । खिद्—खेत्स्यते । विद्—वेत्स्यते ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

३. लोट्लकारः (आज्ञार्थकः — Imperative mood)

	प्रथमपुरुषः			मध्यमपुरुषः			उत्तमपुरुषः		
	सः	तौ	ते	त्वम्	युवाम्	यूयम्	अहम्	आवाम्	वयम्
अस् 2P. to be	अस्तु	स्ताम्	सन्तु	एधि	स्तम्	स्त	असानि	असाव	असाम
पठ् 1P. to read	पठतु	पठताम्	पठन्तु	पठ	पठतम्	पठत	पठानि	पठाव	पठाम
वद् 1P. to speak	वदतु	वदताम्	वदन्तु	वद	वदतम्	वदत	वदानि	वदाव	वदाम
गम् 1P. to go	गच्छतु	गच्छताम्	गच्छन्तु	गच्छ	गच्छतम्	गच्छत	गच्छानि	गच्छाव	गच्छाम
स्था 1P to stay	तिष्ठतु	तिष्ठताम्	तिष्ठन्तु	तिष्ठ	तिष्ठतम्	तिष्ठत	तिष्ठानि	तिष्ठाव	तिष्ठाम
पा 1P. to drink	पिबतु	पिबताम्	पिबन्तु	पिब	पिबतम्	पिबत	पिबानि	पिबाव	पिबाम
दृश् 1P. to see	पश्यतु	पश्यताम्	पश्यन्तु	पश्य	पश्यतम्	पश्यत	पश्यानि	पश्याव	पश्याम
नी 1U. to carry	नयतु	नयताम्	नयन्तु	नय	नयतम्	नयत	नयानि	नयाव	नयाम
भू 1P. to be	भवतु	भवताम्	भवन्तु	भव	भवतम्	भवत	भवानि	भवाव	भवाम
कथ् 10U. to tell	कथयतु	कथयताम्	कथयन्तु	कथय	कथयतम्	कथयत	कथयानि	कथयाव	कथयाम
लिख् 6P. to write	लिखतु	लिखताम्	लिखन्तु	लिख	लिखतम्	लिखत	लिखानि	लिखाव	लिखाम
इष् 6P. to wish	इच्छतु	इच्छताम्	इच्छन्तु	इच्छ	इच्छतम्	इच्छत	इच्छानि	इच्छाव	इच्छाम
प्रच्छ् 6P. to ask	पृच्छतु	पृच्छताम्	पृच्छन्तु	पृच्छ	पृच्छतम्	पृच्छत	पृच्छानि	पृच्छाव	पृच्छाम

नृत् 4P. to dance	नृत्यतु	नृत्यताम्	नृत्यन्तु	नृत्य	नृत्यतम्	नृत्यत	नृत्यानि	नृत्याव	नृत्याम
कृ 8U. to do	करोतु	कुरुताम्	कुर्वन्तु	कुरु	कुरुतम्	कुरुत	करवाणि	करवाव	करवाम
श्रु 5P. to hear	श्रृणोतु	श्रृणुंताम्	श्रृण्वन्तु	श्रृणु	श्रृणुतम्	श्रृणुत	श्रृणवानि	श्रृणवाव	श्रृणवाम
शक् 5P. to be able	शक्नोतु	शक्नुताम्	शक्नुवन्तु	शक्नुहि	शक्नुतम्	शक्नुत	शक्नवानि	शक्नवाव	शक्नवाम
प्र + आप् 5P. to obtain	प्राप्नोतु	प्राप्नुताम्	प्राप्नुवन्तु	प्राप्नुहि	प्राप्नुतम्	प्राप्नुत	प्राप्नवानि	प्राप्नवाव	प्राप्नवाम
ज्ञा 9U. to know	जानातु	जानीताम्	जानन्तु	जानीहि	जानीतम्	जानीत	जानानि	जानाव	जानाम
ग्रह् 9U. to receive	गृह्णातु	गृह्णीताम्	गृह्णन्तु	गृहाण	गृह्णीतम्	गृह्णीत	गृह्णानि	गृह्णाव	गृह्णाम
क्री 9U. to buy	क्रीणातु	क्रीणीताम्	क्रीणन्तु	क्रीणीहि	क्रीणीतम्	क्रीणीत	क्रीणानि	क्रीणाव	क्रीणाम
दा 3U. to give	ददातु	दत्ताम्	ददतु	देहि	दत्तम्	दत्त	ददानि	ददाव	ददाम
सेव् 1A. to serve	सेवताम्	सेवेताम्	सेवन्ताम्	सेवस्व	सेवेथाम्	सेवध्वम्	सेवै	सेवावहै	सेवामहै
लभ् 1A. to get	लभताम्	लभेताम्	लभन्ताम्	लभस्व	लभेथाम्	लभध्वम्	लभै	लभावहै	लभामहै
मन् 4A. to think	मन्यताम्	मन्येताम्	मन्यन्ताम्	मन्यस्व	मन्येथाम्	मन्यध्वम्	मन्यै	मन्यावहै	मन्यामहै

सह्, दय्, क्षम्, भज्, वन्द्, भाष्, शिक्ष्, भिक्ष्, त्वर्, चेष्ट्, घट्, जृम्भ्, कम्प्, बाध्, ईह्, याच्, एध्, स्पन्द्, स्पर्ध्, लम्ब्, राज्, रम्, वेप्, शङ्क्, लङ्घ्, प्रति-ईक्ष्, प्र-यत्, आ-रभ्, प्र-काश्, परा-अय् (पलायताम्···), डी (डयताम्···), त्रै (त्रायताम्···), मुद् (मोदताम्···), द्युत् (द्योतताम्···), रुच् (रोचताम्···), शुभ् (शोभताम्···), वृत् (वर्तताम्···), वृध् (वर्धताम्···) इति एतेषां धातूनां रूपाणि 'सेव्'वत् 'लभ्'वत् वा भवन्ति । बुध् (बुध्यताम्···), युध् (युध्यताम्···), युज् (युज्यताम्···), विद् (विद्यताम्···), खिद् (खिद्यताम्···), क्लिश् (क्लिश्यताम्···), दीप् (दीप्यताम्···), ली (लीयताम्···), प्र-सू (प्रसूयताम्···), जन् (जायताम्···), इति एतेषां तु 'मन्'वत् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

४. लङ्लकारः (भूतकालः — Imperfect tense)

	प्रथमपुरुषः			मध्यमपुरुषः			उत्तमपुरुषः		
	सः	तौ	ते	त्वम्	युवाम्	यूयम्	अहम्	आवाम्	वयम्
अस् २प. होना	आसीत्	आस्ताम्	आसन्	आसीः	आस्तम्	आस्त	आसम्	आस्व	आस्म
पठ् १प. पढ़ना	अपठत्	अपठताम्	अपठन्	अपठः	अपठतम्	अपठत	अपठम्	अपठाव	अपठाम
वद् १प. बोलना	अवदत्	अवदताम्	अवदन्	अवदः	अवदतम्	अवदत	अवदम्	अवदाव	अवदाम
गम् १प. जाना	अगच्छत्	अगच्छताम्	अगच्छन्	अगच्छः	अगच्छतम्	अगच्छत	अगच्छम्	अगच्छाव	अगच्छाम
स्था १प. रहना	अतिष्ठत्	अतिष्ठताम्	अतिष्ठन्	अतिष्ठः	अतिष्ठतम्	अतिष्ठत	अतिष्ठम्	अतिष्ठाव	अतिष्ठाम
पा १प. पीना	अपिबत्	अपिबताम्	अपिबन्	अपिबः	अपिबतम्	अपिबत	अपिबम्	अपिबाव	अपिबाम
दृश् १प. देखना	अपश्यत्	अपश्यताम्	अपश्यन्	अपश्यः	अपश्यतम्	अपश्यत	अपश्यम्	अपश्याव	अपश्याम
नी १उ. ले ज़ाना	अनयत्	अनयताम्	अनयन्	अनयः	अनयतम्	अनयत	अनयम्	अनयाव	अनयाम
भू १प. होना	अभवत्	अभवताम्	अभवन्	अभवः	अभवतम्	अभवत	अभवम्	अभवाव	अभवाम
कथ् १०उ. कहना	अकथयत्	अकथयताम्	अकथयन्	अकथयः	अकथयतम्	अकथयत	अकथयम्	अकथयाव	अकथयाम
लिख् ६प. लिखना	अलिखत्	अलिखताम्	अलिखन्	अलिखः	अलिखतम्	अलिखत	अलिखम्	अलिखाव	अलिखाम
इष् ६प. चाहना	ऐच्छत्	ऐच्छताम्	ऐच्छन्	ऐच्छः	ऐच्छतम्	ऐच्छत	ऐच्छम्	ऐच्छाव	ऐच्छाम
प्रच्छ् ६प. पूछना	अपृच्छत्	अपृच्छताम्	अपृच्छन्	अपृच्छः	अपृच्छतम्	अपृच्छत	अपृच्छम्	अपृच्छाव	अपृच्छाम

नृत् ४प. नाचना	अनृत्यत्	अनृत्यताम्	अनृत्यन्	अनृत्यः	अनृत्यतम्	अनृत्यत	अनृत्यम्	अनृत्याव	अनृत्याम
कृ ८उ. करना	अकरोत्	अकुरुताम्	अकुर्वन्	अकरोः	अकुरुतम्	अकुरुत	अकरवम्	अकुर्व	अकुर्म
श्रु ५प. सुनना	अश्रृणोत्	अश्रृणुताम्	अश्रृण्वन्	अश्रृणोः	अश्रृणुतम्	अश्रृणुत	अश्रृणवम्	अश्रृणुव	अश्रृणुम
शक् ५प. सकना	अशक्नोत्	अशक्नुताम्	अशक्नुवन्	अशक्नोः	अशक्नुतम्	अशक्नुत	अशक्नवम्	अशक्नुव	अशक्नुम
प्र+आप् ५प. पाना	प्राप्नोत्	प्राप्नुताम्	प्राप्नुवन्	प्राप्नोः	प्राप्नुतम्	प्राप्नुत	प्राप्नवम्	प्राप्नुव	प्राप्नुम
ज्ञा ९उ. जानना	अजानात्	अजानीताम्	अजानन्	अजानाः	अजानीतम्	अजानीत	अजानाम्	अजानीव	अजानीम
ग्रह् ९उ. ग्रहण करना	अगृह्णात्	अगृह्णीताम्	अगृह्णन्	अगृह्णाः	अगृह्णीतम्	अगृह्णीत	अगृह्णाम्	अगृह्णीव	अगृह्णीम
क्री ९उ. खरीदना	अक्रीणात्	अक्रीणीताम्	अक्रीणन्	अक्रीणाः	अक्रीणीतम्	अक्रीणीत	अक्रीणाम्	अक्रीणीव	अक्रीणीम
दा ३उ. देना	अददात्	अदत्ताम्	अददुः	अददाः	अदत्तम्	अदत्त	अददाम्	अदद्व	अदद्म
सेव् १आ. सेवा करना	असेवत	असेवेताम्	असेवन्त	असेवथाः	असेवेथाम्	असेवध्वम्	असेवे	असेवावहि	असेवामहि
लभ् १आ. लाभ करना	अलभत	अलभेताम्	अलभन्त	अलभथाः	अलभेथाम्	अलभध्वम्	अलभे	अलभावहि	अलभामहि
मन् ४आ. सोचना	अमन्यत	अमन्येताम्	अमन्यन्त	अमन्यथाः	अमन्येथाम्	अमन्यध्वम्	अमन्ये	अमन्यावहि	अमन्यामहि

सह्, दय्, क्षम्, भज्, वन्द्, भाष्, शिक्ष्, भिक्ष्, त्वर्, चेष्ट्, घट्, जृम्भ्, कम्प्, बाध्, ईह्, याच्, एध्, स्पन्द्, स्पर्ध्, लम्ब्, राज्, रम्, वेप्, शङ्क्, लङ्घ्। यथा, सेव्—असेवत। सह्—असहत। लङ्घ्—अलङ्घत॥ मुद्, द्युत्, रुच्, शुभ्, वृत्, वृध्। यथा, मुद्—अमोदत। शुभ्—अशोभत। वृत्—अवर्तत॥ प्रति-ईक्ष्, प्र-यत्, आ-रभ्, प्र-काश्, परा-अय्। यथा, प्रति-ईक्ष्—प्रत्यैक्षत। प्र-यत्—प्रायतत। आ-रभ्—आरभत। परा-अय्—पलायत॥ डी—अडयत। त्रै—अत्रायत॥ बुध्, युध्, युज्, विद्, खिद्, क्लिश्, दीप्। यथा, मन्—अमन्यत। बुध्—अबुध्यत। दीप्—अदीप्यत॥ ली—अलीयत। प्र-सू—प्रासूयत। जन्—अजायत॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

५. लृङ्लकारः (क्रियातिपत्त्यर्थकः — unfulfilled/conditional past)

	प्रथमपुरुषः			मध्यमपुरुषः			उत्तमपुरुषः		
	सः	तौ	ते	त्वम्	युवाम्	यूयम्	अहम्	आवाम्	वयम्
अस् 2P. to be	अभविष्यत्	अभविष्यताम्	अभविष्यन्	अभविष्यः	अभविष्यतम्	अभविष्यत	अभविष्यम्	अभविष्याव	अभविष्याम
पठ् 1P. to read	अपठिष्यत्	अपठिष्यताम्	अपठिष्यन्	अपठिष्यः	अपठिष्यतम्	अपठिष्यत	अपठिष्यम्	अपठिष्याव	अपठिष्याम
वद् 1P. to speak	अवदिष्यत्	अवदिष्यताम्	अवदिष्यन्	अवदिष्यः	अवदिष्यतम्	अवदिष्यत	अवदिष्यम्	अवदिष्याव	अवदिष्याम
गम् 1P. to go	अगमिष्यत्	अगमिष्यताम्	अगमिष्यन्	अगमिष्यः	अगमिष्यतम्	अगमिष्यत	अगमिष्यम्	अगमिष्याव	अगमिष्याम
स्था 1P. to stand	अस्थास्यत्	अस्थास्यताम्	अस्थास्यन्	अस्थास्यः	अस्थास्यतम्	अस्थास्यत	अस्थास्यम्	अस्थास्याव	अस्थास्याम
पा 1P. to drink	अपास्यत्	अपास्यताम्	अपास्यन्	अपास्यः	अपास्यतम्	अपास्यत	अपास्यम्	अपास्याव	अपास्याम
दृश् 1P. to see	अद्रक्ष्यत्	अद्रक्ष्यताम्	अद्रक्ष्यन्	अद्रक्ष्यः	अद्रक्ष्यतम्	अद्रक्ष्यत	अद्रक्ष्यम्	अद्रक्ष्याव	अद्रक्ष्याम
नी 1U. to carry	अनेष्यत्	अनेष्यताम्	अनेष्यन्	अनेष्यः	अनेष्यतम्	अनेष्यत	अनेष्यम्	अनेष्याव	अनेष्याम
भू 1P. to be	अभविष्यत्	अभविष्यताम्	अभविष्यन्	अभविष्यः	अभविष्यतम्	अभविष्यत	अभविष्यम्	अभविष्याव	अभविष्याम
कथ् 10U. to tell	अकथयिष्यत्	अकथयिष्यताम्	अकथयिष्यन्	अकथयिष्यः	अकथयिष्यतम्	अकथयिष्यत	अकथयिष्यम्	अकथयिष्याव	अकथयिष्याम
लिख् 6P. to write	अलेखिष्यत्	अलेखिष्यताम्	अलेखिष्यन्	अलेखिष्यः	अलेखिष्यतम्	अलेखिष्यत	अलेखिष्यम्	अलेखिष्याव	अलेखिष्याम
इष् 6P. to wish	ऐषिष्यत्	ऐषिष्यताम्	ऐषिष्यन्	ऐषिष्यः	ऐषिष्यतम्	ऐषिष्यत	ऐषिष्यम्	ऐषिष्याव	ऐषिष्याम
प्रच्छ् 6P. to ask	अप्रक्ष्यत्	अप्रक्ष्यताम्	अप्रक्ष्यन्	अप्रक्ष्यः	अप्रक्ष्यतम्	अप्रक्ष्यत	अप्रक्ष्यम्	अप्रक्ष्याव	अप्रक्ष्याम

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नृत् 4P. to dance	अनर्तिष्यत्	अनर्तिष्यताम्	अनर्तिष्यन्	अनर्तिष्यः	अनर्तिष्यतम्	अनर्तिष्यत	अनर्तिष्यम्	अनर्तिष्याव	अनर्तिष्याम
कृ 8U. to do	अकरिष्यत्	अकरिष्यताम्	अकरिष्यन्	अकरिष्यः	अकरिष्यतम्	अकरिष्यत	अकरिष्यम्	अकरिष्याव	अकरिष्याम
श्रु 5P. to hear	अश्रोष्यत्	अश्रोष्यताम्	अश्रोष्यन्	अश्रोष्यः	अश्रोष्यतम्	अश्रोष्यत	अश्रोष्यम्	अश्रोष्याव	अश्रोष्याम
शक् 5P. to be able	अशक्ष्यत्	अशक्ष्यताम्	अशक्ष्यन्	अशक्ष्यः	अशक्ष्यतम्	अशक्ष्यत	अशक्ष्यम्	अशक्ष्याव	अशक्ष्याम
प्र+आप् 5P. to obtain	प्राप्स्यत्	प्राप्स्यताम्	प्राप्स्यन्	प्राप्स्यः	प्राप्स्यतम्	प्राप्स्यत	प्राप्स्यम्	प्राप्स्याव	प्राप्स्याम
ज्ञा 9U. to know	अज्ञास्यत्	अज्ञास्यताम्	अज्ञास्यन्	अज्ञास्यः	अज्ञास्यतम्	अज्ञास्यत	अज्ञास्यम्	अज्ञास्याव	अज्ञास्याम
ग्रह् 9U. to take	अग्रहीष्यत्	अग्रहीष्यताम्	अग्रहीष्यन्	अग्रहीष्यः	अग्रहीष्यतम्	अग्रहीष्यत	अग्रहीष्यम्	अग्रहीष्याव	अग्रहीष्याम
क्री 9U. to buy	अक्रेष्यत्	अक्रेष्यताम्	अक्रेष्यन्	अक्रेष्यः	अक्रेष्यतम्	अक्रेष्यत	अक्रेष्यम्	अक्रेष्याव	अक्रेष्याम
दा 3U. to give	अदास्यत्	अदास्यताम्	अदास्यन्	अदास्यः	अदास्यतम्	अदास्यत	अदास्यम्	अदास्याव	अदास्याम
सेव् 1A. to serve	असेविष्यत	असेविष्येताम्	असेविष्यन्त	असेविष्यथाः	असेविष्येथाम्	असेविष्यध्वम्	असेविष्ये	असेविष्यावहि	असेविष्यामहि
लभ् 1A. to get	अलप्स्यत	अलप्स्येताम्	अलप्स्यन्त	अलप्स्यथाः	अलप्स्येथाम्	अलप्स्यध्वम्	अलप्स्ये	अलप्स्यावहि	अलप्स्यामहि
मन् 4A. to think	अमंस्यत	अमंस्येताम्	अमंस्यन्त	अमंस्यथाः	अमंस्येथाम्	अमंस्यध्वम्	अमंस्ये	अमंस्यावहि	अमंस्यामहि

सह्, दय्, क्षम्, वन्द्, भाष्, शिक्ष्, भिक्ष्, त्वर्, चेष्ट्, घट्, जृम्भ्, कम्प्, बाध्, ईह्, याच्, एध्, स्पन्द्, स्पर्ध्, लम्ब्, राज्, वेप्, शङ्क्, लङ्घ्, प्रति-ईक्ष्, प्र-यत्, प्र-काश्, परा-अय्, जन्, मुद्, द्युत्, रुच्, शुभ्, वृत्, वृध्, क्लिश्, दीप्, ली, प्र-सू, डी, रम्, आ-रभ्, त्रै, भज्, युज्, बुध्, युध्, खिद्, विद् इति एतेषां धातूनां लृट्लकार(भविष्यत्काल)रूपाणि लङ्लकार(भूतकाल)रूपाणि च दृष्ट्वा लृङ्लकाररूपाणि लिख। यथा, सेव् (लृट्—सेविष्यते, लङ्—असेवत)—असेविष्यत। सह्—असहिष्यत। दय्—अदयिष्यत। लङ्घ्—अलङ्घिष्यत। प्रति-ईक्ष्—प्रत्यैक्षिष्यत। प्र-यत्—प्रायतिष्यत। परा-अय्—पलायिष्यत। आ-रभ्—आरप्स्यत।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

६. विधिलिङ्लकारः (Potential mood)

	प्रथमपुरुषः			मध्यमपुरुषः			उत्तमपुरुषः		
	सः	तौ	ते	त्वम्	युवाम्	यूयम्	अहम्	आवाम्	वयम्
अस् २प. होना	स्यात्	स्याताम्	स्युः	स्याः	स्यातम्	स्यात	स्याम्	स्याव	स्याम
पठ् १प. पढ़ना	पठेत्	पठेताम्	पठेयुः	पठेः	पठेतम्	पठेत	पठेयम्	पठेव	पठेम
वद् १प. बोलना	वदेत्	वदेताम्	वदेयुः	वदेः	वदेतम्	वदेत	वदेयम्	वदेव	वदेम
गम् १प. जाना	गच्छेत्	गच्छेताम्	गच्छेयुः	गच्छेः	गच्छेतम्	गच्छेत	गच्छेयम्	गच्छेव	गच्छेम
स्था १प. ठहरना	तिष्ठेत्	तिष्ठेताम्	तिष्ठेयुः	तिष्ठेः	तिष्ठेतम्	तिष्ठेत	तिष्ठेयम्	तिष्ठेव	तिष्ठेम
पा १प. पीना	पिबेत्	पिबेताम्	पिबेयुः	पिबेः	पिबेतम्	पिबेत	पिबेयम्	पिबेव	पिबेम
दृश् १प. देखना	पश्येत्	पश्येताम्	पश्येयुः	पश्येः	पश्येतम्	पश्येत	पश्येयम्	पश्येव	पश्येम
नी १उ. ले जाना	नयेत्	नयेताम्	नयेयुः	नयेः	नयेतम्	नयेत	नयेयम्	नयेव	नयेम
भू १प. होना	भवेत्	भवेताम्	भवेयुः	भवेः	भवेतम्	भवेत	भवेयम्	भवेव	भवेम
कथ् १०उ. कहना	कथयेत्	कथयेताम्	कथयेयुः	कथयेः	कथयेतम्	कथयेत	कथयेयम्	कथयेव	कथयेम
लिख् ६प. लिखना	लिखेत्	लिखेताम्	लिखेयुः	लिखेः	लिखेतम्	लिखेत	लिखेयम्	लिखेव	लिखेम
इष् ६प. चाहना	इच्छेत्	इच्छेताम्	इच्छेयुः	इच्छेः	इच्छेतम्	इच्छेत	इच्छेयम्	इच्छेव	इच्छेम
प्रच्छ् ६प. पूछना	पृच्छेत्	पृच्छेताम्	पृच्छेयुः	पृच्छेः	पृच्छेतम्	पृच्छेत	पृच्छेयम्	पृच्छेव	पृच्छेम

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नृत् ४प. नाचना	नृत्येत्	नृत्येताम्	नृत्येयुः	नृत्येः	नृत्येतम्	नृत्येत	नृत्येयम्	नृत्येव	नृत्येम
कृ ८उ. करना	कुर्यात्	कुर्याताम्	कुर्युः	कुर्याः	कुर्यातम्	कुर्यात	कुर्याम्	कुर्याव	कुर्याम
श्रु ५प. सुनना	शृणुयात्	शृणुयाताम्	शृणुयुः	शृणुयाः	शृणुयातम्	शृणुयात	शृणुयाम्	शृणुयाव	शृणुयाम
शक् ५प. समर्थ होना	शक्नुयात्	शक्नुयाताम्	शक्नुयुः	शक्नुयाः	शक्नुयातम्	शक्नुयात	शक्नुयाम्	शक्नुयाव	शक्नुयाम
प्र+आप् ५प. पाना	प्राप्नुयात्	प्राप्नुयाताम्	प्राप्नुयुः	प्राप्नुयाः	प्राप्नुयातम्	प्राप्नुयात	प्राप्नुयाम्	प्राप्नुयाव	प्राप्नुयाम
ज्ञा ९उ. जानना	जानीयात्	जानीयाताम्	जानीयुः	जानीयाः	जानीयातम्	जानीयात	जानीयाम्	जानीयाव	जानीयाम
ग्रह् ९उ. लेना	गृह्णीयात्	गृह्णीयाताम्	गृह्णीयुः	गृह्णीयाः	गृह्णीयातम्	गृह्णीयात	गृह्णीयाम्	गृह्णीयाव	गृह्णीयाम
क्री ९उ. खरीदना	क्रीणीयात्	क्रीणीयाताम्	क्रीणीयुः	क्रीणीयाः	क्रीणीयातम्	क्रीणीयात	क्रीणीयाम्	क्रीणीयाव	क्रीणीयाम
दा ३उ. देना	दद्यात्	दद्याताम्	दद्युः	दद्याः	दद्यातम्	दद्यात	दद्याम्	दद्याव	दद्याम
सेव् १आ. सेवा करना	सेवेत	सेवेयाताम्	सेवेरन्	सेवेथाः	सेवेयाथाम्	सेवेध्वम्	सेवेय	सेवेवहि	सेवेमहि
लभ् १आ. लाभ करना	लभेत	लभेयाताम्	लभेरन्	लभेथाः	लभेयाथाम्	लभेध्वम्	लभेय	लभेवहि	लभेमहि
मन् ४आ. सोचना	मन्येत	मन्येयाताम्	मन्येरन्	मन्येथाः	मन्येयाथाम्	मन्येध्वम्	मन्येय	मन्येवहि	मन्येमहि

सह्, दय्, क्षम्, भज्, वन्द्, भाष्, शिक्ष्, भिक्ष्, त्वर्, चेष्ट्, घट्, जृम्भ्, कम्प्, बाध्, ईह्, याच्, एध्, स्पन्द्, स्पर्ध्, लम्ब्, राज्, रम्, वेप्, शङ्क्, लङ्घ्, प्रति-ईक्ष्, प्र-यत्, आ-रभ्, प्र-काश्, परा-अय्। यथा, सेव्—सेवेत। सह्—सहेत। प्रति-ईक्ष्—प्रतीक्षेत। परा-अय्—पलायेत॥ डी—डयेत। त्रै—त्रायेत॥ मुद्, द्युत्, रुच्, शुभ्, वृत्, वृध्। यथा, मुद्—मोदेत। वृत्—वर्तेत॥ बुध्, युध्, युज्, विद्, खिद्, क्लिश्, दीप्। यथा, मन्—मन्येत। बुध्—बुध्येत। दीप्—दीप्येत॥ ली—लीयेत। प्र-सू—प्रसूयेत। जन्—जायेत॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सप्तदशः पाठः

माला (प्रातिपदिकम्—stem, मूलशब्दः यस्य रूपाणि भवन्ति)

एषा (एका) माला । एते (द्वे) माले । एताः (तिस्रः/चतस्रः/पञ्च…) मालाः । अहम् एताम् (एकाम्) मालाम् आश्रमं नेष्यामि । अहम् एते (द्वे) माले आश्रमं नेष्यामि । अहम् एताः (तिस्रः/चतस्रः/पञ्च…) मालाः आश्रमं नेष्यामि । अहम् एतया (एकया) दीर्घया मालया समाधिं भूषयिष्यामि । अहम् एताभ्यां (द्वाभ्याम्) दीर्घाभ्यां मालाभ्यां समाधिं भूषयिष्यामि । अहम् एताभिः (तिसृभिः/चतसृभिः/पञ्चभिः…) दीर्घाभिः मालाभिः समाधिं भूषयिष्यामि । अहम् एतस्यै (एकस्यै) मालायै रूप्यकद्वयं दत्तवान् । मया एतस्यै (एकस्यै) मालायै रूप्यकद्वयं दत्तम् । अहम् एताभ्यां (द्वाभ्याम्) मालाभ्यां रूप्यकत्रयं दत्तवान् न तु रूप्यकचतुष्टयं यतो हि रूप्यकमेकम् अवमोकत्वेन प्राप्तम् । मया एताभ्यां (द्वाभ्याम्) मालाभ्यां रूप्यकत्रयं दत्तम् । अहम् एताभ्यः (तिसृभ्यः/चतसृभ्यः/पञ्चभ्यः…) मालाभ्यः रूप्यकपञ्चकं (-षट्कम्/-सप्तकम्/-अष्टकम्/-नवकम्/-दशकम्…) दत्तवान् । मया एताभ्यः (तिसृभ्यः/चतसृभ्यः/पञ्चभ्यः…) मालाभ्यः रूप्यकपञ्चकं (-षट्कम्/-सप्तकम्/-अष्टकम्/-नवकम्/-दशकम्…) दत्तम् । एतस्याः (एकस्याः) मालायाः पिपीलिकान् बहिष्कुरु । एताभ्यां (द्वाभ्याम्) मालाभ्यां पिपीलिकान् बहिष्कुरु । एताभ्यः (तिसृभ्यः/चतसृभ्यः/पञ्चभ्यः…) मालाभ्यः पिपीलिकान् बहिष्कुरु । एतस्याः (एकस्याः) मालायाः अधिकारिणी श्रीमाता । एतयोः (द्वयोः) मालयोः अधिकारिणी श्रीमाता । एतासां (तिसृणाम्/चतसृणाम्/पञ्चानाम्…) मालानाम् अधिकारिणी श्रीमाता । एतस्याम् (एकस्याम्) मालायां पर्याप्तः सुगन्धः अस्ति । एतयोः (द्वयोः) मालयोः पर्याप्तः सुगन्धः अस्ति । एतासु (तिसृषु/चतसृषु/पञ्चसु…) मालासु पर्याप्तः सुगन्धः अस्ति । हे माले, अहो मनोहरा त्वम् ! हे माले, अहो मनोहरे युवाम् ! हे मालाः, अहो मनोहराः यूयम् !

त्वज्जीवनं पुष्प सुधन्यधन्यं
समर्प्यसे यत् प्रभुपादपद्मे ।
मालाश्च ते संग्रथिताः सुरम्या
विभूषयन्ते महतां शिरांसि ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सार्थान्वयः—[हे] पुष्प, त्वज्जीवनं (तव जीवनम्) सुधन्यधन्यम् (अतिशयेन धन्यम्) यत् (यतो हि) [त्वम्] प्रभुपादपद्मे समर्प्यसे (समर्पितं भवसि), ते (तव) संग्रथिताः सुरम्याः मालाः च महतां शिरांसि (महापुरुषाणां मस्तकानि) विभूषयन्ते (शोभयन्ते)।

गुणवज्जनसंसर्गाद् याति नीचोऽपि गौरवम्।
पुष्पमालाप्रसङ्गेन सूत्रं शिरसि धार्यते ॥

सार्थान्वयः—नीचः अपि गुणवज्जनसंसर्गाद् गौरवं याति। अधमः अपि गुणिजनसङ्गलाभेन गौरवान्वितः/सम्मानितः भवति। [यथा] पुष्पमालाप्रसङ्गेन सूत्रं शिरसि धार्यते। यथा पुष्पमालायाः प्रकृष्टसङ्गेन, उत्तमसंसर्गेण सूत्रमपि (तुच्छं वस्तु अपि) [जनः] मस्तके धारयति।

माला (आकारान्तस्त्रीलिङ्गशब्दः)

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	माला	माले	मालाः
द्वितीया	मालाम्	माले	मालाः
तृतीया	मालया	मालाभ्याम्	मालाभिः
चतुर्थी	मालायै	मालाभ्याम्	मालाभ्यः
पञ्चमी	मालायाः	मालाभ्याम्	मालाभ्यः
षष्ठी	मालायाः	मालयोः	मालानाम्
सप्तमी	मालायाम्	मालयोः	मालासु
संबोधनम्	माले	माले	मालाः

सर्वनामशब्दाः सङ्ख्याशब्दाश्च स्त्रीलिङ्गे

प्रथमा विभक्तिः

	एकव०	द्विव०	बहुव०		एकव०	द्विव०	बहुव०
(तद्)	सा	ते	ताः ।	(स्व)	स्वा	स्वे	स्वाः
(एतद्)	एषा	एते	एताः ।	(एक)	एका	—	—
(यद्)	या	ये	याः ।	(द्वि)	—	द्वे	—
(किम्)	का	के	काः ।	(उभ)	—	उभे	—

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(सर्व) सर्वा	सर्वे	सर्वाः	।	(त्रि) —	—	तिस्रः
(अन्य) अन्या	अन्ये	अन्याः	।	(चतुर्) —	—	चतस्रः
(इदम्) इयम्	इमे	इमाः	।	(पञ्चन्) —	—	पञ्च
(इतर) इतरा	इतरे	इतराः	।	(षष्) —	—	षट्/षड्
(अपर) अपरा	अपरे	अपराः	।	(सप्तन्) —	—	सप्त
(पूर्व) पूर्वा	पूर्वे	पूर्वाः	।	(अष्टन्) —	—	अष्ट

द्वितीया विभक्तिः

एकव०	द्विव०	बहुव०		एकव०	द्विव०	बहुव०
ताम्	ते	ताः	।	स्वाम्	स्वे	स्वाः
एताम्	एते	एताः	।	एकाम्	—	—
याम्	ये	याः	।	—	द्वे	—
काम्	के	काः	।	—	उभे	—
सर्वाम्	सर्वे	सर्वाः	।	—	—	तिस्रः
अन्याम्	अन्ये	अन्याः	।	—	—	चतस्रः
इमाम्	इमे	इमाः	।	—	—	पञ्च
इतराम्	इतरे	इतराः	।	—	—	षट्/षड्
अपराम्	अपरे	अपराः	।	—	—	सप्त
पूर्वाम्	पूर्वे	पूर्वाः	।	—	—	अष्ट

तृतीया विभक्तिः

एकव०	द्विव०	बहुव०		एकव०	द्विव०	बहुव०
तया	ताभ्याम्	ताभिः	।	स्वया	स्वाभ्याम्	स्वाभिः
एतया	एताभ्याम्	एताभिः	।	एकया	—	—
यया	याभ्याम्	याभिः	।	—	द्वाभ्याम्	—
कया	काभ्याम्	काभिः	।	—	उभाभ्याम्	—
सर्वया	सर्वाभ्याम्	सर्वाभिः	।	—	—	तिसृभिः
अन्यया	अन्याभ्याम्	अन्याभिः	।	—	—	चतसृभिः
अनया	आभ्याम्	आभिः	।	—	—	पञ्चभिः
इतरया	इतराभ्याम्	इतराभिः	।	—	—	षड्भिः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अपरया	अपराभ्याम्	अपराभिः	।	—	—	सप्तभिः
पूर्वया	पूर्वाभ्याम्	पूर्वाभिः	।	—	—	अष्टभिः

चतुर्थी विभक्तिः

एकव०	द्विव०	बहुव०		एकव०	द्विव०	बहुव०
तस्यै	ताभ्याम्	ताभ्यः	।	स्वस्यै	स्वाभ्याम्	स्वाभ्यः
एतस्यै	एताभ्याम्	एताभ्यः	।	एकस्यै	—	—
यस्यै	याभ्याम्	याभ्यः	।	—	द्वाभ्याम्	—
कस्यै	काभ्याम्	काभ्यः	।	—	उभाभ्याम्	—
सर्वस्यै	सर्वाभ्याम्	सर्वाभ्यः	।	—	—	तिसृभ्यः
अन्यस्यै	अन्याभ्याम्	अन्याभ्यः	।	—	—	चतसृभ्यः
अस्यै	आभ्याम्	आभ्यः	।	—	—	पञ्चभ्यः
इतरस्यै	इतराभ्याम्	इतराभ्यः	।	—	—	षड्भ्यः
अपरस्यै	अपराभ्याम्	अपराभ्यः	।	—	—	सप्तभ्यः
पूर्वस्यै	पूर्वाभ्याम्	पूर्वाभ्यः	।	—	—	अष्टभ्यः

पञ्चमी विभक्तिः

एकव०	द्विव०	बहुव०		एकव०	द्विव०	बहुव०
तस्याः	ताभ्याम्	ताभ्यः	।	स्वस्याः	स्वाभ्याम्	स्वाभ्यः
एतस्याः	एताभ्याम्	एताभ्यः	।	एकस्याः	—	—
यस्याः	याभ्याम्	याभ्यः	।	—	द्वाभ्याम्	—
कस्याः	काभ्याम्	काभ्यः	।	—	उभाभ्याम्	—
सर्वस्याः	सर्वाभ्याम्	सर्वाभ्यः	।	—	—	तिसृभ्यः
अन्यस्याः	अन्याभ्याम्	अन्याभ्यः	।	—	—	चतसृभ्यः
अस्याः	आभ्याम्	आभ्यः	।	—	—	पञ्चभ्यः
इतरस्याः	इतराभ्याम्	इतराभ्यः	।	—	—	षड्भ्यः
अपरस्याः	अपराभ्याम्	अपराभ्यः	।	—	—	सप्तभ्यः
पूर्वस्याः	पूर्वाभ्याम्	पूर्वाभ्यः	।	—	—	अष्टभ्यः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

षष्ठी विभक्तिः

एकव०	द्विव०	बहुव०		एकव०	द्विव०	बहुव०
तस्याः	तयोः	तासाम्	।	स्वस्याः	स्वयोः	स्वासाम्
एतस्याः	एतयोः	एतासाम्	।	एकस्याः	—	—
यस्याः	ययोः	यासाम्	।	—	द्वयोः	—
कस्याः	कयोः	कासाम्	।	—	उभयोः	—
सर्वस्याः	सर्वयोः	सर्वासाम्	।	—	—	तिसृणाम्
अन्यस्याः	अन्ययोः	अन्यासाम्	।	—	—	चतसृणाम्
अस्याः	अनयोः	आसाम्	।	—	—	पञ्चानाम्
इतरस्याः	इतरयोः	इतरासाम्	।	—	—	षण्णाम्
अपरस्याः	अपरयोः	अपरासाम्	।	—	—	सप्तानाम्
पूर्वस्याः	पूर्वयोः	पूर्वासाम्	।	—	—	अष्टानाम्

सप्तमी विभक्तिः

एकव०	द्विव०	बहुव०		एकव०	द्विव०	बहुव०
तस्याम्	तयोः	तासु	।	स्वस्याम्	स्वयोः	स्वासु
एतस्याम्	एतयोः	एतासु	।	एकस्याम्	—	—
यस्याम्	ययोः	यासु	।	—	द्वयोः	—
कस्याम्	कयोः	कासु	।	—	उभयोः	—
सर्वस्याम्	सर्वयोः	सर्वासु	।	—	—	तिसृषु
अन्यस्याम्	अन्ययोः	अन्यासु	।	—	—	चतसृषु
अस्याम्	अनयोः	आसु	।	—	—	पञ्चसु
इतरस्याम्	इतरयोः	इतरासु	।	—	—	षट्सु
अपरस्याम्	अपरयोः	अपरासु	।	—	—	सप्तसु
पूर्वस्याम्	पूर्वयोः	पूर्वासु	।	—	—	अष्टसु

इत्थम् नवन्, दशन्, एकादशन्, द्वादशन्, त्रयोदशन्, चतुर्दशन्, पञ्चदशन्, षोडशन्, सप्तदशन्, अष्टादशन्, नवदशन् इति एतासां सर्वासां सङ्ख्यानामपि रूपाणि बोध्यानि ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अभ्यासाः

१. 'कला'('पल'minute)वाचकशब्दस्य एकवचनरूपैः रिक्तस्थानानि पूरय—

वर्गारम्भे एकाग्रतायै एका—दातव्या/इष्यते। अस्मासु केचन वर्गारम्भे एकाग्रतायै एकां—इच्छन्ति। एकाग्रतायै अस्माकं केवलम् एकया—प्रयोजनम्। एतया एकया—अस्माकं बहुलाभो भवेत्। आगम्यताम्, एकाग्रतार्थं वयम् एकस्यै—स्पृहयेम। एकस्याः—अधिककालं वयं न इच्छामः/कामयामहे। एकाग्रतार्थम् एकस्याः—मूल्यम् असामान्यम्। एतस्याम् एकस्यां—वयं श्रीमातरं ध्यास्यामः संस्कृतज्ञानप्रदानार्थम्। हे एकाग्रताकालीने—, जीवने तवैव महत्त्वं सर्वातिशायि/सर्वाधिकम्!

२. 'कलिका'शब्दस्य एकवचनरूपैः रिक्तस्थानानि पूरय—

इयं मनोहरा—। अहम् इमां—रोचये/इच्छामि। अनया—मम प्रयोजनम्। अहम् अस्यै—स्पृहयामि। अहम् अस्यै—रूप्यकमेकमपि दातुं शक्नोमि। भ्रमरः अस्याः—मधु सञ्चेतुं/संग्रहीतुं न शक्नोति। अस्याः—नाम किम्? अस्याः—रङ्गः हरितः। अस्यां—अहम् अत्यधिकं स्निह्यामि। हे—, त्वं कियत् मनोहरा/शोभना!

३. तर्पिका(toffee)शब्दस्य विभक्तिरूपैः रिक्तस्थानानि पूरय—

एषा—। एते—। एताः—। इयम् एका—। इमे द्वे—। इमाः तिस्रः/चतस्रः/पञ्च··· —। अहं ताम् एकां—इच्छामि। आवां ते द्वे—इच्छावः। वयं ताः तिस्रः/चतस्रः/पञ्च··· —इच्छामः। कृपया तया एकया—(त्वं) मां तर्पय प्रीणय/तोषय। कृपया ताभ्यां द्वाभ्यां—(त्वम्) आवां तर्पय/प्रीणय/तोषय। कृपया ताभिः तिसृभिः/चतसृभिः/पञ्चभिः··· —(त्वम्) अस्मान् तर्पय/प्रीणय/तोषय। तया एकया—मम प्रयोजनम्। ताभ्यां द्वाभ्यां—आवयोः प्रयोजनम्। ताभिः तिसृभिः/चतसृभिः/पञ्चभिः··· —अस्माकं प्रयोजनम्। तस्यै एकस्यै—अहं स्पृहयामि। ताभ्यां द्वाभ्यां—आवां स्पृहयावः। ताभ्यः तिसृभ्यः/चतसृभ्यः/पञ्चभ्यः··· —वयं स्पृहयामः। तस्यै एकस्यै—त्वया कियत् धनं दत्तम्? ताभ्यां द्वाभ्यां—त्वया कियत् धनं दत्तम्? ताभ्यः तिसृभ्यः/चतसृभ्यः/पञ्चभ्यः ···—त्वया कियत् धनं दत्तम्? त्वं तस्याः एकस्याः—आवरणम् अवमुच्य/उद्घाट्य तां मह्यं देहि। त्वं तयोः द्वयोः—आवरणम्

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अपवार्य ते आवाभ्यां देहि । त्वं तासां तिसृणाम्/चतसृणाम्/पञ्चानाम्… — आवरणानि अवमुच्य ताः अस्मभ्यं देहि । तस्याम् एकस्यां—मम लालसा अस्ति । तयोः द्वयोः—आवयोः लालसा अस्ति । तासु तिसृषु/चतसृषु/पञ्चसु… — अस्माकं लालसा अस्ति । हे —, त्वदर्थं मम जिह्वा लालायते/लालायिता भवति । हे—, युवयोः कृते/युष्मदर्थम् आवयोः जिह्वे लालायेते/लालायिते भवतः । हे—, युष्माकम् अर्थे/युष्मदर्थम् अस्माकं जिह्वाः लालायन्ते/लालायिताः भवन्ति ।

आकारान्तस्त्रीलिङ्गशब्दाः

अर्चना	अजा	अपेक्षा	अनामिका	अमावास्या
अनुकम्पा	अवज्ञा	असूया	अनिद्रा	अस्वस्थता
अट्टालिका	अर्गलिका	आशा	आमिक्षा	आस्था
आतुरता	आजीविका	इष्टका	इच्छा	ईर्ष्या/र्षा
उल्का	उत्कण्ठा	उपमा	उपेक्षा	उमा
उषा	एकाग्रता	एला	कन्या	करुणा
कन्था	कविता	कालिका	कान्ता	कृतज्ञता
कृपा	कुल्या	केका	कृतघ्नता	कथा
कण्ठभूषा	कृशरा	कुथा	क्रीडा	क्रिया
कल्पना	कामना	कारा	क्षमा	क्षुधा
क्षीरिका	खट्वा	खेला	गङ्गा	गदा
गवेषणा	गाथा	गुहा	ग्रीवा	गोवत्सा
गोशाला	गुटिका	घृणा	घण्टा	चिता
चिन्ता	चूडा	चेष्टा	चपला	चिञ्चा
चर्चा	चिकित्सा	चेतना	चपेटिका	छाया
छुरिका	छोटिका	छिक्का	जटा	जनता
जाया	जिज्ञासा	जिह्वा	जीविका	ज्योत्स्ना
ज्वाला	जङ्घा	जृम्भा	जरा	जडता
जलौका	जलक्रीडा	जवा	झञ्झा	टङ्का
टोपिका	ढक्का	तन्द्रा	तमिस्रा	तारा
तितिक्षा	तूलिका	तृष्णा	तीव्रता	तपस्या
तुला	तालिका	दशा	दीक्षा	दया
द्राक्षा	दूर्वा	दुर्गा	दशहरा	दक्षिणा

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

देवता	धारा	धारणा	धरा	नासा
नासिका	नीहारिका	नौका	नायिका	नम्रता
निद्रा	निष्ठा	पर्शुका	पूर्णिमा	पुत्तलिका
पिपीलिका	प्रज्ञा	पिपासा	प्रतियोगिता	प्लीहा
परिचारिका	पूरिका	प्रतिमा	प्रतिपदा	पीडा
पुस्तिका	पट्टिका	प्रशंसा	प्रेरणा	प्रार्थना
पृच्छा	परम्परा	प्रसन्नता	प्रतिज्ञा	पेटिका
फणा	वाधा	बालिका	बाला	बुभुक्षा
भार्या	भाषा	भिक्षा	भ्रूलता	भ्रातृद्वितीया
माया	मदिरा	मनीषा	मरीचिका	मर्यादा
महिला	मुक्ता	मुद्रा	मृत्तिका	मक्षिका
मृगया	मेधा	मज्जा	मसूरिका	मात्रा
मञ्जूषा	मुष्टिका	मल्लिका	याच्ञा	यवनिका
यूथिका	यूका	यात्रा	यातना	रोटिका
रेखा	रसना	रक्षा	रथ्या	लता
लज्जा	ललना	लालसा	वनिता	वसुधा
वाञ्छा	विद्या	वन्दना	वेला	विष्ठा
विधवा	वन्ध्या	वालुका	वासना	व्यथा
व्यवस्था	वीणा	शिक्षा	शय्या	शाखा
शाला	शिखा	शिला	शोभा	शीघ्रता
शर्करा	शुण्डा	श्रद्धा	शलाका	शृङ्खला
शुश्रूषा	सभा	सिकता	सुधा	सेना
सारिका	स्पर्धा	सेविका	सुता	सन्ध्या
स्पृहा	सभ्यता	समस्या	सेवा	सहिष्णुता
सीमा	सिता	हरिद्रा	हिक्का	होरा

अनुक्रामिका relay race. उल्लङ्घनिका pole vault competition. ईर्यनौका motor-lunch. कुण्डलिका jilbi. कोषिका cassette. चरणिका walking competition. छत्रिका jelly-fish. जन्मपत्रिका horoscope. धावनिका race. फालका cricket. मल्लयुद्धमेलिका wrestling tournament. यन्त्रधारा shower.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

लानिका tennis tournament/tennis player(f.) स्थालिका plate. समूहा battery. समिदा wheat flour. स्वरन्धरा harmonium.

शान्ति (प्रातिपदिकम्—इकारान्तस्त्रीलिङ्गशब्दः)

ॐ शान्तिः शान्तिः शान्तिः !

वयं सर्वत्र शान्तिम् इच्छामः। संसारे सर्वे शान्त्या वसन्तु/तिष्ठन्तु/जीवनं यापयन्तु। वयं शान्त्यै भगवन्तं प्रार्थयामः। शान्त्याः सुखम् उद्भवति। शान्त्याः महिमा/प्रभावः अमेयः। शान्त्यां साधनायाः तत्त्वं निहितम्। हे शान्ते, त्वं सदा मुनिजनसुलभा ननु। त्वं मम चञ्चलं मनः/मानसं प्राणं च शमय, मयि प्रसन्ना भव।

*

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम्॥ (गीता २.६६)

सार्थान्वयः—अयुक्तस्य (असमाहितचित्तस्य/अवशीकृतेन्द्रियस्य/असंयमिजनस्य) बुद्धिः (बोधशक्तिः) नास्ति (न भवति), अयुक्तस्य भावना (ध्यानम्, आत्मचिन्तनम्) च न [नास्ति], अभावयतः (अध्यानशीलस्य) च शान्तिः न, अशान्तस्य कुतः सुखम्? (अशान्तस्य सुखं कथं सम्भवति? न कथमपि इत्यर्थः)।

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्॥ (गीता १२.१२)

सार्थान्वयः—अभ्यासात्* (अभ्यासापेक्षया) ज्ञानं हि श्रेयः (श्रेष्ठतरम्), ज्ञानात् ध्यानं विशिष्यते (विशिष्टम्, विशेषस्तरीयम्), ध्यानात् कर्मफलत्यागः [श्रेष्ठतरः], त्यागात् अनन्तरं (परम्) शान्तिः [संभवति इति शेषः]।

---

* चित्तस्य एकस्मिन् आलम्बने बाह्ये प्रतिमादौ आभ्यन्तरे विराड्रूपादौ वा सर्वतः समाहृत्य पुनः पुनः स्थापनम् अभ्यासः, यद्वा विक्षिप्तं चित्तं पुनः प्रत्याहृत्य मम (श्रीकृष्णस्य) अनुस्मरणम् एव अभ्यासः।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रकृति

एकः पुरुषः एका च प्रकृतिः अस्ति । ऋषिः अस्मिन् विश्वे एकं पुरुषम् एकां प्रकृतिं च लीलारतौ पश्यति । आत्मसचेतनः जनः प्रकृतिं पुरुषात् पृथक्कर्तुं क्षमः/समर्थः । एकेन पुरुषेण एकया प्रकृत्या च इदं सर्वं सृष्टम्/विस्तारितम् । एकस्मै पुरुषाय एकस्यै प्रकृत्यै च नमः । एकस्मात् पुरुषात् एकस्याः प्रकृत्याः च इदं सर्वम् उत्पन्नम्/सम्भूतम् । एकस्य पुरुषस्य एकस्याः प्रकृत्याः च लीला इदं विश्वम् । एकस्मिन् पुरुषे एकस्यां प्रकृत्यां च मम आस्था/विश्वासः दृढतरा/रः भवतु । हे प्रकृते, त्वं नूनम्/सत्यम् अशेषलीलामयी ।

प्रकृतिं पुरुषं चैव विद्धयनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान् ।। (गीता १३.१९)

सार्थान्वयः—प्रकृतिं पुरुषं च एव उभौ अपि (द्वौ अपि) अनादी (न विद्यते आदिः ययोः तौ) विद्धि (जानीहि) । विकारान् च गुणान् च एव प्रकृति-सम्भवान् (प्रकृतेः सम्भवन्ति/जायन्ते इति तान्) विद्धि (अवगच्छ) ।

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ।। (गीता ७.४)

सार्थान्वयः—भूमिः, आपः (जलम्), अनलः (अग्निः), वायुः, खम् (आकाशः), मनः, बुद्धिः अहंकारः च एव इति इयं मे (मम, पुरुषोत्तमस्य श्रीकृष्णस्य) प्रकृतिः (पारमेश्वरी मायाशक्तिः) अष्टधा (अष्टभिः प्रकारैः) भिन्ना (विभक्ता, विभागं प्राप्ता) ।

अभ्यासाः

१. 'अङ्गुलि'शब्दस्य विभक्तिरूपैः रिक्तस्थानानि पूरय—

एषा एका—। एते द्वे—। एताः तिस्रः/चतस्रः/पञ्च/विंशतिः— । अहं त्वाम् एताम् एकाम्—दर्शयामि । अहं त्वाम् एते द्वे—दर्शयामि । अहं त्वाम् एताः तिस्रः/चतस्रः/पञ्च/विंशतिम्—दर्शयामि । सा भूमौ एकया—लिखति । श्रीकृष्णः एकया— सुदर्शनचक्रं गोवर्धनं च अधरत् । सः द्वाभ्याम्—दण्डान् कर्तुं शक्नोति । अहं दशभिः—दण्डान् करोमि । मया एकस्यै—अङ्गुली(री)यकं क्रीतम् । तया द्वाभ्याम्—अङ्गुलीयके क्रीते । मालत्या तिसृभ्यः—अङ्गुलीयकानि

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

क्रीतानि। अहम् एतस्याः—अङ्गुलीयकं निःसारयामि/निष्कासयामि। सा द्वाभ्याम्—अङ्गुलीयके निःसारयतु। मालती तिसृभ्यः—अङ्गुलीयकानि निःसारयतु। एतस्याः लघुतमायाः कृशतमायाः च—नाम कनिष्ठिका। एतयोः (द्वयोः)—नामनी कनिष्ठिकानामिके। एतासां पञ्चानाम्—नामानि अङ्गुष्ठः (स्थूलतमः), तर्जनी, मध्यमा, अनामिका कनिष्ठिका च इति। मम एतस्याम्—अङ्गुलीयकम् अस्ति। तस्याः द्वयोः—अङ्गुलीयके स्तः। मालत्याः तिसृषु—अङ्गुलीयकानि सन्ति। हे श्रीमातुः प्रतीकयुक्तेन अङ्गुलीयकेन भूषिते—, त्वं मम सम्पूर्णहस्तस्य शोभां वर्धयसि खलु। हे श्रीमातुः प्रतीकयुक्ताभ्याम् अङ्गुलीयकाभ्यां भूषिते—, युवां तस्याः हस्तौ शोभयथः खलु। हे श्रीअरविन्दस्य प्रतीकयुक्तैः अङ्गुलीयकैः मण्डिताः—, यूयं मालत्याः हस्तौ नूनम् अत्यन्तं शोभयथ।

मति

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	मतिः	मती	मतयः
द्वितीया	मतिम्	मती	मतीः
तृतीया	मत्या	मतिभ्याम्	मतिभिः
चतुर्थी	मत्यै, मतये	मतिभ्याम्	मतिभ्यः
पञ्चमी	मत्याः, मतेः	मतिभ्याम्	मतिभ्यः
षष्ठी	मत्याः, मतेः	मत्योः	मतीनाम्
सप्तमी	मत्याम्, मतौ	मत्योः	मतिषु
संबोधनम्	मते	मती	मतयः

इकारान्तस्त्रीलिङ्गशब्दाः

(इकारान्तशब्दस्य अन्ते विसर्गं योजयित्वा पठ्यताम्)

अङ्गुलि/ली	अवनि/नी	अनुरक्ति	आर्ति	आसक्ति
आकृति	आहुति	उन्नति	उत्पत्ति	ऋद्धि
कटि/टी	कान्ति	कीर्ति	कृति	कृषि
क्षिति	खनि	गति	ग्लानि	च्युति
जाति	तृप्ति	तिथि	द्युति	दृष्टि
धूलि	धृति	नति	नियति	निवृत्ति

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पङ्क्ति	पद्धति	प्रकृति	प्रणति	प्रवृत्ति
प्रीति	पूति	प्रतीति	बुद्धि	भक्ति
भूमि	भ्रूकुटि/टी	भीति	भ्रान्ति	मुक्ति
मूर्ति	मुष्टि	यष्टि	युक्ति	युवति/ती
रति	राजि/जी	रात्रि/त्री	रीति	रुचि
राजनीति	लहरि/री	लिपि	विपत्ति	विरक्ति
विभूति	वेणि/णी	वेदि/दी	व्यक्ति	वनस्पति
वृष्टि	विस्मृति	वान्ति	शक्ति	शुद्धि
शुक्ति	शान्ति	श्रुति	सिद्धि	समिति
स्तुति	सृष्टि	स्थिति	समाप्ति	स्मृति
सुषुप्ति	सम्पत्ति	समष्टि	सन्तति	स्वीकृति

अवधेयम्

ऊनविंशति/एकोनविंशति, विंशति, एकविंशति, द्वाविंशति, त्रयोविंशति, चतुर्विंशति, पञ्चविंशति, षड्विंशति, सप्तविंशति, अष्टाविंशति, नवविंशति, ऊनषष्टि/एकोनषष्टि, षष्टि, एकषष्टि, द्वाषष्टि/द्विषष्टि, त्रिषष्टि/त्रयःषष्टि, चतुःषष्टि, पञ्चषष्टि, षट्षष्टि, सप्तषष्टि, अष्टाषष्टि/अष्टषष्टि, नवषष्टि/एकोन/ऊनसप्तति, सप्तति, एकसप्तति, द्वा/द्विसप्तति, त्रि/त्रयःसप्तति, चतुःसप्तति, पञ्चसप्तति, षट्सप्तति, सप्तसप्तति, अष्ट/अष्टासप्तति, नवसप्तति/एकोना/ऊनाशीति, अशीति, एकाशीति, द्व्यशीति, त्र्यशीति, चतुरशीति, पञ्चाशीति, षडशीति, सप्ताशीति, अष्टाशीति, नवाशीति/एकोन/ऊननवति, नवति, एकनवति, द्वानवति/द्विनवति, त्रयोनवति/त्रिनवति, चतुर्नवति, पञ्चनवति, षण्णवति, सप्तनवति, अष्ट/अष्टानवति, नवनवति* ।

---

*शुद्धसङ्ख्यारूपेण विशेषणरूपेण च ऊनविंशतितः नवविंशतिपर्यन्तानाम्, ऊनषष्टितः नवनवतिपर्यन्तानां सङ्ख्यानां रूपाणि न विशेष्याधीनानि, तानि तु नित्यम् इकारान्तस्त्रीलिङ्गस्य एकवचनवत् भवन्ति । तद्यथा—विंशतिः बालकाः, बालिकाः मित्राणि वा । विंशतिं बालकान्, बालिकाः मित्राणि वा । षष्ट्यै/षष्टये नरेभ्यः, नारीभ्यः कुटुम्बेभ्यः वा इत्यादि ।

किन्तु संज्ञार्थे आसां सङ्ख्यानां रूपाणि 'मति'शब्दवत् सर्ववचनेषु भवन्ति । तद्यथा—बालकानाम् एका विंशतिः, द्वे विंशती, तिस्रः बह्वः वा

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पूरणी (क्रमवाचिका) सङ्ख्या

नववर्षस्य अयं प्रथमः दिवसः, इयं प्रथमा रात्रिः, इदं प्रथमं दिनम् । अद्य द्वितीयः दिनाङ्कः, द्वितीया तिथिः । विद्यालये इदं मम द्वितीयं वर्षम् । एषु दशसु बालेषु अयं तृतीयः बालः क्रीडानिपुणः । आसु दशसु बालासु इयं तृतीया बाला क्रीडानिपुणा । एषु दशसु मित्रेषु इदं तृतीयं मित्रं क्रीडानिपुणम् । विंशत्यां पाठेषु अयं चतुर्थः पाठः रुचिरः । विंशत्यां कवितासु इयं चतुर्थी कविता रुचिरा । विंशत्यां पद्येषु इदं चतुर्थं पद्यं रुचिरम् ।

अत्र प्रयुक्ताः प्रथम-द्वितीय-तृतीय-चतुर्थादयः शब्दाः पूरण(क्रमवाचक)-सङ्ख्याः उच्यन्ते ।

प्रथम-अग्रिम-आदिम-द्वितीय-तृतीय-तुर्य-तुरीय-शब्देभ्यः स्त्रीलिङ्गे आ-प्रत्ययः भवति । यथा—प्रथमा, अग्रिमा, आदिमा, द्वितीया, तृतीया, तुर्या, तुरीया । 'चतुर्थ'शब्दात् आरभ्य 'नवदश'पर्यन्तशब्देभ्यः स्त्रीलिङ्गे ई-प्रत्ययः भवति । यथा—चतुर्थी, पञ्चमी, दशमी, नवदशी । एकोनविंशति-सङ्ख्यायाः आरभ्य (षष्टि-सप्तति-अशीति-नवति-वर्जम्) नवनवतिसङ्ख्यापर्यन्तं पूरण-सङ्ख्या द्विधा रच्यते । यथा—एकोनविंशः, एकोनविंशी, एकोनविंशम् / एकोनविंशतितमः, एकोनविंशतितमी, एकोनविंशतितमम् ।

षष्टि, सप्तति, अशीति, नवति इत्यासां सङ्ख्यानां क्रमवाचकरूपम् एकविधम् एव भवति । यथा—षष्टितमः,-तमी,-तमम् । सप्ततितमः,-तमी,-तमम् । अशीतितमः,-तमी,-तमम् । नवतितमः,-तमी,-तमम् ।

किन्तु एक-द्वि-त्रि-चतुः-पञ्चादि-शब्दैः सह आसां समासे सति क्रमवाचक-(पूरण)सङ्ख्या द्विविधा भवति । यथा—एकषष्टितमः, एकषष्टितमी, एकषष्टितमम् / एकषष्टः एकषष्टी, एकषष्टम् ।

'शत'सङ्ख्यायाः आरभ्य 'परार्ध'पर्यन्तानां बृहत्-सङ्ख्यानां पूरणवाचक-रूपम् एकविधमेव भवति । यथा—शततमः,-तमी,-तमम् । सहस्रतमः,-तमी,-तमम् ।

विंशतयः । बालकानाम् एकां विंशतिम्, द्वे विंशती, तिस्रः बह्वः वा विंशतीः इत्यादि । अनयोः वाक्ययोः क्रमिकार्थौ तावत्—विंशतिः बालकाः, चत्वारिंशत् बालकाः, षष्टिः बहवः वा बालकाः । विंशतिं बालकान्, चत्वारिंशतं बालकान्, षष्टिं बहून् वा बालकान् इत्यादि ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पूरणसङ्ख्यानां रूपाणि

अकारान्तानां पुंलिङ्गानां 'देव'वत् नपुंसकलिङ्गानां च 'फल'वत्, आकारान्त-स्त्रीलिङ्गानां 'माला'वत् ईकारान्त-स्त्रीलिङ्गानां च 'नदी'वत् ।

सङ्ख्याभ्यासाः

एकमेवाद्वितीयं ब्रह्म । अद्वैतवादेन (वेदान्तेन) सृष्टेः मूलतत्त्वम् एकमेव मन्यते, द्वैतवादेन द्वे त्रैतवादेन च त्रीणि ।

द्वौ अश्विनौ (देवतानां वैद्यौ, सूर्यपत्न्याः अश्विन्याः यमजपुत्त्रौ ।)

प्रकृतेः त्रयः गुणाः सन्ति—सत्त्वम्, रजः तमः च ।

वेदाः चत्वारः । हिन्दुधर्मे (सनातनधर्मे) चत्वारि युगानि पञ्च भूतानि च मन्यन्ते ।

पञ्च ज्ञानेन्द्रियाणि पञ्च च कर्मेन्द्रियाणि—

श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता ।।

षड् रिपवः—कामः क्रोधस्तथा लोभो मदमोहौ च मत्सरः ।

सप्ताहे सप्त अहानि, अतः एव स सप्ताहः कथ्यते । सप्त महर्षयः—मरीचिः, अत्रिः, अङ्गिराः, पुलस्त्यः,-स्तिः, पुलहः, क्रतुः, वशिष्ठः । सप्त सागराः ।

पाणिनिव्याकरणे अष्टाध्यायी-ग्रन्थे अष्ट अध्यायाः । अष्ट सिद्धयः—

अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा ।
ईशित्वं च वशित्वं च तथा कामावसायिता ।।

अष्ट वसवः—

धरो ध्रुवश्च सोमश्च अहश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टाविति स्मृताः ।।

नाट्ये अष्ट रसाः सन्ति—

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्साद्भुतसञ्ज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नव ग्रहाः—

सूर्यश्चन्द्रो मङ्गलश्च बुधश्चापि बृहस्पतिः ।
शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहा नव ॥

नव निधयः—

महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ ।
मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव ॥

विक्रमादित्यस्य राजसभायां नव रत्नानि आसन् —

धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः ।
ख्याता वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥

धर्मस्य प्रधानलक्षणानि दश —

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥

बाह्यानि आन्तराणि च करणानि मिलित्वा एकादश भवन्ति—पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि एकादशं च अन्तःकरणं मनः ।

एकादश रुद्राः ।

वर्षे द्वादश मासाः भवन्ति षड् ऋतवश्च ।

वसन्तश्चैत्रवैशाखौ ज्येष्ठाषाढौ च ग्रीष्मकः ।
वर्षाः श्रावणभाद्राभ्यां शरदाश्विनकार्तिकौ ।
मार्गपौषौ च हेमन्तः शिशिरो माघफाल्गुनौ ॥

द्वादश आदित्याः । (अदितेः पुत्राः, प्रलयकाले आविर्भवन्ति ।)

चतुर्दश मनवः । (मनोः मानस-पुत्राः)

साङ्ख्यदर्शने पञ्चविंशतिः तत्त्वानि मन्यन्ते । पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, पञ्च तन्मात्राणि (शब्दः, स्पर्शः, रूपम्, रसः, गन्धः), पञ्च महाभूतानि [पृथ्वी, आपः, तेजः (अग्निः), मरुत्, व्योम], मनः, अहङ्कारः, बुद्धिः (महान्, महत्तत्त्वम्), प्रकृतिः, पुरुषः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ख्रैस्तमासेषु अधिकतमम् एकत्रिंशत् दिनानि न्यूनतमं च अष्टाविंशतिः। घण्टायां षष्टिः पलानि। एकस्मिन् पले षष्टिः विपलानि। एकस्मिन् वर्षे पञ्च/(षट्)/षष्टि-अधिक-त्रिशत-दिनानि।

सङ्ख्याऽव्ययानि (क्रियाविशेषणानि)

सङ्ख्याभ्यः स् (सुच्), कृत्वः (कृत्वसुच्), धा इत्यादयः बहवः प्रत्ययाः भवन्ति। तेषां प्रत्ययानां योगेन अतीव उपयोगीनि क्रियाविशेषणानि रच्यन्ते।

१. एक, द्वि, त्रि, चतुर् इत्याभ्यः सङ्ख्याभ्यः क्रियायाः आवृत्तिं सूचयितुं 'स्'(सुच्)-प्रत्ययः भवति। तत्र एकशब्दस्य स्थाने सकृत् इति आदेशः अपि भवति। यथा—सः दिने सकृत् (एकवारम्) व्यायामं करोति, द्विः (द्विवारम्) ध्यायति, त्रिः (त्रिवारम्) खादति, चतुः (चतुर्वारम्) पठति।

'पञ्चन्' इति सङ्ख्यावाचकादारभ्य सर्वेभ्यः अपि सङ्ख्याशब्देभ्यः क्रियायाः आवृत्तिं सूचयितुं 'कृत्वः' इति प्रत्ययः भवति। यथा—पञ्चकृत्वः (पञ्चवारम्), दशकृत्वः (दशवारम्) इत्यादि।

'सङ्ख्या'वाचकस्य 'वार'शब्देन सह बहुव्रीहिसमासः क्रियते। तस्य समासस्य क्रियाविशेषणरूपेण (अव्ययीभाववत्) क्रियायाः वारगणनार्थं प्रयोगः भवति। यथा—शतवारं प्रणमति = शतकृत्वः प्रणमति।

२. सङ्ख्याशब्दात् प्रकारार्थे, भागार्थे अनेकस्य एकीकरणे च 'धा'प्रत्ययः भवति।

'द्वि', 'त्रि' इत्याभ्यां परस्य 'धा'-प्रत्ययस्य विकल्पेन धम् (वृद्धिसाधकः), एधा इति आदेशौ भवतः। यथा—द्वि + धा → द्वि + धम् → द्वैधम्/द्वेधा (एधा)। त्रैधम्, त्रेधा।

प्रयोगः—द्वाभ्यां प्रकाराभ्यां लिखति = द्विधा, द्वेधा द्वैधं वा लिखति। त्रिभिः प्रकारैः व्याख्याति = त्रिधा, त्रेधा त्रैधं वा व्याख्याति।

'बहु'शब्दात् क्रियायाः आवृत्तिं सूचयितुं विकल्पेन 'धा', 'कृत्वः' इति प्रत्ययौ भवतः। दिवसे बहुवारं भुङ्क्ते, बहुधा दिवसस्य भुङ्क्ते, बहुकृत्वः भुङ्क्ते।

३. सङ्ख्यावाचकाद् भागवाचकात् च प्रातिपदिकाद् वीप्सार्थे विकल्पेन 'शस्'प्रत्ययः भवति। यथा—द्वौ द्वौ मोदकौ ददाति = द्विशः ददाति। त्रीणि त्रीणि पुस्तकानि ददाति = त्रिशः ददाति। पञ्चशः पङ्क्तिबद्धाः भवत।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भागवाचकात्—पादं पादं = पादशः ददाति। अर्धम् अर्धम् = अर्धशः ददाति। पादोनं पादोनम् = पादोनशः ददाति।

४. सङ्ख्यावाचकशब्दात् समूहार्थे 'क'-प्रत्ययः भवति। यथा—द्वयोः समूहः = द्विकम्। त्रयाणां समूहः = त्रिकम्। एवमेव चतुष्कम्, पञ्चकम्, षट्कम्, द्वादशकम्, विंशतिकम्, शतकम्, सहस्रकम् इत्यादि।

*

येषां शतं प्रियाणि शतं तेषां दुःखानि, येषां नवतिः प्रियाणि नवतिः तेषां दुःखानि, येषाम् अशीतिः प्रियाणि अशीतिः तेषां दुःखानि, येषां सप्ततिः प्रियाणि सप्ततिः तेषां दुःखानि, येषां षष्टिः प्रियाणि षष्टिः तेषां दुःखानि, येषां पञ्चाशत् प्रियाणि पञ्चाशत् तेषां दुःखानि, येषां चत्वारिंशत् प्रियाणि चत्वारिंशत् तेषां दुःखानि, येषां त्रिंशत् प्रियाणि त्रिंशत् तेषां दुःखानि, येषां विंशतिः प्रियाणि विंशतिः तेषां दुःखानि, येषां दश प्रियाणि दश तेषां दुःखानि, येषां नव प्रियाणि नव तेषां दुःखानि, येषाम् अष्ट प्रियाणि अष्ट तेषां दुःखानि, येषां सप्त प्रियाणि सप्त तेषां दुःखानि, येषां षट् प्रियाणि षट् तेषां दुःखानि, येषां पञ्च प्रियाणि पञ्च तेषां दुःखानि, येषां चत्वारि प्रियाणि चत्वारि तेषां दुःखानि, येषां त्रीणि प्रियाणि त्रीणि तेषां दुःखानि, येषां द्वे प्रिये द्वे तेषां दुःखे, येषाम् एकं प्रियम् एकं तेषां दुःखम्, येषां नास्ति प्रियं नास्ति तेषां दुःखम्।

(विसाखासुत्तम्—बौद्धग्रन्थः कश्चित्)

यावतः कुरुते जन्तुः सम्बन्धान् मनसः प्रियान्।
तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः॥

*

निःस्वो वष्टि शतं शती दशशतं लक्षं सहस्राधिपो
लक्षेशः क्षितिराजतां क्षितिपतिश्चक्रेशतां वाञ्छति।
चक्रेशः सुरराजतां सुरपतिर्ब्रह्मास्पदं वाञ्छति
ब्रह्मा विष्णुपदं हरिः शिवपदं तृष्णावधिं को गतः॥

सार्थान्वयः—निःस्वः (दरिद्रः/निर्धनः) शतं वष्टि (इच्छति/कामयते), शती (शतम् अस्य अस्ति इति सः) दशशतम् (सहस्रम्), सहस्राधिपः (सहस्रस्वामी) लक्षम्, लक्षेशः (लक्षपतिः) क्षितिराजताम् (राजपदम्), क्षितिपतिः (महीपतिः/राजा) चक्रेशताम् (चक्रवर्तित्वम्) वाञ्छति। चक्रेशः (चक्रवर्ती सम्राट्)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सुरराजताम् (इन्द्रपदवीम्), सुरपतिः (इन्द्रः) ब्रह्मास्पदम् (ब्रह्मत्वम्), ब्रह्मा विष्णुपदम्, हरिः (विष्णुः) शिवपदम् वाञ्छति । [तर्हि] तृष्णावधिं कः गतः ? तृष्णायाः पारं कः गतवान् ? तस्याः सीमां कः प्राप्तवान् ? न कोऽपि इत्यर्थः ।

नदी (ईकारान्तस्त्रीलिङ्गशब्दः)

इयं पुण्यसलिला नदी । अहं स्नातुं प्रतिदिनम् इमां नदीं गच्छामि । अनया नद्या वयं बहुभिः प्रकारैः उपकृताः । अस्यै नद्यै सर्वकारेण काचित् योजना रचिता । अस्याः नद्याः अस्माकं गृहं द्वयोः प्रणल्वयोः/द्वौ प्रणल्वौ (two furlongs.) अस्याः नद्याः नाम गोदावरी । अस्यां नद्यां स्नात्वा जनाः क्षीणकल्मषाः/निष्पापाः भवन्ति इति लोकप्रवादः । हे नदि, यथा त्वम् आत्मानं सागरे विलयसि तथैवाहम् आत्मानं भगवति विलयेयम् ।

यथा नद्यः स्यन्दमानाः समुद्रे-
ऽस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान्नामरूपाद्विमुक्तः
परात्परं पुरुषमुपैति दिव्यम् ।। (मुण्डकोपनिषद् ३.२.८)

सार्थान्वयः—यथा (येन प्रकारेण) नद्यः स्यन्दमानाः (प्रवहमाणाः/प्रवहन्त्यः) नामरूपे (नाम च रूपं च) विहाय (त्यक्त्वा/वर्जयित्वा) समुद्रे अस्तं गच्छन्ति तथा (तेनैव प्रकारेण) विद्वान् नामरूपाद् विमुक्तः [सन्/भूत्वा] परात्परं दिव्यं पुरुषम् उपैति (उपगच्छति, प्राप्नोति) ।

यथा नदीनां बहवोऽम्बुवेगाः
समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीरा
विशन्ति वक्त्राण्यभिविज्वलन्ति ।। (गीता ११.२८)

सार्थान्वयः—यथा नदीनां बहवः अम्बुवेगाः (वारिप्रवाहाः) समुद्रम् एव अभिमुखाः (समुद्रम् एव अभिलक्ष्य) द्रवन्ति (वेगेन धावन्ति) तथा अमी (इमे) नरलोकवीराः (भीष्मादयः) अभिविज्वलन्ति (अभितः/सर्वतः विज्वलन्ति/जाज्वल्यमानानि) तव वक्त्राणि (मुखानि) विशन्ति (प्रविशन्ति) । [अर्जुनः विश्वरूपं पश्यन्* श्रीकृष्णं प्रति एवम् उद्गिरति ।]

---

* अर्जुनः विश्वरूपं पश्यति श्रीकृष्णं प्रति च एवम् उद्गिरति ।
अर्जुनः विश्वरूपं पश्यन् श्रीकृष्णं प्रति एवम् उद्गिरति ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

द्वे सख्यौ

द्वे सख्यौ स्तः । ते परस्परम् अतीव अन्तरङ्गे । तयोः परस्परस्यां प्रीतिः अतीव गाढा । ते प्रतिदिनं नद्याः तटं गच्छतः । तत्र ते दीर्घं जल्पतः । ते नद्यां तरतः, परस्परस्यां जलं क्षिपतः बहुविधाः क्रीडाः च कुरुतः । इत्थं ते कालं सुखं यापयतः ।

अथ तयोः विवाहः भवति । ते परस्परस्याः दूरे तिष्ठतः । अथैकदा ते पितृगृहम् आगते । ते परस्परं मिलतः । एका अन्यां पृच्छति—'सखि, तव स्वामी कीदृशः ?' अन्या उत्तरति—'मम भर्ता अतीव चतुरः । सः खलु स्पशः (गुप्तचरः) । सः यत् लिखति परः (अन्यः कोऽपि) वाचयितुं न शक्नोति ।' सा प्रतिपृच्छति—'सङ्गिनि, तव पतिः कीदृशः ?' सङ्गिनी प्रत्युत्तरति—'मम पतिः तस्माद् (तव पत्यपेक्षया) अपि अधिकं चतुरः । सः तु स्पशशिरोमणिः । सः यत् लिखति तत् स्वयमपि वाचयितुं न शक्नोति !'

चतुरः सखि मे भर्ता यल्लिखति स तत् परो न वाचयति ।
तस्मादप्यधिको मे स्वयमपि लिखितं स्वयं न वाचयति ।।

पाठान्तरम् (त्रयाणां पुरुषाणां विषये)—

वाचयति नान्यलिखितं लिखितमनेनापि वाचयति नान्यः ।
अयमपरोऽस्य विशेषः स्वयमपि लिखितं स्वयं न वाचयति ।।

अयं बालकः भाचित्रं पश्यति हसति च । अयं बालकः भाचित्रं पश्यन् हसति । अयं जनः गायति वादयति च । अयं जनः गायन् वादयति । अयं युवकः खादति जल्पति च । अयं युवकः खादन् जल्पति । सः गच्छति खादति च । सः गच्छन् खादति ।

इयं बालिका गच्छति हसति च । इयं बालिका गच्छन्ती हसति । इयं बालिका गायति नृत्यति च । इयं बालिका गायन्ती नृत्यति । इयं महिला खादति जल्पति च । इयं महिला खादन्ती जल्पति । नदी प्रवहति समुद्रं च प्रविशति । नदी प्रवहन्ती समुद्रं प्रविशति ।

गच्छन् पिपीलिको याति योजनानां शतान्यपि ।
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ।।

(पुं)	गच्छन्	गच्छन्तौ	गच्छन्तः
(स्त्री)	गच्छन्ती	गच्छन्त्यौ	गच्छन्त्यः
(नपुं)	गच्छत्,-द्	गच्छन्ती	गच्छन्ति

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अभ्यासाः

१. 'भगिनी'शब्दस्य विभक्तिरूपैः रिक्तस्थानानि पूरय—

मम एका ज्येष्ठा—अस्ति । तस्याः नाम ज्योत्स्ना । रमेशस्य द्वे कनिष्ठे —स्तः । तयोः नामनी विभा प्रभा च । हरेः तिस्रः—सन्ति । तासां नामानि सुरभिः, माधवी भैरवी च । अहं स्वभगिनीं संस्कृतं पाठयामि । रमेशः— श्लोकान् शिक्षयति । हरिः—मन्त्रान् शिक्षयति । अहं स्वभगिन्या सह संस्कृते आलपामि । रमेशः—सह संस्कृते आलपति । हरिः—सह संस्कृते आलपति । जन्मदिने स्वभगिन्यै अहम् उपहारान् तर्पिकाश्च ददामि । जन्मदिने — रमेशः श्लोकान् उपहरति । जन्मदिने — हरिः संस्कृत-कथा-पुस्तकानि बहुप्रकारकाणि मिष्टान्नानि च उपहरति । अहं स्वभगिन्याः सङ्गीतं शिक्षे । रमेशः—अधिकं संस्कृतं जानाति । हरिः—चतुरतरः । अहं स्वभगिन्याः द्विचक्रं चालयामि । श्लोकशिक्षणे रमेशः—बहुसहायतां करोति । मन्त्रपारायणे हरिः —बहुसहायतां करोति । हे भगिनि, त्वं सम्यक् संस्कृतं जानीहि । हे रमेशस्य —, युवां सुन्दरान् श्लोकान् लिखतम् । हे हरेः—, यूयं मन्त्रान् निष्प्रमादम् उच्चारयत ।

नदी

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	नदी	नद्यौ	नद्यः
द्वितीया	नदीम्	नद्यौ	नदीः
तृतीया	नद्या	नदीभ्याम्	नदीभिः
चतुर्थी	नद्यै	नदीभ्याम्	नदीभ्यः
पञ्चमी	नद्याः	नदीभ्याम्	नदीभ्यः
षष्ठी	नद्याः	नद्योः	नदीनाम्
सप्तमी	नद्याम्	नद्योः	नदीषु
संबोधनम्	नदि	नद्यौ	नद्यः

ईकारान्तस्त्रीलिङ्गशब्दाः

अङ्कनी	अटवी	आमलकी	आसन्दी	कवरी
कर्तरी	कर्कटी	कुमारी	कदली	कर्त्री
कामिनी	कौमुदी	काली	केतकी	कमलिनी

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कस्तूरी/-रिका	कलाची	कलशी/सी	कुञ्ची	कुक्कुटी
कूपी	खर्जूरी	गृहिणी	गर्दभी	गायत्री
गोष्ठी	घर्घरी	चर्पटी	चतुर्दशी	छछुन्दरी
जननी	टिप्पणी	तर्जनी	तरङ्गिणी	तुलसी
तरुणी	दासी	दात्री	दौहित्री	देवी
देवनागरी	द्रौपदी	दूती	धरणी	धात्री
धमनी	धावनपात्री	नगरी	नन्दिनी	नारी
निर्झरिणी	नप्त्री	नाडी/डिः	पत्नी	पयस्विनी
पुरी	पौत्री	प्राची	पितामही	पञ्चवटी
पदवी	पार्वती	पुत्री	भगिनी	भारती
भवानी	भवती	भगवती	मही	महिषी
मञ्जरी	मार्जनी	मालती	मन्त्रिणी	मर्कटी
मसी	मातामही	मुरली	मेदिनी	यामिनी
रजनी	राज्ञी	राजधानी	राक्षसी	लेखनी
वाणी	वाहिनी	व्याघ्री	वंशी	वाराणसी
विवरी	शर्वरी	श्रेणी/णिः	शुण्ठी/ण्ठिः	शाटी
सखी	सहचरी	सिंही	सौदामिनी	स्थाली
सामग्री	सूची/चिः	सरस्वती	हरिणी	हरीतकी

धेनु

इयं मम धेनुः। इयं कृष्णा। अहम् इमां कृष्णां धेनुं स्नेहेन पालयामि। कृष्णया धेन्वा अधिकं दुग्धं दीयते। अहम् अनया कृष्णया धेन्वा सह क्षेत्रं गच्छामि। तत्राहं तां हरित-कोमल-घासं चारयामि। अहं स्वधेन्वै प्रचुरं खाद्यं यच्छामि। अहं स्वधेन्वाः प्रचुरं दुग्धं प्राप्नोमि। मम धेन्वाः तर्णकः सुपुष्टः मनोहरश्च। अहं स्वधेन्वाम् अतीव स्निह्यामि। हे धेनो, त्वं मदीया अपरा माता ननु।

धेनु (उकारान्तस्त्रीलिङ्गशब्दः)

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	धेनुः	धेनू	धेनवः
द्वितीया	धेनुम्	धेनू	धेनूः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तृतीया	धेन्वा	धेनुभ्याम्	धेनुभिः
चतुर्थी	धेन्वै, धेनवे	धेनुभ्याम्	धेनुभ्यः
पञ्चमी	धेन्वाः, धेनोः	धेनुभ्याम्	धेनुभ्यः
षष्ठी	धेन्वाः, धेनोः	धेन्वोः	धेनूनाम्
सप्तमी	धेन्वाम्, धेनौ	धेन्वोः	धेनुषु
संबोधनम्	धेनो	धेनू	धेनवः

उकारान्तस्त्रीलिङ्गशब्दाः

कुहु, चञ्चु, जम्बु, तनु, रज्जु, रेणु, स्नायु, हनु ।

वधू

इयं नववधूः अतीव लज्जाशीला । इमां नववधूं द्रष्टुम् अद्य बहवः महिलाः आगताः । अनया नववध्वा सह ताः बहुकालं जल्पितवत्यः । तासु काश्चन अस्यै नववध्वै उपहारान् आनीतवत्यः । ताः सर्वाः अस्याः नववध्वाः मिष्टान्नं प्राप्तवत्यः । अस्याः नववध्वाः रूपम् अतीव सुन्दरम् । अस्यां नववध्वां सर्वेषां प्रीतिः सुगाढा । हे नववधु, परिवारे सर्वेषु त्वं सामञ्जस्यं संजनय/प्रतिष्ठापय ।

वधू

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	वधूः	वध्वौ	वध्वः
द्वितीया	वधूम्	वध्वौ	वधूः
तृतीया	वध्वा	वधूभ्याम्	वधूभिः
चतुर्थी	वध्वै	वधूभ्याम्	वधूभ्यः
पञ्चमी	वध्वाः	वधूभ्याम्	वधूभ्यः
षष्ठी	वध्वाः	वध्वोः	वधूनाम्
सप्तमी	वध्वाम्	वध्वोः	वधूषु
संबोधनम्	वधु	वध्वौ	वध्वः

ऊकारान्तस्त्रीलिङ्गशब्दाः

कुहू, चञ्चू, चमू, तनू, पुत्रवधू, पुत्रसू, प्रसू, यवागू, वीरसू, श्वश्रू, हनू ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विष्णु

विष्णुः पालयति । सः अस्माकं पालकः/पालयिता । वयं विष्णुं नमामः । लक्ष्मीः विष्णुना सह क्षीरसागरे वसति । ॐ विष्णवे नमः । वयं विष्णोः विष्णुत्वम् कामयामहे । अपि त्वं विष्णोः सहस्रनाम जानासि ? अस्माकं मनः विष्णौ लीयताम् । हे विष्णो, त्वं खलु जले, स्थले, सर्वत्र वर्तसे !

जले विष्णुः स्थले विष्णुर्विष्णुः पर्वतमस्तके ।
ज्वालामालाकुले विष्णुः सर्वं विष्णुमयं जगत् ।।

सार्थान्वयः—जले विष्णुः, स्थले विष्णुः, पर्वतमस्तके विष्णुः, ज्वाला-मालाकुले (प्रदीप्तवह्निशिखासु) [अपि] विष्णुः [विद्यते] । सर्वं (संपूर्णं) जगत् विष्णुमयम् !

*

यत्र न सूर्यस्तपति यत्र न वायुर्वाति यत्र न चन्द्रमा भाति यत्र न नक्षत्राणि भान्ति यत्र नाग्निर्दहति यत्र न मृत्युः प्रविशति यत्र न दुःखानि प्रविशन्ति···यत्र गत्वा न निवर्तन्ते योगिनः, तद् विष्णोः परमं पदम्···।

(बृहज्जाबालोपनिषत्)

गुरु

गुरुः ब्रह्मा (अस्ति) । गुरुः विष्णुः (अस्ति) । गुरुः महेश्वरः (अस्ति) । सः साक्षात् परब्रह्म (अस्ति) । भगवान् एकः एव परमगुरुः । सः मम गुरुः । किन्तु तयोः द्वौ गुरू स्तः । तेषां त्रयः गुरवः सन्ति । अहं गुरुं सेवे । तौ द्वौ गुरू सेवेते । ते त्रीन् गुरून् सेवन्ते । अहं गुरुणा उपदिष्टः । तौ गुरुभ्याम् उपदिष्टौ । ते गुरुभिः उपदिष्टाः । अहं गुरवे सर्वस्वम् अर्पितवान् । तौ गुरुभ्यां सर्वस्वम् अर्पितवन्तौ । ते गुरुभ्यः सर्वस्वम् अर्पितवन्तः । अहं गुरोः किमपि न गोपयामि । तौ गुरुभ्यां किमपि न गोपयतः । ते गुरुभ्यः किमपि न गोपयन्ति । अहं गुरोः आज्ञां पालयामि । तौ गुर्वोः आज्ञां पालयतः । ते गुरूणाम् आज्ञां पालयन्ति । गुरौ मम श्रद्धा अस्ति । गुर्वोः तयोः श्रद्धा अस्ति । गुरुषु तेषां श्रद्धा अस्ति । हे गुरो, माम् आत्मसाक्षात्कारं कारय । हे गुरू, तौ आत्मसाक्षात्कारं कारयतम् । हे गुरवः, तान् आत्मसाक्षात्कारं कारयत ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

गुरुरेव गतिर्गुरुमेव भजे गुरुणैव सहास्मि नमो गुरवे ।
न गुरोः परमं शिशुरस्मि गुरोर्मतिरस्ति गुरौ मम पाहि गुरो ।। (तोटकम्)[1]

सार्थान्वयः—गुरुः एव [मम] गतिः । [अहम्] गुरुम् एव भजे । [अहम्] गुरुणा सह एव अस्मि । गुरवे नमः । गुरोः परमं [तत्त्वं किमपि] न [अस्ति] [अहम्] गुरोः शिशुः अस्मि । मम गुरौ मतिः (ध्यानं चिन्तना च) अस्ति । [हे] गुरो, पाहि (रक्ष) [माम्] ।

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परब्रह्म तस्मै श्रीगुरवे नमः ।।

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ।।

*

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ।।

सार्थान्वयः—ब्रह्मानन्दम् (ब्रह्मानन्दस्वरूपम्), परमसुखदम् (श्रेष्ठसुखदातारम्), केवलम् (एकमेवाद्वितीयम्), ज्ञानमूर्तिम्, द्वन्द्वातीतम्, गगनसदृशम्, तत्त्वमस्यादिलक्ष्यम् ('तत् त्वम् असि' इत्यादीनां वाक्यानां लक्ष्यम्/विषयभूतम्), एकम्, नित्यम्, विमलम्, अचलम्, सर्वधीसाक्षिभूतम् (सर्वेषां धियाः / बुद्धेः, विचाराणाम्) साक्षिभूतम् (द्रष्टारम्, साक्षिस्वरूपम्), भावातीतम् (भावम्/सत्ताम् अतीतम्/अतिक्रान्तम्, अतिक्रम्य स्थितम्), त्रिगुणरहितं तं सद्गुरुं नमामि ।

विदलयति कुबोधं बोधयत्यागमार्थं
सुगति-कुगति-मार्गौ पुण्यपापे व्यनक्ति ।
अवगमयति कृत्याकृत्यभेदं गुरुर्यो
भवजलनिधिपोतस्तं विना नास्ति कश्चित् ।। (मालिनी)[2]

---

[1]वद तोटकमब्धिसकारयुतम् ।। स, स, स, स (४.४.४) ।।
(ललगा ललगा ललगा ललगा)

[2]ननमयययुतेयं मालिनी भोगिलोकैः ।। न, न, म, य, य (८, ७) ।।
(ल ल ल ल ल ल गा गा गा ल गा गा ल गा गा)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सार्थान्वयः—गुरुः कुबोधं (कुबुद्धिम्, असद्बोधम्, अज्ञानम्) विदलयति (विनाशयति), आगमार्थं (वेदादिशास्त्राणाम् अर्थम्) बोधयति, सुगति-कुगति-मार्गौ (सद्गतिदुर्गत्योः मार्गौ, सुमार्गं च कुमार्गं च), पुण्यपापे (पुण्यं च पापं च) व्यनक्ति (प्रकटयति)। यः [गुरुः] कृत्याकृत्यभेदं (किं करणीयं किञ्च न करणीयम् इति अनयोः भेदम्) अवगमयति, तं विना कश्चित् (कोऽपि) भवजलनिधिपोतः (भवसागरस्य नौकास्वरूपः) नास्ति।

साधु (उकारान्तपुंलिङ्गशब्दः)

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	साधुः	साधू	साधवः
द्वितीया	साधुम्	साधू	साधून्
तृतीया	साधुना	साधुभ्याम्	साधुभिः
चतुर्थी	साधवे	साधुभ्याम्	साधुभ्यः
पञ्चमी	साधोः	साधुभ्याम्	साधुभ्यः
षष्ठी	साधोः	साध्वोः	साधूनाम्
सप्तमी	साधौ	साध्वोः	साधुषु
संबोधनम्	साधो	साधू	साधवः

उकारान्तपुंलिङ्गशब्दाः

अणु	इक्षु	कमण्डलु	गुरु	चण्डांशु
जन्तु	डमरु	तन्तु	तरु	दस्यु
देवदारु	धातु	प्रभु	पशु	पङ्गु
बन्धु	बाहु	बिन्दु	भानु	भिक्षु
मनु	मेरु	मृत्यु	राहु	रिपु
रेणु	वटु	वायु	विभु	विष्णु
विधु	शत्रु	शिशु	श्वेतकेतु	शङ्कु
सिन्धु	सूनु	सेतु	हेतु	हनु

विशेषणानि—कृपालु, दयालु, श्रद्धालु, निद्रालु, भयालु, संशयालु, जिज्ञासु, पिपासु, मुमूर्षु, बुभुक्षु, लघु, भीरु, युद्धेच्छु, युयुत्सु।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मुनि (इकारान्तपुंलिङ्गशब्दः)

एषः मुनिः अतीव विनयी । एतौ मुनी अतीव विनयिनौ । एते मुनयः अतीव विनयिनः । अहम् एतं विनयिनं मुनिं प्रणमामि । सः एतौ विनयिनौ मुनी प्रणमति । सा एतान् विनयिनः मुनीन् प्रणमति । एतेन विनयिना मुनिना सह द्वौ शिष्यौ वसतः । एताभ्यां विनयिभ्यां मुनिभ्यां सह चत्वारः शिष्याः वसन्ति । एतैः विनयिभिः मुनिभिः सह षड् शिष्याः वसन्ति । एतस्मै विनयिने मुनये अहं फलानि ददामि । एताभ्यां विनयिभ्यां मुनिभ्यां सः फलानि ददाति । एतेभ्यः विनयिभ्यः मुनिभ्यः सा फलानि यच्छति । अहम् एतस्मात् विनयिनः मुनेः आशिषः प्राप्नोमि । सः एताभ्यां विनयिभ्यां मुनिभ्याम् आशिषः प्राप्नोति । सा एतेभ्यः विनयिभ्यः मुनिभ्यः आशिषः प्राप्नोति । अहम् एतस्य विनयिनः मुनेः भक्तः । सः एतयोः विनयिनोः मुन्योः भक्तः । सा एतेषां विनयिनां मुनीनां भक्ता । मम एतस्मिन् विनयिनि मुनौ भक्तिः अस्ति । तस्य एतयोः विनयिनोः मुन्योः भक्तिः अस्ति । तस्याः एतेषु विनयिषु मुनिषु भक्तिः अस्ति । हे विनयिन् मुने, अहं त्वां भजामि । हे विनयिनौ मुनी, युवां सः भजति । हे विनयिनः मुनयः, युष्मान् सा भजति ।

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ।। (गीता २.५६)

सार्थान्वयः—दुःखेषु (दुःखदविषयेषु/-प्रसङ्गेषु तेषां परिणामभूतकष्टेषु च) अनुद्विग्नमनाः (अक्षुब्धचित्तः), सुखेषु विगतस्पृहः (निःस्पृहः, कामनारहितः), वीतरागभयक्रोधः (प्रीतिभयक्रोधशून्यः) मुनिः स्थितधीः (स्थितप्रज्ञः) उच्यते (कथ्यते) ।

ऋषि

ऋषिः क्रान्तदर्शी । सः सत्यद्रष्टा । सः भूतम्, वर्तमानं भविष्यं च द्रष्टुं शक्नोति । वयम् ऋषिं नमामः । ऋषिणा त्रिकालं द्रष्टुं शक्यते । ऋषये नमः । वयम् ऋषेः सत्यज्ञानं प्राप्तुम् अर्हामः । अयम् ऋषेः पावनः आश्रमः । ऋषौ अस्माकं भक्तिः स्वतः भवति । हे ऋषे, त्वमेव अस्माकम् आदर्शः ।

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ।। (गीता ५, २५)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सार्थान्वयः—क्षीणकल्मषाः (क्षीणं कल्मषं येषां ते / नष्टपापाः), छिन्नद्वैधाः (छिन्नं द्वैधं येषां ते / विगतसंशयाः), यतात्मानः (यतः आत्मा येषां ते / संयतचित्ताः), सर्वभूतहिते रताः (सर्वेषां प्राणिनां हिते रताः) ऋषयः ब्रह्मनिर्वाणं (ब्रह्मणि/परमात्मनि लयम्, मोक्षम्) लभन्ते (प्राप्नुवन्ति) ।

पश्यामि देवांस्तव देव देहे
सर्वांस्तथा भूतविशेषसङ्घान् ।
ब्रह्माणमीशं कमलासनस्थ-
मृषींश्च सर्वानुरगांश्च दिव्यान् ।। (गीता ११.१५)

सार्थान्वयः—[हे] देव [श्रीकृष्ण], तव देहे सर्वान् देवान् तथा भूतविशेषसङ्घान् (चराचराणां समूहान्), सर्वान् ऋषीन्, दिव्यान् उरगान् (अनन्तवासुकितक्षकादीन् सर्पान्) च कमलासनस्थं (पद्मासने स्थितम्) ईशम् (सृष्टिकर्तारम्) ब्रह्माणं च पश्यामि ।

मुनि

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	मुनिः	मुनी	मुनयः
द्वितीया	मुनिम्	मुनी	मुनीन्
तृतीया	मुनिना	मुनिभ्याम्	मुनिभिः
चतुर्थी	मुनये	मुनिभ्याम्	मुनिभ्यः
पञ्चमी	मुनेः	मुनिभ्याम्	मुनिभ्यः
षष्ठी	मुनेः	मुन्योः	मुनीनाम्
सप्तमी	मुनौ	मुन्योः	मुनिषु
संबोधनम्	मुने	मुनी	मुनयः

इकारान्तपुंलिङ्गशब्दाः

अतिथि	अरि	अलि	असि	अहि
अञ्जलि	अवधि	अराति	आधि	उदधि
उपधि	उपाधि	कपि	कवि	कलि
गिरि	ग्रन्थि	जलधि	तिथि	तिमि
धनपति	ध्वनि	निधि	नृपति	परिधि

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रजापति	प्रतिनिधि	पाणि	पाणिनि	बलि
बृहस्पति	व्रीहि	भूपति	यति	रवि
रश्मि	शशि	विधि	वह्नि	व्याधि
सारथि	सन्धि	सन्निधि	समाधि	सेनापति

अग्नि

हे अग्ने, त्वम् अस्माकं प्रियः देवः । त्वं खलु यज्ञस्य पुरोहितः । सूर्यः, विद्युत्, तडित् इत्यादयः तवैव विभिन्नानि रूपाणि । त्वमेव अस्माकं शरीरस्य अभ्यन्तरे जठराग्निरूपेण वर्तसे । जठराग्निना अस्माकं शरीरम् उष्णं तिष्ठति । तेनैव अस्माकं भोजनं पच्यते ।

जठरे (उदरे) जठराग्निः इव अस्माकं हृदयेऽपि अग्निः विद्यते । तस्य नाम अभीप्साग्निः इति । दीपशिखा इव सदा सः तत्र ज्वलति । यथा जठराग्नौ उद्दीप्ते वयं क्षुध्यामः तथैव अभीप्साग्नौ प्रदीप्ते वयं प्रगतये तृष्यामः, उत्कण्ठिताः भवामः । जठराग्नेः ऊष्मा निर्गत्य सम्पूर्णं शरीरम् ऊर्जितं सबलं च करोति । ॐ अग्नये स्वाहा, इदम् अग्नये, इदं न मम । अग्नेः बहूनि नामानि सन्ति । अपि त्वं तानि जानासि ?

*

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ।। (गीता ४.३७)

सार्थान्वयः—[हे] अर्जुन, यथा समिद्धः (सम्यक् इद्धः/दीप्तः, प्रदीप्तः) अग्निः एधांसि (काष्ठानि) भस्मसात् कुरुते (भस्मीकरोति) तथा ज्ञानाग्निः सर्वकर्माणि (सर्वाणि कर्माणि) भस्मसात् कुरुते ।

अग्निर्यथैको भुवनं प्रविष्टो
रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा
रूपं रूपं प्रतिरूपो बहिश्च ।। (कठोपनिषद् २.२.९)

सार्थान्वयः—यथा एकः [एव] अग्निः भुवनं (इमं लोकं) प्रविष्टः [सन्] रूपं रूपं प्रतिरूपः (तत्तद्रूपवता पदार्थेन सह समरूपः) बभूव (अभवत्) तथा

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

एकः [एव] सर्वभूतान्तरात्मा (सर्वेषां भूतानाम् अन्तर्वासी आत्मा) रूपं रूपं (प्रत्येकरूपस्य) प्रतिरूपः [तेभ्यः] बहिश्च (बहिःस्थितश्च) [अभवत्] ।

भावार्थः—यथा एकः एव अग्निः (आत्माग्निः) पृथिवीं प्रविश्य काष्ठादीनि रूपाणि अधारयत् तथा एकः एव आत्मा सर्वेषां प्राणिनाम् अन्तरे विद्यमानः तत्तद्रूपं धारितवान् तेभ्यः बहिश्च वर्तते ।

अग्ने नय सुपथा राये अस्मान्
विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो
भूयिष्ठां ते नमउक्तिं विधेम ।। (ऋग्वेदः १.१८९.१)

अन्वयः—देव अग्ने, विश्वानि वयुनानि विद्वान् अस्मान् सुपथा राये नय । जुहुराणम् एनः अस्मत् युयोधि, ते भूयिष्ठां नमःउक्तिं विधेम ।

अर्थः—विश्वानि—निखिलानि, सकलानि, सर्वाणि । वयुनानि—कर्माणि, विचारान्, अन्तर्बहिर्व्यापारान् । विद्वान्—जानन्, अवगच्छन् । राये—आनन्दैश्वर्यलाभाय, लौकिकपारलौकिकैश्वर्यलाभाय, बाह्यान्तरिकैश्वर्यलाभाय । सुपथा—सुमार्गेण । नय—परिचालय । जुहुराणम्—कुटिलम्, प्रवञ्चकम् । एनः—पापम् । अस्मत्—अस्मत्तः । युयोधि—वियोजय, विनाशय । ते—तव । भूयिष्ठाम्—बहुतमाम् । नमःउक्तिम्—प्रणतिवचनम्, समर्पणसूक्तम् । विधेम—कुर्याम ।

भावार्थः—हे चैत्याग्निदेव, त्वं हि अस्माकम् आन्तरिकान् बाह्यान् च व्यापारान् जानासि । तान् जानन् त्वम् अस्मान् आनन्दैश्वर्यलाभाय सुमार्गेण परिचालय । अस्मत्तः कुटिलपापं निष्कासय विशोधय च अस्मान् । एतदर्थं वयं तव नमस्कारोक्तिं स्तुतिपाठं च बहुशः कुर्मः, त्वां शरणं गच्छामः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

परिशिष्टम्

'संस्कृतं भारतस्य राष्ट्रभाषा भवेत्'

['संस्कृतं भारतस्य राष्ट्रभाषा भवेत्' इति श्रीमातुः सन्देशः। वस्तुतः भारतवर्षे संस्कृतं विहाय नास्ति कापि भाषा या समस्तदेशस्य अर्थे ग्रहणयोग्या भवेत्। 'हिन्दी'भाषा 'हिन्दी'भाषिभ्यः साधुः, 'तमिल'भाषा द्रविडेभ्यः उत्कलभाषा च उत्कलेभ्यः इत्येषा समाना कथा सर्वासां जनपदभाषाणाम्। कापि एका जनपदभाषा समग्रदेशस्य क्षेमकरी भवितुं नार्हति। संस्कृतभाषा न कस्यापि जनपदविशेषस्य भाषा। किञ्च इयं समस्तभारतीयभाषाणां जननी। पुराकाले इयं भारते सर्वसाधारणी, भाषिता भाषा आसीत्। कालक्रमेण पाण्डित्याभिमानि-पण्डितानां प्रभावेण सा दुर्बोधा क्षीणादरा च अभूत्। परिणामतः संस्कृतं देवमन्दिरे, पण्डितानां कुले जनसम्पर्काच्च दूरे कस्मिंश्चित् कोणे एव सीमिता अभवत्। किन्तु भावि-आध्यात्मिक-भारतस्य अर्थे अस्याः भाषायाः सुविपुल-महत्त्वदृष्ट्या श्रीमाता अस्याः पुनरुत्थानं कामयते। सा वाञ्छति यत् सर्वजन-बोध्यम्, सरलम्, भाषितं संस्कृतं भारतस्य राष्ट्रभाषा भवेत्, न तु पाण्डित्यपूर्ण-संस्कृतम्। अत्र श्रीमातुः ११-११-१९६७दिनाङ्कीय-मूल-फ्रांसभाषामय-सन्देशस्य संस्कृतरूपान्तरम् उपन्यस्यते सुधियां संस्कृतप्रेमिणां पुरतः।]

संस्कृतम्!

संस्कृतं तु सर्वैः शिक्षणीयम्। ये केऽपि अत्र कार्यं कुर्वन्ति ते सर्वे एतत् शिक्षेरन्, यत् किमपि भवेत् तेषां जन्मस्थानम्।

न तत् पाण्डित्यपूर्णं संस्कृतम् अपि तु तत् संस्कृतं यत् भारतस्य सर्वाः भाषाः प्रति द्वारम् उद्घाटयति। मन्ये एतद् अपरिहार्यम्। उत्तमं च एतद् भवेत् यत् कतिपयैः वर्षैः भारतस्य प्रतिनिधिभाषा स्यात् नवयौवनशालि संस्कृतम्, भाषितं संस्कृतम्। वस्तुतः भारतस्य सर्वभाषाणां पृष्ठतः संस्कृतमेव विद्यते। तदेव उपादेयम्। अयमेव आसीत् श्रीअरविन्दस्य विचारः यदा आवाम् अस्य चर्चाम् अकुर्व। अधुना आङ्ग्ली समग्रदेशस्य भाषा, किन्तु अस्वाभाविकम् एतत्। अतीव उपयोगिनी एषा भाषा (English) बहिर्जगता सह सम्बन्धान् सुविधाजनकान् कर्तुम्, किन्तु यथा प्रत्येकदेशस्य काचित् स्वकीया भाषा भवति तथैव भारतस्यापि भवेत्। अत्र तु यदैव कोऽपि समग्रदेशस्य अर्थे एकां राष्ट्रभाषां

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कामयते तदा सर्वे कलहम् आरभन्ते। प्रत्येकम् इच्छति यत् मदीया मातृभाषा एव राष्ट्रभाषा भवतु। एतत् सर्वथा मूढतापूर्णम्। किन्तु संस्कृतविषये कस्यापि किमपि कथनीयं न स्यात्। यतो हि एषा भाषा अन्यभाषाभ्यः प्राचीनतरा। सन्ति चात्र ध्वनयः, बहूनां शब्दानां मूलध्वनयः।

इमं विषयम् अहं श्रीअरविन्दपादेभ्यः अधीतवती। अतीव रुचिकरः खल्वयं विषयः। संस्कृते सन्ति ईदृशाः धातवः ये विश्वस्य सर्वभाषासु दृश्यन्ते। इदमेव शिक्षणीयम्। एतत् सर्वभाषाव्यापि संस्कृतं च भारतस्य राष्ट्रभाषा भवेत्। भारते जातः प्रत्येकं शिशुः संस्कृतं जानीयात् यथा फ्रांसदेशे जातः प्रत्येकं शिशुः फ्रांसीं जानाति। न सः फ्रांसीं सम्यक् भाषितुं पारयति न च तस्य फ्रांसीज्ञानं सुगभीरम्, किन्तु तेन किञ्चित् फ्रांसी (French) ज्ञातव्या एव। नैवं किम्? जगतः सर्वदेशेषु इयं समाना एव कथा। ज्ञातव्या एव तत्तद्देशजातेन शिशुना निजराष्ट्रभाषा। ततश्च शिक्षणक्रमे सः यति भाषाः इच्छति तति शिक्षितुम् अर्हति। साम्प्रतं तु वयं कलहमग्नाः भवामः। एतत् च कस्यापि सद्वस्तुनः निर्माणाय अतीव कुत्सितं वायुमण्डलम्। तथापि आशासेऽहं यत् तद् दिनम् आगमिष्यति यदा एतत् सम्भविष्यति।

अतोऽहं कामये यद् अत्र सरलं संस्कृतं शिक्ष्यताम्, यथासम्भवं सरलम्, किन्तु नैव सरलीकृतम् अपि तु स्वोद्गमतः अविच्छिन्नमपि सरलम्। संस्कृत-भाषागताः ध्वनयः एव शब्दानां ते मूलधातवः यैः शब्दाः निर्मीयन्ते। न जाने, अपि अस्ति कश्चिदत्र समग्रे भारते वा यः इमान् ध्वनीन् पुनरुद्धर्तुम् आविष्कर्तुं वा पारयेत्। श्रीअरविन्दः एतत् जानाति स्म। किन्तु यः संस्कृतं सुगभीरं जानाति सः एतत् कर्तुं पारयेत्।···

अपि संस्कृतं भारतस्य राष्ट्रभाषा भवितुम् अर्हति?

प्रश्नः—संस्कृतविषयकः श्रीमातुः सन्देशः पठितः। संस्कृतं किं सत्यतः भारतस्य राष्ट्रभाषा भविष्यति? भारतसर्वकारस्तु हिन्दीभाषायाः प्रचार-प्रसारकर्मणि तत्परः। संस्कृतस्य नामापि तत्र न श्रूयते! अस्यां स्थित्यां संस्कृतं राष्ट्रभाषा भविष्यति इति असम्भवं प्रतीयते। अत्र भवतां किम् अभिमतम्?

उत्तरम्—आशासेऽहं यत् तद् दिनम् आगमिष्यति यदा एतत् सम्भविष्यति (संस्कृतं भारतस्य राष्ट्रभाषा भविष्यति)। ···(अतः) ये केऽपि अत्र कार्यं कुर्वन्ति ते सर्वे संस्कृतं शिक्षेरन्, यत् किमपि भवेत् तेषां जन्मस्थानम्।··· भारतस्य प्रत्येकं शिशुः संस्कृतं जानीयात्।···" इति श्रीमातुर्वाणी किं वितथा?

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ये श्रीमातरं जानन्ति तस्याः दिव्यस्पर्शं च लब्धवन्तः ते अस्मिन् विषये निःसंशयाः यत् तस्याः वचनम् अन्यथा भवितुं नार्हति । मानवीयाऽज्ञानवशतः कामं कियान् अपि कालः गच्छतु, किन्तु अन्ते तद्वचनस्य चरितार्थता सुनिश्चिता । श्रीमाता स्वयमपि अवोचत् यत् तस्याः वाणी न कोऽपि उपदेशविशेषः । सा हि निर्दिष्ट-उद्देश्यपूर्तये स्फुरिता कार्यनिरता कापि शक्तिः ।

श्रीमाता मनसा बुद्धया वा किमपि न ब्रवीति अपि तु दिव्यदृष्ट्या प्रत्यक्षीकृतं वस्तुसत्यमेव प्रकाशयति, यथा हि सा भारतवर्षस्य स्वाधीनताप्राप्तेः सप्तविंशतिवर्षपूर्वम् एव १९२०तमे ख्रीस्ताब्दे "भारतवर्षं स्वाधीनम्" इति श्रीअरविन्दम् अकथयत्[1] । तदा तु भारतवर्षस्य स्वाधीनता कल्पनातीता अतर्क्या च आसीत् । तथात्वेऽपि सा भारतवर्षं स्वाधीनं भविष्यतीति भविष्यकालीनं वचनं न कथयित्वा "भारतं स्वाधीनम्" इति वर्तमानकालीनं वचनमेव अवदत् । ध्यानावस्थायां चेतनायाः कञ्चित् स्तरं लोकं वा अधिरुह्य, भारतवर्षस्य स्वातन्त्र्यं प्रत्यक्षीकृत्य सा श्रीअरविन्दं तथा अभणत् । भौतिकजगति ततः सप्तविंशतेः वर्षेभ्यः परं स्वाधीनता सम्प्राप्ता । वस्तुतः यत् किमपि भौतिकजगति घटते तत् ततः बहुकालपूर्वं सूक्ष्मजगति घटितं भवति । तत्र घटितस्य प्रकाशः मानवस्य आस्पृहां प्रस्तुतिं च अवलम्ब्य इह चिरेण अचिरेण वा जायते ।

अन्ये केचन प्रसङ्गाः अपि अत्र स्मरणयोग्याः श्रीमातुः श्रीअरविन्दस्य च वाण्याः सत्यतायाः अवबोधाय । तैः राष्ट्रभाषाविषये तयोः अभिलाषानुरूपं भारतसर्वकारस्य कर्तव्यं स्पष्टीभविष्यति ।

१९४२तमे ख्रीस्ताब्दे Sir Stafford Crippsमहाशयः भारतवर्षस्य राष्ट्रियमहासभा(Congress)नेतॄणां समक्षं भारतीय-स्वातन्त्र्यविषये निजप्रस्तावान् समुपस्थापितवान् । ते सर्वेऽपि प्रस्तावाः स्वीकार्याः इति सन्देशं श्रीअरविन्दः महात्मगान्धिनं नेहरुमहाशयं च विशेषवार्ताविहेन प्रेषितवान्[2] । यदि ते प्रस्तावाः स्वीकृताः अभविष्यन् तदा भारतवर्षस्य विभजनं नैव अभविष्यत् । किन्तु…??

---

[1]विस्तरार्थम् "India and Her Destiny" इति पुस्तिकायां दशम-एकादश-द्वादश-पृष्ठानि द्रष्टव्यानि ।

[2]नीरदवरण-विरचितस्य 'Twelve Years With Sri Aurobindo' इति पुस्तकस्य (द्वितीयसंस्करणस्य) १५६तमपृष्ठतः द्रष्टव्यम् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तथैव १९६५तमे ख्रीस्ताब्दे भारत-पाकस्थान-युद्धसमये श्रीमाता स्वसन्देशं प्रसारितवती यत् युद्धं तावत् चालनीयं यावत् पाकस्थानस्य अस्तित्वं लुप्तं न स्यात् । भारतवर्षं सत्यस्य विजयार्थं युध्यते तावत् च योत्स्यते यावत् भारत-पाकस्थानयोः ऐक्यं साधितं न स्यात्, यतो हि ऐक्यमेव तयोः सत्तागतं सत्यम् । किन्तु सर्वकारेण किं कृतम्...!!

घटितपूर्वाः इमे कतिचित् प्रसङ्गाः तयोः वाण्याः शक्तिं प्रमाणयितुं पर्याप्ताः । इतः परमपि यदि तयोः वचने सन्देहः स्यात् तर्हि अहो दुर्भाग्यम् !

हिन्दीभाषायाः सम्बन्धेऽपि तया असकृत् स्पष्टं निर्दिष्टम्—

"हिन्दीभाषा तेभ्यः एव समीचीना ये हिन्दीभाषिजनपदम् अधिवसन्ति । संस्कृतं समस्तभारतीयानां कृते श्रेयस्करम्" इति ।

उषानगरी(Auroville)विद्यालयस्य शिक्षणक्रमे श्रीमाता स्वयं निर्दिष्टवती—

हिन्दीभाषायाः स्थाने सरलसंस्कृतमेव भारतवर्षस्य भाषा कर्तव्या इति ।

सत्यदर्शिमहर्षीणां मार्मिक-वचनानाम् अवहेलनेन देशस्य कीदृशी दुर्दशा जाता कीदृशी च अधुनापि जायते इति अस्माभिः नित्यशः अनुभूयते । भुक्तभोगाः वयं राष्ट्रभाषाविषये अदूरदर्शितायाः अज्ञानतायाः च पुनरावृत्तिं न कुर्याम सोत्साहं च सत्प्रयासे रताः भवेम इति अस्माकं सत्यप्रार्थना स्यात् भगवत्पादपद्मयोः ।

संस्कृतं भारतस्य राष्ट्रभाषा कथं भवेत् ?

प्रथमम् अस्माभिः हृदयेन बोद्धव्यं यत् भारतस्य राष्ट्रभाषापदाय, निखिलराज्यानां सम्पर्कभाषापदाय, भारतस्य ऐक्याय संस्कृतं विहाय अन्या कापि जनपदभाषा नैव उपयुक्ता न च समर्था इति । भारते राष्ट्रभाषापदे प्रायेण दाक्षिणात्याः आङ्गलीं प्रतिष्ठापयितुम् इच्छन्ति उदीच्याः च हिन्दीम् । अस्याः चिरन्तन-विवादास्पद-समस्यायाः समाधानं श्रीमाता श्रीअरविन्दः च बहुकालपूर्वं कृतवन्तौ ।

श्रीमाता कथयति यत् आङ्गलभाषा न अस्माकं स्वकीया भाषा किन्तु विदेशीया । इयं केवलं पृथिव्याः अन्यदेशैः सह सम्पर्कसाधनार्थम् अतीव उपयोगिनी । तथापि यथा प्रत्येकदेशस्य कापि स्वकीया भाषा भवति तथैव भारतस्यापि भवतु इति तस्याः अभिमतम् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भारतस्य राष्ट्रभाषापदाय हिन्दीभाषा अपि न योग्या न च सा सर्वेषां क्षेमकरी इति श्रीमातुराशयः। सा कथयति—हिन्दीभाषा तेभ्यः एव समीचीना ये हिन्दीभाषिजनपदम् अधिवसन्ति, संस्कृतं तु सर्वेषां भारतीयानां कृते श्रेयस्करम् इति। उषानगरी(Auroville)विद्यालयस्य शिक्षणक्रमे सा स्पष्टं निर्दिष्टवती यत् राष्ट्रभाषापदे हिन्दीभाषास्थाने सरलसंस्कृतेन प्रतिष्ठितेन भवितव्यम् इति।

अतः प्रथमं तावत् अस्माकम् अयं हिन्दीव्यामोहः पूर्णतः नश्येत्। राष्ट्रभाषाविषये कापि प्रान्तविशेषप्रवणता, जनपदभाषासक्तिः एकदेशीयता च न स्यात् अस्माकम्। भारतस्य ऐक्यम् अनया नैव सुप्रतिष्ठितं भविष्यति न च भारतस्य गौरवं वर्धिष्यते विदेशेषु। श्रीमाता सप्तदशवर्षपूर्वम् अब्रवीत्—भारतवर्षं यदा एकं भविष्यति तदा कापि भाषा स्वतः भविष्यति या सर्वजनबोध्या सर्वजनग्राह्या च स्यात्। ततः वर्षद्वयात् परं पुनः सा अवादीत् यत् संस्कृतं भारतस्य राष्ट्रभाषा प्रतिनिधिभाषा वा भवेत् इति।

संस्कृतं भारतस्य राष्ट्रभाषा कथं भविष्यति इति एतदपि तया निर्दिष्टम्। प्रथमं संस्कृतभाषा जीवज्जाग्रद्भाषा कर्तव्या। ये संस्कृतं न जानन्ति ते अवकाशसमये संस्कृतं पठेयुः। श्रीमाता स्वयमपि यदा सावकाशा भवति स्म तदा संस्कृतं शिक्षते स्म।

श्रीअरविन्दः संस्कृते उपनिषदमेकां लिखितवान् अन्ये च तस्य अप्रकाशित-संस्कृतलेखाः अधुना प्रकाश्यन्ते Archives and Research इति पत्रिकायाम्। वेदस्य गूढप्रतीकात्मकाः आध्यात्मिकार्थाः तेनैव उद्घाटिताः। गीतोपनिषदां नवीनं गुह्यतत्त्वम् अपि तेनैव प्रकाशितम्।

अथ जनाः बोधनीयाः यत् संस्कृतवर्जं नास्ति कापि अन्या भाषा या तेषां मातृभाषया सह निकटतरं सम्बद्धा तत्समृद्धिकरी च स्यात्। अपि च, संस्कृतस्य प्रचारप्रसारार्थं संस्कृत-नाटक-सम्मेलन-भाषणादीनि प्रतिराज्यं प्रतिमण्डलं च नियमितम् आयोजनीयानि। सर्वेषां संस्कृतशिक्षणार्थं सुव्यवस्था करणीया। संस्कृतशिक्षणे संस्कृतश्लोकाः सस्वरं पाठनीयाः। संस्कृतस्य उच्चारणमपि यथाविधि शिक्षणीयम्।

अथ भारतस्य प्रत्येकं जनपदे संस्कृतं शिशुश्रेणीतः स्नातकोत्तरस्तरपर्यन्तं संस्कृतमाध्यमेनैव पाठनीयम्। एतदर्थं पर्याप्तं बालसाहित्यादिकं रचनीयम्। तत्परं

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यदा जनाः स्वयं बोधिष्यन्ति संस्कृतं च वरयिष्यन्ति तदा तद् राष्ट्रभाषा भविष्यति । तत्पूर्वं कस्याः अपि अन्यभाषायाः आरोपः बलात् नैव कर्तव्यः ।

आश्रमे शिशुविहारे एव शिशूनां संस्कृतभाषणं श्रुत्वा संस्कृतशिक्षणं च दृष्ट्वा अत्र सर्वे संस्कृतस्य उज्ज्वलभविष्यम् आकलयितुं शक्ष्यन्ति निःसंशयम् । संस्कृतं व्यवहारभाषा भवतु इति सत्यहृदयेन यदि वयम् इच्छामः तर्हि सर्वेऽपि संस्कृतज्ञाः, संस्कृतविद्वांसः प्रथमं व्यवहारबुद्धयः भूत्वा दैनन्दिनजीवने संस्कृतं व्यवहरन्तु सुरभारतीसमर्चनां च कुर्वाणाः भारतवर्षस्य गौरवं वर्धयन्तु ।

श्रीमाता अकथयत्—"भारतवर्षः न केवलं कोऽपि भूखण्डविशेषः, सः खलु एका देवी । सः जगतः गुरुः ।" स्वगृहे भारते हिन्दीम् आङ्गलीं वा पुरस्कृत्य बहिर्जगति भारतस्य गुरुत्वपदे प्रतिष्ठापनं हास्यास्पदं खलु । या भाषा निखिलज्ञानस्य भाण्डारं वर्तते यां च अध्येतुं विदेशीयाः अपि समुत्साहिनः भवन्ति, तां संस्कृतभाषां भारतीयाः वयं कथम् अवहेलयेम ? अस्माभिः अवहेलने कृते किं विदेशीयाः अस्मान् संस्कृतं शिक्षयिष्यन्ति ?

*

वस्तुतः श्रीमाता सर्वासां समस्यानाम् एकमेव समाधानं विहितवती । सा कथयति—प्रथमं भारतस्य आत्मनः आविष्कारः ततश्च तस्य अभिव्यक्तिः कर्तव्या ।

कथम् एतत् सम्भवेत् इति अस्य उत्तरमपि श्रीमाता स्वयमेव दत्तवती । तत् च एवम्—जनः स्वयं स्वचैत्यसत्तायाः अन्तरात्मनः वा विषये सचेतनः भूयात् । सः चैत्यपुरुषः च सेवाभावेन भारतात्मनि प्रगाढानुरागम् अनुभवतु तस्याभीप्सां च करोतु । निष्ठायां सत्यां साफल्यं सुनिश्चितम् इति सा वदति । तदा का स्याद् भारतस्य राष्ट्रभाषा अथवा किम् अन्यासां समस्यानां समाधानम् इति सर्वं स्वतः एव ज्ञास्यते ।

किन्तु कः खलु एतत् अहंकारं विहाय सततनिष्ठया कुर्यात् ? भारतस्य भाषासम्बन्धि-भवितव्य-निर्धारणविषये आत्मसचेतनता-रहितस्य, अहंप्रेरितस्य जनस्य किमपि मार्गदर्शनं नोचितं न च युक्तम् इति वयं मन्यामहे । अतः ये ऋषयः, सत्यद्रष्टारः, तेषाम् उपदेशः एव अस्माभिः आचरणीयः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

द्वौ शिक्षकौ

सङ्ग्रामः विक्रमश्च द्वौ शिक्षकौ, तरुणौ, स्फूर्तिमन्तौ अविवाहितौ च। एकस्मिन्नेव ग्रामे जातौ तौ ग्रामाद् बहुदूरे पूर्णाङ्गशिक्षाकेन्द्रयोः संस्कृतम् अध्यापयतः। द्वयोः जीवनस्य लक्ष्यं प्रायः समानम्। यथा समग्रं जीवनं योगः तथैव समग्रं जीवनं शिक्षा भवितुम् अर्हति इति वचने तौ श्रद्धावन्तौ। समग्रं जीवितं शिक्षायाः आदाने प्रदाने च व्यतीतं भवेत् इति द्वयोः संकल्पः। नामानुरूपं साहसम्, ओजः, प्रतिभा धैर्यं च द्वयोः वर्तन्ते एव। जीवितं चिराचरितगड्डरिका-न्यायेन न यापयित्वा कस्यापि परमोद्देशस्य पूर्तये उत्सृज्येत इति उभयोः सिद्धान्तः। लक्ष्यस्य समानत्वात् तयोः मैत्री घनिष्ठा। यदा तौ ग्रामम् आगच्छतः तदा जनाः प्रायः द्वौ अपि सह हसन्तौ, जल्पन्तौ विहरन्तौ च पश्यन्ति।

अथ कतिपयाः मासाः व्यतीताः। द्वयोः साक्षात्कारः न जातः। अतः तौ परस्परं मिलितुम् उत्कण्ठितौ। ततः एकदा कस्मिन्नपि शुभावसरे तौ मिलितौ।

सङ्ग्रामः—सुदिनं विक्रम!

विक्रमः—सुदिनं सङ्ग्राम! अरे त्वमपि संस्कृतं भाषसे? कदा प्रभृति इयं प्रवृत्तिः?

सङ्ग्रामः—कुतोऽत्र आश्चर्यम्? त्वमपि संस्कृतं भाषसे एव। शृणु तावत्। कदाचित् अस्माकं शिक्षाकेन्द्रे साप्ताहिकगोष्ठ्यां श्रीमातुः संस्कृतविषयकं सन्देशं श्रुत्वा जागरितेयं प्रवृत्तिः अधुना वर्धतेतराम्। यद्यपि संस्कृतं न मे भाषिता भाषा न चाहम् अधुनापि संस्कृतमाध्यमेन सम्यक् पाठयामि तथापि अस्यां दिशायां प्रयत्नपरोऽहम्। प्राचीनकाले दैनन्दिनजीवने व्यवहृता आर्याणां विश्ववरिष्ठा भाषेयम् अधुनापि जनभाषा भूयात् इति श्रीमातुः अभिलाषः। तस्याः इच्छापूरणाय तद्यन्त्रभूतस्य मे प्रचेष्टा खल्वियम्। अस्तु, कथं त्वं प्रवृत्तोऽस्मिन् सुमहाप्रयासे?

विक्रमः—शृणु तावत्। प्रेरणायाः मूलं समानमेव। एकदाहं छात्त्रैः सह श्रीअरविन्दाश्रमं गतवान्। तत्र साक्षाद् दृष्टं यत् संस्कृतस्य शिक्षकाः शिक्षिकाः च संस्कृतमाध्यमेनैव संस्कृतं पाठयन्ति। छात्त्राः अपि तैः सह संस्कृतेन भाषन्ते। अन्ये बहवः संस्कृतेन भाषितुं प्रयतन्ते। अथ अस्माकं शिक्षाकेन्द्रेऽपि तथैव भूयात् इति मे आस्पृहा। अन्यथा पश्चात् छात्त्राः अस्मान् दोषयिष्यन्ति।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नैवं किम् ? तस्माद् अहं स्ववर्गे यथाशक्ति संस्कृतं भाषितुं प्रयते ये च संस्कृतं जानन्ति तैः सह संस्कृतेन आलपितुं कामये । अशुद्धयः तु भवन्ति एव किन्तु सम्भाषणेन ताः क्रमशः दूरीभवन्ति दक्षता च वर्धते । कदाचित् तु आरम्भः करणीयः एव । तस्मात् कालक्षेपः कुतः ?

सङ्ग्रामः—साधु, साधु मित्र ! उत्तमस्तवायं कल्पः । शुभारम्भः श्रेयस्करः । अस्तु, पुनर्दर्शनाय ।

विक्रमः—आम्, पुनर्दर्शनाय, पुनर्हर्षणाय, पुनर्मातृदेव्याः कृपावर्षणाय ।

विक्रमस्य संस्कृतनिष्ठा

विक्रमः उत्कलेषु कस्यचित् पूर्णाङ्गशिक्षाकेन्द्रस्य संस्कृतप्राणः शिक्षकः । संस्कृतशिक्षणे विलक्षणः सः । यथा मातृभाषामाध्यमेन अन्यविद्यालयेषु संस्कृतं पाठ्यते तथा कर्तुं सः न इच्छति । स्वयम् उत्कलभाषामाध्यमेन संस्कृतम् अधीतवान् सः पुरानतशिक्षापद्धतेः दुर्वलतां छिद्राणि च सम्यक् जानाति । तया पद्धत्या संस्कृतपदवीधारिणोऽपि संस्कृतं सम्यक् भाषितुं न पारयन्ति । अतः भाषाशिक्षणे कः लाभः ? भाष्यते इति भाषा । यदि सा न भाष्यते तर्हि मृतकल्पा जायते । अनेन कारणेन जनाः संस्कृतं मृतभाषेति वदन्ति । तेषां वादः युक्तियुक्तः किन्तु न समर्थनीयः ।

विक्रमस्य मनसि स्फुरति कापि पूर्वानुभूतिः—नवमश्रेण्याम् ऐच्छिक-विषयत्वेन तेन संस्कृतं गृहीतम् आसीत् । तदा अन्ये तं किं किं नाकथयन् ! 'संस्कृतं मृतभाषा ! तत् पठित्वा त्वं किं करिष्यसि ? गणितं पठ, द्राक्तरः भविष्यसि, अभियन्ता (Engineer) भविष्यसि, वैज्ञानिकः भविष्यसि···तेन जीवने प्रतिष्ठां प्राप्स्यसि । संस्कृतं पठित्वा कुटुम्बभरणेऽपि असमर्थः स्थास्यसि ।

'सत्यमेतत् ननु ? तदा कुतः मया संस्कृतं गृहीतम् ?' इति प्रश्नः तं तुदति स्म । श्रीमातुः प्रेरणात् आश्रमे संस्कृतस्य जीवत्स्वरूपं दृष्ट्वा अधुना सः आश्वस्तः ।

सः चिन्तयति—अपि जीवनं केवलं परिवारपोषणार्थम् ? नैव । अपि नाम द्राक्तराः, अभियन्तारः, वैज्ञानिकादयः साम्प्रतिक-जीवनेन सत्यतः सन्तुष्टाः ? नैव ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भगवदुपलब्धिरेव जीवनस्य प्रथमं परमं च लक्ष्यम् । अपि संस्कृतम् अस्मिन् सहायकं भवितुं नार्हति ? तदा का नाम सा भाषा या एतदर्थम् उपयुक्ता समर्था वा ? भारतस्य सांस्कृतिकम् ऐतिह्यम् आध्यात्मिकी समृद्धिश्च कस्यां भाषायां प्राचुर्येण लभ्येते ? ऋते संस्कृतात् अस्ति कापि ईदृशी अन्या भाषा समग्रे भारते ?

विक्रमस्य अयं बोधः अभ्रान्तः । संस्कृतं क्षेमकरं नास्ति इति तं बोधयितुं समग्रं विश्वमपि नालम् । हृदयस्य अन्तरतमं बोधम् अन्यथाकर्तुं सर्वाः अपि मानवीयाः चेष्टाः अक्षमाः । सर्वेऽपि यदि अस्य विपरीतं कथयेयुः तथापि सः स्वकार्यं सम्पादयिष्यति एव ।

अधुना पुरातनशिक्षापद्धतिः तस्मै न रोचते । अनया छात्त्रस्य जीवनं कथमपि पूर्णतां न प्राप्नोति । एकदा कस्मिंश्चिद् विद्यालये संस्कृतशिक्षणपद्धतिं दृष्ट्वा सः अतीव खिन्नः दुःखितश्च अभवत् ।

पण्डितमहाशयः वेत्रहस्तः श्रेणीप्रकोष्ठं प्राविशत् । छात्त्राः भयाकुलाः इष्टदेवस्मरणे रताः इव ! कदा घण्टा वादयिष्यते इति तेषां सततचिन्ताविषयः।

अथ पण्डितवरः 'संस्कृतप्रवेशः' इति पुस्तकम् उद्घाट्य दीर्घानुच्छेदमेकम् अपठत् । सन्धिच्छेदं कृत्वा तस्यार्थम् उत्कलभाषायाम् अबोधयत् । ततः छात्त्रान् पठनाय आदिशत् । ये केचन छात्त्राः सम्यक् पठितुं न पारितवन्तः, तेषु आरब्धः निर्दय-पाशविक-वेत्रप्रहारः ! करुणचीत्कारेण संपूर्णः प्रकोष्ठः पूरितः । ततः पण्डितमहाशयः आगामिवारे 'नर'शब्दात् 'साधु'शब्दपर्यन्तं शब्दरूपाणि कण्ठस्थी-करणीयानि इति आदिश्य निर्गतः ।

अचिरम् उपस्थितं तद् दिनम् । केचन छात्त्राः वेत्रभयात् विविधमिषैः विद्यालयं नागताः । कतिपयाः गृहात् निर्गत्य आत्मानं क्वचिद् अगोपयन् । ये केचन अनन्योपायाः आगताः तेषां हृत्पिण्डम् उद्वेगेन स्पन्दमानम् आसीत् । वेत्राघातात् कः न बिभेति ?

अथ पण्डितवरः कक्षं प्रविश्य सर्वान् छात्त्रान् एकैकं शब्दरूपाणि अपृच्छत् । ये वराकाः अशुद्धीः अकुर्वन् तेषां दशा पूर्ववत् दयनीया सञ्जाता । एतत्सर्वम् अमानुषिकम् आचरणं दृष्ट्वा विक्रमः नितरां व्यथितः । तत्रैव सः 'सम्भवं चेत् स्वजीवने संस्कृतं भिन्नरूपेण पाठयिष्ये' इति संकल्पं कृतवान् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वस्तुतः ईदृशं ताडनं यदि अन्यत्रापि प्रवर्तेत तदा संस्कृतं प्रति कस्य रुचिः जागृयात् ? न किम् अनेन संस्कृतस्य प्राणनाशे संस्कृतशिक्षकाः एव उत्तरदायिनः इति प्रमाण्यते ?

किन्तु विक्रमः अस्मिन् विषये अपवादभूतः (exception) । सः श्रीमातुः ग्रन्थान् पठित्वा आश्रमे च प्रत्यक्षं दृष्ट्वा एतद् बोधति यत् छात्राः कथमपि न ताडनीयाः । तेषु लघुचपेटिका अपि न प्रयोक्तव्या इति श्रीमातुः निर्देशः ।

वस्तुतः शिक्षकः नाम न कोऽपि भयप्रदः दानवः अपि तु छात्रस्य बन्धुः इव अतीव घनिष्ठः, प्रियः आत्मीयः च । विक्रमेण संस्कृतपाठनस्य काचित् सरलपद्धतिरपि अधिगता—शिशुविहारतः (Kindergarten) संस्कृतं संस्कृतमाध्यमेन आकर्षकशैल्या पाठनीयम् । छात्रैः सह संस्कृतशिक्षकः सदा सर्वत्र संस्कृतेनैव भाषेत । एवं सति संस्कृते क्लिष्टतायाः कुत्र अवसरः ? अयमेव विधिः सर्वत्रानुसरणीयः संस्कृतं व्यवहारभाषां कर्तुकामैः ।

छात्रशिक्षकालापः

(१)

अद्य पञ्चमे अन्तरे विक्रमस्य संस्कृतवर्गः । नववर्षे इदं तस्य प्रथमम् अन्तरम् । सरल-सरस-सुबोधरीत्या संस्कृताध्यापनं तस्याभीष्ट-लक्ष्यम् । संस्कृतं प्रति रुचिजागरणं तस्य शिक्षणपद्धतेः मूलमन्त्रः । तस्मात् स्वस्य आचरणे शिक्षणविधौ वा सः छात्राणाम् अरतिजनकम् अरुचिकरं वा किमपि कर्तु नैव इच्छति । सरल-मधुर-व्यवहारेण सर्वेषां हृदयम् आह्लादयति सः । छात्राः तस्मात् न बिभ्यति । तेभ्यः सः न कोऽपि कठोरः प्रशासकः अपि तु मङ्गलकामी सहायकबन्धुः । छात्राः तस्य स्नेह-सदिच्छापूर्ण-व्यवहारेण प्रसन्नाः संस्कृतं शिक्षितुम् उत्साहिताः भवन्ति । तेन सह संस्कृतेनैव वक्तव्यमिति ज्ञात्वा सर्वे संस्कृतेन भाषितुं प्रयतन्ते । तेषां भाषणगताः अशुद्धीः सः तत्क्षणं सस्नेहं संशोधयति । अतः छात्राः दिनानुदिनं संस्कृतम् अधिकाधिकं जानन्ति, शुद्धतरं स्फुटतरं च भाषन्ते ।

अथ विक्रमः वर्गार्थं गच्छति । कक्षं प्रविश्य सर्वेषां नववर्षाभिनन्दनं करोति ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विक्रमः—शुभं नववर्षम् !

छात्राः—शुभं नववर्षम् आर्य ।

विक्रमः—पुरातनवर्षं तु समाप्तम् । तेन सह 'संस्कृतं कठिनम्' इति धारणापि समाप्ति गच्छेत् । संस्कृतं समग्रे भूमण्डले स्वमहिमानं प्रसारयेत् जनाश्च संस्कृताः भूत्वा भौतिकाध्यात्मिकदृष्टया सुख-शान्ति-कल्याणमयं जीवनं यापयेयुः इत्यस्माकं नववर्षशुभाशंसा ।

"अस्तु जन्म नवाव्दस्य नवं जन्मापि नश्चितेः ।
मुक्त्वा दूरं गतं याम भावि सत्वरमुज्ज्वलम् ।।"

अधुना संलापम् आरभामहे । कः वारः अद्य कश्च दिनाङ्कः ?

छात्त्रः—गुरुवारः तृतीयश्च दिनाङ्कः ।

विक्रमः—साधु । 'विद्यारम्भे गुरुः श्रेष्ठः' इति जानीमः एव वयम् । सप्ताहस्य इदं कतमत् दिनम् ?

छात्त्रः – चतुर्थम् ।

विक्रमः—किं तर्हि सप्ताहस्य प्रथमं दिनम् ?

छात्त्रः—रविवारः ।

विक्रमः—आम्, रविवारः छुट्टिदिनम्—न केवलं भारते, संसारे सर्वत्रापि । रविवारस्य अर्थः सूर्यवारः । सूर्यः अन्धकारविनाशकः, प्रकाशस्य, बुद्धेः, ज्ञानस्य, तापस्य प्राणशक्तेश्च प्रदाता । सः ईश्वरीय-सत्यस्य स्थूलं प्रत्यक्ष-रूपम् । अलं विस्तरेण । प्रसङ्गम् अनुसराम ।

रविवारात् परं कः वारः भवति ?

छात्त्रः—सोमवारः ।

विक्रमः—गतकल्ये गतदिने वा (ह्यः) कः वारः आसीत् ?

छात्त्रः—बुधवारः ।

विक्रमः—गतदिनस्य लघुनाम 'ह्यः' इति । तत्पूर्वदिने (परोह्यः) कः वारः आसीत् ?

छात्त्रः—मङ्गलवारः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विक्रमः—गतपूर्वदिनस्य नाम 'परोह्यः' इति। आगामिकल्ये आगामिदिने वा (श्वः) कः वारः भविष्यति ?

छात्रः—शुक्रवारः।

विक्रमः—आगामिदिनं 'श्वः' इति कथ्यते। आगामिदिनात् परदिने (परश्वः) कः वारः भविष्यति ?

छात्रः—शनिवारः।

विक्रमः—आम्, आगामिदिनात् परदिनं 'परश्वः' इति कथ्यते।

शनिवारः सप्ताहस्य अन्तिमं दिनम्—आश्रमे इदं चलचित्रदिनम्। सामान्यतया अस्मिन् दिने सायम् आश्रमे चलचित्रं प्रदर्श्यते।

एवं सप्ताहस्य सप्तानां दिनानां नामानि ज्ञातानि, परोह्यः, ह्यः, अद्य, श्वः, परश्वः इत्येषाम् अर्थः व्यवहारश्च ज्ञातौ। समयः सञ्जातः। विरमाम अधुना।

सङ्ग्रामस्य राधेशस्य च आलापः

श्रीअरविन्दान्ताराष्ट्रिय-शिक्षाकेन्द्रस्य वार्षिकावकाशः 'नॅवेम्बर'मासस्य प्रथमदिनाङ्कात् आरभ्य 'डिसेम्बर'मासस्य पञ्चदशदिनाङ्कं यावत् सार्धैक-मासव्यापी भवति। षोडशे दिनाङ्के विद्यालयस्य नूतनसत्त्रारम्भः।

राधेशः अस्य शिक्षाकेन्द्रस्य उच्चचर्यायाः (महाविद्यालयस्य) कश्चित् छात्रः। संस्कृतं तस्य अतीव प्रियविषयः। बहुवर्षेभ्यः सोऽत्र संस्कृतं पठति। संस्कृते संभाषणम्, लेखनं काव्यरचनं च सुन्दरं करोति। शिक्षकाः तस्मिन् बहु स्निह्यन्ति। संस्कृते तस्य उत्तरोत्तरं प्रगतिं कामयमानाः ते तत्साहाय्यार्थं सदा सन्नद्धाः तिष्ठन्ति। सोऽपि अस्य महासुयोगस्य सदुपयोगं करोति।

बहुवर्षाणि सः कटकनगरस्थं गृहं न गतः। पित्रोः आग्रहेण एतद्वारे स्वभ्रातृभगिनीभिः सह गृहं प्रयातः सः। किन्तु तस्य मनः तत्र न रमते। अपि च अद्य 'नॅवेम्बर'मासस्य एकादशः दिनाङ्कः—शिक्षाकेन्द्रस्य सामञ्जस्य-प्रशालायां (Hall of Harmony) संस्कृतदिवसस्य अनुष्ठानसमारोहः। पञ्चदशेभ्यः वर्षेभ्यः पूर्वम्, सप्तषष्टितमे वर्षे अस्मिन्नेव दिने श्रीमाता अहेतुक-कृपावशात् संस्कृतविषयिणीम् ओजस्विनीं शक्तिमयीं च वाणीम् अस्मभ्यं प्रसादीकृतवती। ततः प्रभृति एव संस्कृतस्य जीवत्स्वरूपं विलसति अस्मिन्

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

आश्रमपदे। अतः तस्य महिममयदिनस्य संस्मरणार्थं 'नवेम्बर'मासस्य एकादशः दिनाङ्कः संस्कृतदिवसः इति आश्रमे महोत्साहेन परिपाल्यते।

राधेशः अस्मिन् सुमहावसरे अत्र अवर्तमानः हृदयस्य भावावेगं तन्त्रीसन्देशेन ज्ञापयितुं प्रेषालयं गच्छति। तत्रत्य-पूर्णाङ्ग-शिक्षाकेन्द्रस्य संस्कृतानुरागी, संस्कृतभाषणोत्सुकः पूर्वोक्तः शिक्षकः सङ्ग्रामनामा तं मार्गे मिलति। अथ भवति संलापस्य उपक्रमः।

सङ्ग्रामः—सुप्रभातं राधेश !

राधेशः—(साश्चर्यम्) सुप्रभातम् आर्य !

सङ्ग्रामः—क्षम्यताम्, किञ्चित् प्रष्टुकामोऽहम्। त्वं मां नाभिजानासि मन्ये। त्वं तु अत्र बहुवर्षाणि नागतः। कथम् अभिज्ञास्यसि ? अहम् अत्रत्य-पूर्णाङ्ग-शिक्षाकेन्द्रस्य संस्कृतशिक्षकः सङ्ग्रामनामा। तव पित्रा समं मम परिचयः घनिष्ठः। त्वद्विषये तस्य मुखात् मया सर्वं श्रुतम्। त्वं वार्षिकावकाशे आयासि इति सः माम् असूचयत्। कदात्र संप्राप्तोऽसि ?

राधेशः—तृतीये दिनाङ्के रात्रौ एकादशवादने।

सङ्ग्रामः—मया तु त्वं न दृष्टः एषु दिनेषु ! कुत्र आसीः ?

राधेशः—अहम् अत्र नासम्। आगत्यैव अन्येद्युः भुवनेश्वरं गतवान्। तस्मादेव भवता न दृष्टोऽहम्।

सङ्ग्रामः—एवम् ! अस्तु, अधुना कुत्र गच्छसि ?

राधेशः—प्रेषालयम्।

सङ्ग्रामः—कुतः ?

राधेशः—तन्त्रीसन्देशं प्रेषयितुम्।

सङ्ग्रामः—कुतः ? किं जातम् ?

राधेशः—अद्य आश्रमे संस्कृतदिवसः परिपाल्यते। अत्र तिष्ठन् अहम् उत्कण्ठितः भवामि। तस्मात् तन्त्रीसन्देशेन हृदयस्य भावोच्छ्वासं संप्रेषयितुं प्रेषालयं गच्छामि।

सङ्ग्रामः—एवम् ! एहि। अत्र विलम्बः न कर्तव्यः। अहमपि त्वया सह प्रेषालयं यामि। (किञ्चित् दूरं गत्वा) मम मनसि बहुदिनेभ्यः कापि जिज्ञासा वर्तते। सा शमनीया।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

राधेशः—का सा जिज्ञासा ? प्रकाश्यतां स्वच्छन्दम् ।

सङ्ग्रामः—अहं तु आश्रमं न गतः । अचिरं तत्र गन्तुं कामये ।···यदि अत्र कोऽपि पृच्छेत्—यूयं समग्रं जीवनं शिक्षा इति उपदिशथ, तदा युष्माकं विद्यालये दीर्घावकाशस्य अवसरः कुतः ?—तस्मै किम् उत्तरं दास्यते ?

राधेशः—(क्षणं विचिन्त्य) अवकाशशब्दस्य अस्मदभिप्रायः स्पष्टीकरणीयः । विद्यालयं तालकयित्वा गृहाभिगमनम्, तत्र भूमिपरिवारादिविषयेषु मनोनिवेशनम् एव अवकाशम् अवगच्छन्ति जनाः सामान्यतया । अत्र अस्माकं दृष्टिकोणः संपूर्णतः भिन्नः । आश्रमशिक्षकाणां गृहम् आश्रमः एव । शिक्षायाः आदान-प्रदानमाध्यमेन भगवदुपलब्धिः तेषां लक्ष्यम् । न भवति तेषां परिवारः, कथं नाम स्यात् सन्ततिपरम्परा तस्याः चिन्ता वा ? आजीवनं ब्रह्मचारिणः ते शिक्षार्थमेव उत्सृष्टजीवनाः । 'अत्र अवकाशः कुतः ?' इति पृष्टे विद्यालयस्य परिचालनविषयकः प्रश्नः एव विचारणीयः । अस्मिन् समये श्रेणीप्रकोष्ठे अध्यापनमात्रं न भवति । अन्यत् सर्वमेव प्रचलति । विद्यालयस्य भित्त्यादीनाम् उपकरणादीनां च नवयोगः क्रियते । विभिन्नविभागानां तत्त्वावधायकाः आगामिसत्त्राय विभागान् सम्यक् व्यवस्थापयन्ति येन सत्त्रस्य मध्ये कापि असुविधा न जायेत । शिक्षकाः नूतनसत्त्रस्य कृते वर्गव्यवस्थां कृत्वा पाठ्यसामग्रीं सज्जीकुर्वन्ति । छात्राः विभिन्नकार्यक्रमेषु प्रतियोगितासु च भागं गृहीत्वा दक्षतां वर्धयन्ति । अपि च यस्मिन् विषये ते दुर्बलाः तत्तच्छिक्षकस्य साहाय्येन तं तं विषयं ते एषु दिनेषु समभ्यस्यन्ति । वस्तुतः शिक्षकेभ्यः तत्त्वावधायकेभ्यः च अयं कालः गभीरसाधनायाः समयः । अनेन आगामिसत्त्रस्य कार्यं चारुतरं प्रचलति । वयम् अवकाशे गृहम् आगन्तुम् उत्साहिताः आग्रहिणः वा न भवामः । बहुवर्षेभ्यः परं पित्रोः आग्रहेण भ्रातृभगिनीभिः सह अत्राहम् आगतः । अन्यथा आश्रमे एव स्वर्गः—लीलाखेलयोः भूमिः । अत्रागत्य एतद्वारस्य 'नॅवेम्बर'-सप्तदश-दिनाङ्कलभ्यं श्रीमातुः कक्षदर्शनं हारितम् अन्येभ्यः बहुस्वर्णावसरेभ्यश्च वञ्चितः । अत्रत्या जीवनधारा भिन्ना । तस्मात् शीघ्रं प्रतिगन्तुं कामये ।

सङ्ग्रामः—अस्तु राधेश ! अनुगृहीतोऽस्मि ।

राधेशः—अहमपि । यतो हि श्रीमातृकृपया संस्कृतदिवसेऽद्य भवता सह संस्कृतालापस्य शुभसुयोगः संप्राप्तः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

छात्रशिक्षकालापः

(२)

छात्राः—सुदिनम् आर्य !

शिक्षकः—सुदिनं वः !

छात्रः—मासद्वयात् परं भवन्तं पश्यामः । किम् अभवत् ? कुत्र आसीद् भवान् ?

शिक्षकः—अहम् अत्र नासम् । गृहं गतवान् ।

छात्राः—किमर्थम् ?

शिक्षकः—भूमिसम्बन्धि किमपि कार्यम् आसीत् । तदर्थं मम उपस्थितिः अनिवार्या अभवत् ।

छात्रः—एषु दिनेषु अस्माकं संस्कृतपठनं नाभवत् ।

शिक्षकः—तदर्थं क्षन्तव्योऽहम् । अस्तु, अद्य कामपि रुचिरां कथां श्रावयिष्यामि । श्रूयताम् । अपि युष्माभिः तालवृक्षः दृष्टः ?

छात्रः—आम्, बहवो दृष्टाः । अत्र तत्र उत्तुङ्गाः तालवृक्षाः विराजन्ते ।

शिक्षकः—किन्तु तालवृक्षे कुत्रापि पुष्पं दृष्टम् ?

छात्रः—न, कदापि न दृष्टं न च श्रुतम् अस्मासु केनापि ।

शिक्षकः—तालवृक्षेषु पुष्पाणि सदा सर्वत्र न दृश्यन्ते । किन्तु पुदुच्चेरी-नगरात् प्रायः सार्धत्रिक्रोशदूरे सरोवरस्य निकटे कश्चित् पुष्पितः तालवृक्षः मया सद्यः संदृष्टः । शतवर्षायुः सः वृक्षः विशालः, सामान्यतालवृक्षात् स्थूलतरश्च । तस्य बाहवः शुष्काः, शिखरं तु पुष्पमयम्, मुकुटवत् शोभते । वस्तुतः मुकुटधारी राजा इव अयं वृक्षः दूरादपि जनानां नयनमनांसि आकर्षति । अस्य पुष्पाणि एतद्वर्षस्य आरम्भे विकसितानि अन्तं यावत् च स्थास्यन्ति—लघुफलान्यपि भविष्यन्ति । तत्परं वृक्षः मरिष्यति ।

वृक्षस्य पार्श्वे ग्रामपालको नाम कश्चित् देवः अस्ति । तस्य वाहनं कुक्कुरः । कुक्कुरवाहनः कश्चिद् देवः अस्ति इति नासीत् मम ज्ञानम् ।

बहवः जनाः तं वृक्षं द्रष्टुं प्रायः प्रतिदिनं गच्छन्ति । एकदाहं स्वबन्धुभिः सह यानेन तत्र गतवान् । आपीतपुष्पमुकुट-परिधानं तं वृक्षं नारिकेलवनशोभितं

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तत् मनोरमं स्थानं च दृष्ट्वा सर्वे वयं हृष्टाः प्रमुदिताः च । तस्मात् स्थानात् कतिपयक्रोशेषु अन्यः कश्चिद् ईदृशः पुष्पितः वृक्षोऽपि अस्ति । सः अस्माभिः न दृष्टः । वृक्षविषयकम् एतत् सर्वं तत्रत्यः कश्चित् प्रौढः अस्माकं समक्षम् अवर्णयत् । अदृष्टपूर्वम् अश्रुतपूर्वं च किमपि मयाद्य वः श्रावितम् । मैवं किम् ? अलम् अद्य एतावता । पुनर्दर्शनाय । (जुलाई, १९८०)

चायापणगोष्ठी

समयः चतुर्वादनम् । चायपानस्य वेला । त्रयः बन्धवः चायापणे संमिलिताः—एकः अमरीकीयः, अन्यः आङ्ग्लदेशीयः अपरश्च भारतीयः । ते पटलस्य पार्श्वे उपधौ उपविश्य परस्परम् आलपन्ति सेवकं च प्रतीक्षन्ते । अथ सेवकः आगतः ।

प्रथमबन्धुः—सेवक, चायस्य त्रयः चषकाः कृपया ।

सेवकः—साधु, आदिश्यताम्—कीदृशः चायः ?

प्रथमः—नातितीक्ष्णः, शर्करा किञ्चिद् अधिका किन्तु दुग्धं न स्यात् । मम चायः सुमधुरः, अस्य साधारणः अपरस्य च शर्करारहितो भवेत् । अवगतम् ?

सेवकः—आम् । चायेन सह किमपि रुच्यं न इष्यते ? किं दद्याम्—कर्तपूरं (sandwich) वा शाकपूरं वा विपक्वकं वा ?

प्रथमः—मम मतेन कर्तपूरः एव वरः ।

अस्तु, का वार्ता प्रधानमहाशय ? का भवतो व्यापारदशा ?

तृतीयः—शोभना । किन्तु देशे सर्वत्र विक्षोभः, हट्टतालम्, संयात्रादयः भवन्ति । शोचनीया खल्वियं स्थितिः ।

आस्तां तावत् । (द्वितीयं प्रति) कः भवतो वृत्तान्तः ?

द्वितीयः—शोभनः, न तु विशेषेण । चिरात् दुष्कालपीडितोऽहम् । अस्माकं देशोऽपि अर्जेण्टाइनादेशेन सह युध्यमानः अमितां क्षतिम् अपरिमितां धनहानिं च सहते ।

तृतीयः—दुःखदमिदं वृत्तम् । आशासे अचिरं सर्वं भद्रतरं संपद्येत ।

प्रथमः—आम्, श्रेयस्कामैरेव भाव्यम् अस्माभिः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

द्वितीयः—युद्धे अस्माकं स्थितिः दृढा विजयोन्मुखी च । अस्माकं जलस्थलाकाशसेनाः अर्जेण्टाइनासैनिकान् व्यूहबद्धम् आक्रम्य भृशं त्रासयन्ति । अत्याधुनिकैः अण्वस्त्रैः संपन्ना अस्मदीया नौसेना सुदक्षा, प्रबला श्रेष्ठा च । पोताः तु सागरस्य गभीरतले विचरन्तः तान् सहसा आक्रामन्ति ।

तृतीयः—अपि ते सर्वथा तले विचरन्ति ?

द्वितीयः—कथमेतत् संभवेत् ? तलात् तु किञ्चिद् उपरि एव गन्तव्यम् ।

प्रथमः—अर्जेण्टाइनादेशस्य वायुसेनापि सुनिपुणा खलु । तेषां युद्धयानानि आकाशात् ऊर्ध्वम् उड्डीय, युष्मान् क्षेपणास्त्रैः आक्रम्य, बहून् पोतान् नाशयन्ति ।

तृतीयः—तानि किम् आकाशात् ऊर्ध्वं डयन्ते ?

प्रथमः—न, न, कथमेतत् संभवेत् ? किञ्चिद् अधस्तादेव । उपर्युपरि गच्छतः आकाशस्तु ऊर्ध्वमेव वर्तिष्यते । अस्तु, भवान् तु मध्ये आक्षिप्य आवाम् उपहसति । का विशेषता भवतो देशस्य ?

तृतीयः—(क्षणं विचिन्त्य) अस्माकं देशस्य ? स तु ऋषिमुनीनां पुण्यपीठम् इति सर्वे जानन्ति । योगेन अध्यात्मज्ञानेन च वयम् अन्यान् अतिशेमहे । अपरञ्च, अस्मद्देशवासिनाम् अस्ति काचिद् अन्यापि विशेषता ।

उभौ—(सोत्कण्ठम्) का सा ?

तृतीयः—गहना सा । अत्र तत्र गूढज्ञानचर्चा न युक्ता । आगम्यताम्, सरस्तीरे चर्चयेम । सेवक, देयकं कृपया ।

(सेवकः देयकम् आनयति । देयं परिशोध्य)

प्रथमः—धन्यवादाः, पुनर्दर्शनाय ।

भयं नाशस्य कारणम्

आसीत् कश्चित् सन्न्यासी । सः कस्मिंश्चित् पर्वते निवसति स्म । पर्वतस्य पाददेशे आसीत् मनोरमं नगरम् ।

एकदा सन्ध्याकाले सन्न्यासी नगराभिमुखं गच्छन्तीं कामपि महिलाम् अपश्यत् । सः ताम् अपृच्छत्, "का त्वम् ? त्वं तु अस्य लोकस्य न प्रतीयसे !" सावदत्, "नैवाहम् अस्य लोकस्य । अहं तु यमराजस्य दूतिका ।"

"कां नेतुम् आगतासि ?" इति सन्न्यासी अपृच्छत् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"न कमपि, किन्तु अस्मिन् नगरे महामारीं संक्रमयितुम् आगता । इयं महामारी सहस्रं जनान् मारयिष्यति ।" एतदुक्त्वा सा नगरम् अगच्छत् सन्न्यासी च स्वकुटीरम् ।

मासात् परं द्वौ पुनः मिलितौ । तदा सन्न्यासी अपृच्छत्, "त्वं तु सहस्रं मरिष्यन्ति इति अकथयः । वस्तुतः तु पञ्च सहस्रं मृताः । किमत्र कारणम् ?"

सा उदतरत्, "वस्तुतः महामार्या सहस्रं मृताः । अन्ये तु तस्याः भयेन एव !"

एतत् श्रुत्वा सन्न्यासी विहसन् अगच्छत् ।

सः गर्दभः आसीत्

आसीत् कश्चिद् व्यापारी । तस्य पार्श्वे द्वौ पशू आस्ताम्—अश्वः गर्दभः च । तयोः पृष्ठे पण्यम् आरोप्य सः प्रतिदिनं विपणिं नयति । तत्र गत्वा पण्यस्य विक्रयं करोति ।

एकदा सः यथानित्यं विपणिं गच्छति स्म । अश्वस्य पृष्ठे शर्करायाः गोणिकाः स्थापिताः आसन् गर्दभस्य पृष्ठे च कार्पासस्य । मार्गे एका नदी आसीत् । अश्वः चातुरीं कृतवान् । सः स्वामिनः परोक्षः भूत्वा नदीजले एकवारं मज्जनम् अकरोत् । तेन किञ्चित् शर्करा जले विलीना, तस्य भारः च न्यूनः सञ्जातः ।

यदा गर्दभः एतद् अपश्यत् तदा सः विचारितवान्—"किम् अहम् अश्वापेक्षया अल्पबुद्धिशाली ?" सोऽपि जले मज्जनम् अकरोत् । परं किं जातम् ! तस्य भारः अधुना अत्यधिकं वृद्धिं गतः यतो हि तस्य पृष्ठे कार्पासः आसीत् तस्मिन् च बहु जलं पूरितम् अभवत् ।

तथा च उक्तम्—"अनुकरणेऽपि बुद्धिः अपेक्षिता ।" किन्तु गर्दभः बुद्धिप्रयोगं न कृतवान्, यतः सः गर्दभः आसीत् ।

विना बुद्धिं न कर्तव्याऽनुकृतिः केनचित् क्वचित् ।
अनुकूलं यदेकस्य प्रतिकूलं परस्य तत् ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मित्रपरीक्षा

आसीद् एकः काकः एका च चटका। उभौ मित्रे आस्ताम्। एकदा तयोः गृहं निर्मातुं मतिः अभवत्। उभौ अपि स्व-स्व-गृहं रचितवन्तौ। काकः मृत्तिकया गृहम् अकरोत् चटका च सिक्थेन।

ग्रीष्मवशात् चटकायाः गृहस्य सिक्थं द्रवीभूतम्। ततः आतपस्य उष्ण-वातस्य च चपेटैः आहता चटका काकस्य गृहं प्राप्ता। तत्र सा तं शरणम् अयाचत। परं निजगौरवेण गर्वितः काकः तां धुत्कृतवान्।

वराकी चटका किङ्कर्तव्यविमूढा अभवत्। कथञ्चित् तया ग्रीष्मदिवसाः अतिवाहिताः। ततः वर्षाः आगताः। सर्वत्र हरितिमा विलसितः। चटका स्वगृहं पुनर् रचितवती। इतः धारासारेषु काकस्य नीडं गलितं पतितं च। किन्तु सिक्थे जलपातेन चटकायाः गृहं दृढतरं सञ्जातम्।

गृहे ध्वस्ते एव काके विपद् आपतिता। शीतेन कम्पमानः आकुञ्चितकायः च सः चटकायाः गृहं प्राप्य ताम् अवदत्—चटके राज्ञि, अद्य मह्यं स्वगृहे आश्रयं देहि। नो चेत् अहं मरिष्यामि···

चटका तस्मिन् दयार्द्रा अभवत्। सा अवोचत्—भ्रातर् वायस, स्वागतं ते, सुस्वागतम्। आगच्छ, अन्तर् आगच्छ। स्वस्थः भव। न कापि चिन्ता कार्या।

एतत् श्रुत्वा काकः अचिन्तयत्—अहो क्षुद्रः अहम्! तस्मिन् दिने अहम् अस्याः साहाय्यं न कृतवान्। इयं तु उदारहृदया स्वगृहे सस्नेहं मे स्वागतं व्याहरति। अहो मे स्वार्थपरायणता विश्वासघातकता च! एवं चिन्तयन् सः अतीव लज्जितः चटकां क्षमाम् अयाचत।

न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद् रिपुः।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा॥

पापान्निवारयति योजयते हिताय
गुह्यानि गूहति गुणान् प्रकटीकरोति।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः॥

(रिपुः—शत्रुः। गूहति—गोपयति। जहाति—त्यजति। सन्तः—साधवः।)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सुखी पुरुषः

कदाचित् कश्चित् राजा रोगेण आक्रान्तः अभवत् । कुशलाः चिकित्सकाः तस्य चिकित्सां कृतवन्तः । परं सः स्वस्थः न सञ्जातः । तदा सः घोषणां कृतवान्—'यः कोऽपि मां नीरोगं करिष्यति तस्मै अहम् अर्धं राज्य दास्यामि ।'

एतत् श्रुत्वा तस्य राज्यस्य सर्वेऽपि पण्डिताः एकत्र मिलिताः । ते नृपस्य स्वास्थ्यलाभाय उपायान् चिन्तयितुम् आरब्धवन्तः ।

कस्यापि कश्चिदपि उपायः न स्फुरितः । ततः तेषु एकः अकथयत्—'राजा नीरोगः भवितुम् अर्हति । तत् कथम् ? श्रूयताम् । यदि सः कस्यचित् सुखिपुरुषस्य चोलकम् अवतार्य स्वयं धारयेत् तर्हि सः स्वस्थः भविष्यति ।'

अथ राजा निजराज्ये सुखिमनुष्यस्य अन्वेषणार्थं राजकुमारेण सह राजपुरुषान् प्रेषितवान् । ते बहूनि दिनानि सम्पूर्णराज्यं परिभ्रान्ताः, किन्तु कमपि पूर्णसुखिनं नरं प्राप्तुं समर्थाः न अभवन् ।

एकदा राजकुमारः कस्यापि कुटीरस्य समीपाद् गच्छति स्म । तत्र सः कमपि एवं वदन्तं श्रुतवान्—'परमकृपा ते दयामय प्रभो, बहुश्रमं कृतवान् अहम् अद्य उदरपूरं भुक्तवान् च । अधुना निद्रासुखम् अनुभविष्यामि । न इच्छामि किमपि अन्यत् । किं मे अन्यैः पदार्थैः ?'

इदम् आकर्ण्य राजकुमारः अतीव हर्षितः । सः राजपुरुषान् आज्ञापयत्—'कुटीरं प्रविश्य अस्य पुरुषस्य चोलकम् आनयत । अयं चोलकस्य यावदपि मूल्यम् इच्छेत् तावद् अस्मै दातव्यम् । परम् अस्य चोलकः नृपस्य पार्श्वे अवश्यमेव आनेतव्यः ।'

ततः राजपुरुषाः अन्तः प्रविष्टाः । ते अपश्यन् यत् तस्य शरीरे चोलकः एव नास्ति । ते तम् अवदन्—'अस्माकं देशस्य राजा रुग्णः । सः त्वादृश-पुरुषस्य चोलकं प्राप्तुम् इच्छति । तस्य धारणेन सः नीरोगः भविष्यति । तदर्थं सः तुभ्यं यथेष्टं धनमपि दास्यति । कृपया अस्मभ्यं निजचोलकं देहि ।'

सः जनः प्रत्यवदत्—'मम पार्श्वे तु चोलकः एव नास्ति !'

ईश्वरे प्रेम यस्यास्ति स सुखी नात्र संशयः ।
ईश्वरो वर्तते तस्मिन् नित्यमेव स्वयं यतः ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ईश्महे शान्तिमानेतुं यदा देहाणुषु ध्रुवाम् ।
स्वास्थ्यं निरामयत्वं च सद्य आसाद्यते तदा ।।

(ईश्महे—शक्नुमः । निरामयत्वम्—नीरोगताम् । आसाद्यते—प्राप्यते ।)

इमौ द्वौ श्लोकौ श्रीमातुः वचनद्वयस्य अनुवादस्वरूपौ ।

चोरिते आम्रे

आसीत् आलोकः नाम कश्चित् बालकः । सः पठने अत्यन्तं निपुणः । परीक्षायां सः सदा प्रथमस्थानं प्राप्नोति स्म । खेलनेऽपि सः अतीव पटुः । किन्तु तस्मिन् एकः अवगुणः आसीत्—असन्तोषः, विशेषतः खाद्यपेयपदार्थेषु ।

एकदा सः, तस्य अनुजौ श्यामविवेकौ च मातुः समीपे उपविष्टाः आसन् । माता चिन्तितवती—अद्य यानि आम्राणि आगतानि तानि त्रिभ्यः पुत्रेभ्यः वितरेयम् इति । सा आलोकम् अकथयत्—"आम्राणि आनय ।"

आलोकः तं कक्षं गतः यत्र आम्राणां करण्डः आसीत् । तत्र तस्य मनसि अयं विचारः उदितः—"माता सर्वेभ्यः समानं दास्यति । कुतो नाहम् एषां मध्यात् द्वे पूर्वम् एव गृह्णीयाम् ?"

यदा आलोकः आम्रकरण्डम् आनयत् तदा माता प्रत्येकपुत्राय चत्वारि अददात् ।

आलोकः मनसि अकरोत्—"इमानि परं खादिष्यामि । पूर्वं चोरिते आम्रे खादितव्ये ।"

तेन तयोः मध्यात् एकम् आम्रं छिन्नम् । तत् पूतिगन्धम् आसीत् । ततः द्वितीयं छिन्नम् । तदपि पूतिकं दृष्टम् । अथ तस्य मनसि महाग्लानिः उत्पन्ना । तेन अवगतं यत् चौर्यात् न कोऽपि लाभः । ततः प्रभृति एव सः चौरकर्म त्यक्तवान् । अतः एवम् उच्यते—

स्वदते न हि चौर्यान्नं रोटिकेव श्रमार्जिता ।
क्षोभयेदेव नश्चित्तं चौर्यं दुःखदपातकम् ।।

तृष्णा माता हि पापस्य लोभश्चास्य पिता मतः ।
सुखार्थी तौ परित्यज्य सन्तोषं सेवतां सदा ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शुद्धहृदयम्

आसीत् कोऽपि ब्राह्मणः। सः अत्यल्पशिक्षितः। प्रतिदिनं स्नानात् परं सः शुद्धमनसा प्रभुं स्मरति गीतापाठं च करोति। गीतायाः शब्दानां शुद्धोच्चारणं सः सम्यक् न जानाति। तथापि प्रभुस्मरणे गीतापाठे च सः आनन्दमग्नः भवति। एकदा प्रख्यातभक्तः गौराङ्गदेवः तम् अपृच्छत्—"बन्धो, प्रभुस्मरणे गीतापाठे च यत् त्वम् एतावदानन्दं प्राप्नोषि तस्य कारणं किम् ?" ब्राह्मणः प्रत्यवदत्—"अहं स्वगुरोः आज्ञानुसारेण प्रतिदिनं श्रीमद्भगवद्गीतायाः पाठं करोमि पाठकाले च मम सम्मुखे, अर्जुनस्य रथे श्रीकृष्णः साक्षाद् विराजमानः इति विभावयामि। तेन मम मनसि अपारः आनन्दः संजायते।" एतत् श्रुत्वा गौराङ्गमहाप्रभुः रोमाञ्चितशरीरः तं वक्षसा आलिङ्ग्य अवदत्—"प्रभोः श्रीकृष्णस्य प्रियगीतायाः सारः त्वया एव यथार्थम् अवबुद्धः। यस्य हृदयं शुद्धं सः शिक्षितः न वेति न गणयति प्रभुः।"

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्माद् विनिःसृता ॥

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥

कृषकस्य अभीष्टः वरः

एकस्मिन् ग्रामे कश्चित् निर्धनकृषकः स्वपत्न्या सह वसति स्म। तस्य सन्तानः न आसीत् माता च अन्धा।

कृषकः शिवस्य महान् भक्तः। ग्रामस्य समीपस्थे घने जङ्गले शिवस्य मन्दिरम् आसीत्। ग्रीष्मः स्यात् शीतं वा, प्रभञ्जनः स्यात् चक्रवातः वा, यत् किमपि स्यात्, सः मन्दिरे नियमपूर्वकं शिवाय जलम् अर्पयति स्म।

एकदा भगवान् शिवः तस्य परमभक्तिं दृष्ट्वा अत्यन्तं प्रसन्नः अभवत्। तत् महाशिवरात्रिदिनम् आसीत्। यदा सः शिवाय जलं ददाति स्म तदा एव भगवान् तस्मै दर्शनम् अददात् अकथयत् च—"अहं त्वयि प्रसन्नः। त्वं कमपि वरं याचितुम् अर्हसि।" कृषकः विचार्य अवदत्—"भगवन्, अहं श्वः वरं याचिष्ये।"

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सायं सः तं सर्वं वृत्तान्तं स्वपत्न्यै निवेद्य अवदत्—"किं याचेय इति विचारयितुम् अहम् असमर्थः। मातुः नेत्रे प्रार्थयेयम्, स्वस्मै सन्तानं वा धनं वा याचेय।"

तस्य पत्नी अतिचतुरा आसीत्। किञ्चित् चिन्तयित्वा सा अकथयत्, "भगवन्तम् इमं वरं याचस्व—मम माता स्वपौत्रं स्वर्णपात्रे रजतचमसेन दुग्धं पिबन्तं पश्यतु इति।"

कृषकः इमम् एव वरं प्रार्थयत्। अचिरेण एव तस्य मातुः नेत्रे स्वस्थे जाते तस्य दरिद्रता च दूरीभूता। अथ एकदा तस्य चन्द्रसदृशः पुत्रः अपि उत्पन्नः। कालेन तस्य माता सत्यमेव स्वपौत्रं स्वर्णपात्रे रौप्यचमसेन दुग्धं पिबन्तम् अपश्यत्। अतः इदम् उच्यते—

प्रीत्या देवाय दातव्यं पत्रं पुष्पं फलं जलम्।
सत्ययाऽनन्यया भक्त्या प्रीयते परमप्रभुः॥

प्रसन्नः किं न भक्ताय प्रयच्छेद् भक्तभावनः।
धनं सौख्यं च सन्तानं शान्तिं मुक्तिं च शाश्वतीम्॥

सिंहचर्मधरः गर्दभः

आसीत् कस्यापि अरबदेशीयस्य एकः पालितः गर्दभः। सः तस्मै पर्याप्तं घासं न ददाति स्म। एकदा गर्दभः क्षुधापीडितः क्वचिद् दूरं पलायितः। तत्र शस्यश्यामलक्षेत्राणि दृष्ट्वा तस्य चित्तं प्रलोभितम्।

तेषु निःशङ्कं घासं चरितुं सः एवम् अचिन्तयत्—"यदि अहं सिंहस्य चर्म धारयामि तर्हि सर्वेऽपि मत्तः भीताः भविष्यन्ति। कश्चिदपि मम समीपं न आगमिष्यति।"

इत्थं विचार्य सः कुतश्चित् सिंहचर्म आनयत् तत् धारयित्वा च प्रतिदिनं सानन्दं घासं सस्यं च अखादत्। कृषकाः भयभीताः तस्य छायासमीपमपि न आगच्छन्ति स्म।

अथ एकदा पूर्णिमायां गर्दभः हर्षोत्फुल्लः उच्चैः आरटत्। तदा "अयं मिथ्यासिंहः" इति प्रकटीभूतम्। क्षेत्रपालाश्च सम्मिल्य तम् अमारयन्। अतः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मिथ्यारूपं न सन्दर्श्यं केनचित् कर्हिचित् क्वचित् ।
यथार्थेऽवगते सद्यो दुर्गतिस्तस्य जायते ॥

छलनार्थं यदन्येषां कृतं छद्मप्रदर्शनम् ।
अचिराद् विवृते तस्मिन् वञ्चिताः स्मो वयं स्वयम् ॥

आयाति चौरः

आसन् चत्वारः नागराः (नगरजनाः) अतीव अलसाः । एकदा ते घोटकम् आरुह्य भ्रमितुं गताः । एकस्मिन् घोटके चत्वारः स्थूलाः उपविष्टाः । वराकः घोटकः तान् कियद् दूरं वहेत् । अचिरं सः क्लान्तोऽभवत् ।

अथ घोटकादवरुह्य ते कस्यचिद् वृक्षस्य अधस्तात् भ्रमणश्रान्तिम् अपानयन् विश्रामसुखं च अन्वभवन् । अश्वः वृक्षे बद्धः ।

अनन्तरं तेषाम् अलसानां स्वभावज्ञः कश्चित् चतुरः चौरः तत्र आगतः । तम् आगच्छन्तम् दृष्ट्वा सुप्तेषु एकः निद्रालस्येन सजृम्भम् पार्श्वं परिवर्तयन् अवदत्—"आयाति चौरः ।" चौरः आगत्य तुरगम् आरोहति । तदा अन्यः गदति—"तुरगाधिरूढः ।" अथ अपरः कथयति—"गृह्णाति चाश्वम् ।" ततः चतुर्थः भणति—"स वरं करोति ।" एवम् आलस्येन ते स्वघोटकं हारयन्ति ।

एतां कथामालसधीश्रितानां
पुरेषु पौरा बहुशो वदन्ति ।
आयाति चौरस्तुरगाधिरूढो
गृह्णाति चाश्वं स वरं करोति ॥

धिग्बलं क्षत्रियबलं ब्रह्मतेजो बलं बलम्

अथ एकदा नृपतिः विश्वामित्रः सैन्यपरिवृतः महर्षिवशिष्ठस्य आश्रमं प्राप्तः । तस्य सत्कारार्थं महर्षिः स्वकामधेनोः प्रभावेण तपोवने वैभवपूर्णं राजभवनम् अरचयत् । तस्मिन् राजभवने सर्वापि भोगसामग्री समुपलब्धा आसीत् । विश्वामित्रः आतिथ्येन अतीव सन्तुष्टः ।

सः वशिष्ठम् अपृच्छत्—कथम् अयं चमत्कारः ?

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वशिष्ठः अवदत्—मम सकाशे कामधेनुः अस्ति। सा मम वाञ्छां पूरयति।

तत् श्रुत्वा विश्वामित्रः अचिन्तयत्—इयं कामधेनुः तु महाराजस्य मम एव योग्या। सः महर्षिं प्रार्थयत्—कामधेनुः मह्यं दीयताम्।

महर्षिः अवदत्—इयं कामधेनुः न मदीया। सा तु देवानाम्। अतोऽहं भवतः अभिलाषं पूरयितुम् असमर्थः। विश्वामित्रः कोपाविष्टः सैन्यबलेन कामधेनुम् अपहर्तुम् उद्यतः अभवत्। तस्य सैनिकाः तां बलाद् आकृष्य नेतुं प्रवृत्ताः।

तदा धेनुः वशिष्ठमुनिम् अपृच्छत्—अपि अहं भवता दत्ता ?

सः अगदत्—न हि। ते बलात्कारेण त्वां नयन्ति।

एतत् श्रुत्वा धेनुः स्वपदाघातेन लक्षशः वीरान् असृजत्। ते च विश्वामित्रस्य सैन्यं पराजयन्त। इत्थं वशिष्ठस्य ब्रह्मतेजसा विश्वामित्रः पराजितः। तेन तस्य हृदये ईर्ष्याग्निः प्रज्वलितः। तद्दिनात् एव सः वशिष्ठस्य समूलोच्छेदनार्थम् अयतत।

तं पराजेतुं सः उग्रतपसा शिवम् आराधयत्। तस्मात् दिव्यास्त्रं प्राप्य सः पुनरपि वशिष्ठम् आक्रामत्, किन्तु तस्य ब्रह्मदण्डस्य सम्मुखे स्थातुं नाशक्नोत्। तेन तस्य कोपज्वाला प्रचण्डतरा अभवत्। सः प्रच्छन्नम् आश्रमम् उपगम्य तस्य शतमपि पुत्रान् अमारयत्। पुत्रवधे सत्यपि वशिष्ठः शान्तः अतिष्ठत्। किन्तु विश्वामित्रस्य रोषाग्निः कथमपि शान्तः न अभवत्।

अथ कदाचित् रात्रौ स्निग्ध-शीतल-ज्योत्स्ना चतुर्दिशं प्रद्योतयति स्म। विश्वामित्रः खड्गहस्तः वशिष्ठस्य प्राणहरणार्थं तदाश्रमं प्राप्तः। तत्र अवसरं प्रतीक्षमाणः सः निगूढं स्थितः।

तदा महर्षिः सुखासीनः स्वभार्यया सह संलपति स्म। सः स्वधर्मपत्नीम् अकथयत्—विश्वामित्रः महातपस्वी। तादृशाः विरलाः।

इमे शब्दाः विश्वामित्रस्य श्रुतिपथं प्राप्ताः। तान् श्रुत्वा एव तस्य प्राणाः झङ्कृताः। सः अचिन्तयत्—अहो यस्य प्राणहरणार्थम् अहम् अत्र आगतः तस्य हृदये मां प्रति ईदृशः सम्मानभावः! पुत्रहन्तारमपि मां सः प्रशंसति!

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अथ सः खड्गं भूमौ निक्षिप्य, तम् उपेत्य, तस्य चरणौ उपस्पृस्य अश्रुभिः अक्षालयत् । वशिष्ठः तु तत्कालम् एव "उत्तिष्ठ ब्रह्मर्षे" इति सम्बोध्य तं सममानयत् । अतः इदम् उच्यते—

तेजसामपि सर्वेषां ब्रह्मतेजो विशिष्यते ।
त्रैलोक्ये नास्ति सा शक्तिर्याऽलं तदतिवर्तितुम् ।।

तपसा केवलेनैव ब्रह्मर्षेर्नाप्यते पदम् ।
परं क्षान्त्या च नत्या च सर्वमङ्गलकाम्यया ।।

आत्मसंयमः

आसीत् हुसैनो नाम ईशदूतस्य मुहम्मदस्य पौत्त्रः । मनोरमं तस्य भवनं परिपूर्णश्च वित्तकोषः । कोऽपि तस्मै अपराधं करोति चेत् अपराध्यति सः धनिकाय एव । उग्रः खलु धनिक-क्रोधः ।

अथैकदा कश्चिद् दासः उष्णजलहस्तः भुञ्जानस्य हुसैनस्य पार्श्वतः अगच्छत् । दुर्भाग्यवशात् किञ्चित् जलम् ईशदूत-मुहम्मदस्य पौत्त्रस्य उपरि अपतत् । क्रोधेन अगर्जत् सः ।

प्रत्युत्पन्नमतिः दासः सहसा भूमिगतजानुः 'कुरान्'ग्रन्थस्य अवसरोचितं सूक्तमेकम् अगायत्—

"स्वर्गस्तेभ्यो यैर्जितः क्रोधवेगः ।"

तद्वचनप्रभावितः हुसैनः तत्कालमेव अवदत् "नाहं कुपितः" इति ।

"तेषाञ्चार्थे ये क्षमन्ते मनुष्यान्", दासोऽभाषत ।

"क्षमेऽहं त्वाम्", हुसैनः न्यगदत् ।

"यस्मादल्लाः स्नेहसिक्तो दयार्द्रे" इत्यनेन दासः स्वोक्तेः पूर्तिमकरोत् ।

एतावति संलापे एव हुसैनस्य रोषो निःशेषं शान्तोऽभवत् । प्रशान्तरोषः, स्वस्थचेताः सः दासम् उत्थाप्य अवदत्—

"मुक्तस्त्वमितः प्रभृति । गृहाणेदं शतचतुष्टयं रजतमुद्राणाम् ।"

स एष पन्थाः येन हुसैनः समुदारामपि सुलभकोपाम् आत्मनः मनोवृत्तिं

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नियन्तुम् अशिक्षत। अभिजाता हि तस्य वृत्तिः नैव कुत्सिता न वा क्रूरा आसीत्। अत एव च सा वश्या अभवत्।

*

उत्तरफ्रांसदेशस्थे कस्मिंश्चित् नगरे कोऽपि बालकः वसति स्म। सः मम परिचितः। तस्य स्वभावः निष्कपटः किन्तु सः अति क्रोधनः। क्षणेन सः कोपस्य चरमां काष्ठाम् अधिरोहति स्म।

एकदाहं तम् अपृच्छम्, "वद भोः, त्वादृशाय हृष्टपुष्टाय बालकाय किं दुष्करतरम्—अपमानकारिबन्धोः वदने तत्क्षणं मुष्टिघातः अथवा स्वगोहे मुष्टिनिवेशः ?"

"स्वगोहे मुष्टिनिवेशः।"

"साधु, वद तावत् त्वादृशस्य वीरबालकस्य किं कर्तुम् उचिततरम्—"सुकरं वा दुष्करं वा ?"

क्षणम् अनुत्तरयन् प्रत्यवदत् सः—"दुष्करम्।"

"साधु वत्स, प्राप्ते अवसरे एतदर्थं यतस्व।"

व्यतीतेषु कतिपयदिनेषु तरुणः सः यथार्थगर्वेण माम् उपेत्य अवदत्—"तद् दुष्करं कर्म खलु आचरितं मया" इति।

"तथा हि, दुःशीलताकुख्यातः कोऽपि मम सहाध्यायी कोपाविष्टः माम् अताडयत्। अक्षमाशीलः, दृढबाहुरहम् इति जानन् सः स्वरक्षायै सन्नद्धः अभवत्। तदैव भवत्याः उपदेशः मम स्मृतिपथमागतः। यथा मया चिन्तितम् आसीत् तदपेक्षया तस्य उपदेशस्य आचरण दुष्करतरं प्रत्यभात् मम। तथाप्यहम् अन्वभवं यत् मम क्रोधः कुत्रापि पलायितः इति। तस्मिन् बालके मम दया अभवत्। तदनु हस्तमेलाय स्वहस्तं तं प्रति प्रासारयम्। तेन सः तथा आश्चर्यचकितः अभवत् यथा क्षणमेकम् उद्घाटितवदनः निर्वाक् च माम् अवलोकयन् एव अतिष्ठत्। ततः सः बलेन मम करम् अगृह्णात् सुष्ठु च न्यपीडयत्। गभीरभावावेशेन सोऽवदत्—'अधुना मां प्रति यथेच्छसि तथा कुरु, चिरकालाय तवाहं सुहृद् अस्मि'।"

(अस्याः कथायाः आरभ्य 'यथार्थनिर्णयः' इति कथां यावत् सर्वाः कथाः श्रीमातुः "Tales From All Times" इति पुस्तकात् अनूदिताः।)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

धैर्यम् अध्यवसायश्च

मलाबार-(केरल)-मुकुटमणिः विख्यात-महापुरुषः शङ्करः प्रायः द्वादशशतवर्षपूर्वम् इहलीलारतः आसीत् । सः बाल्यादेव सन्न्यासी भवितुं सङ्कल्पितवान् । तस्य माता तदभिलाषस्य महत्त्वं प्रशंसन्ती अपि सुदीर्घकालं सन्न्यासमय-जीवनयापनाय नान्वमन्यत ।

एकदा सा ससुता स्नातुं नदीम् अगच्छत् । तत्र मज्जन्नेव शङ्करः कुम्भीराकृष्टपादः अभवत् । मृत्युः समासन्नः । तथापि विषमेऽस्मिन् मुहूर्ते वीरबालः सः स्वोदात्तलक्ष्यम् अविस्मरन् मातरम् आक्रोशत्—मातः, गतोऽयं सुतः । कुम्भीरः पादम् आकर्षति । कृपया अन्ततः अनुमन्यस्व येनाहं सन्न्यासी सन् म्रियेय इति ।

—"आम्, आम् वत्स, तथास्तु, तथैवास्तु" इति व्यथितहृदया माता व्यलपत् ।

अहो भाग्यं शङ्करस्य यत् सोऽनेन वचनेन तथा आनन्दितः ऊर्जितश्च अभवत् यथा ग्राहात् पादं प्रसभं प्रमोच्य सकूर्दम् उत्तीरं प्राप्तः ।

ततः परं वयसा सार्धं ज्ञानेऽपि सोऽवर्धत । अथ गुरुः भूत्वा सः स्वलोकोत्तरजीवितस्य अन्तिममुहूर्तं यावत् वेदान्तविद्याविस्तारमहाव्रतं प्रति एकनिष्ठः अतिष्ठत् ।

सत्साहसम्

अथैकदा 'अलमोडा'नृपतेः पर्वतीयप्रदेशः शत्रुभिः आक्रान्तोऽभवत् । आक्रमणकारिणः बहिष्कर्तुं नृपतिः केषाञ्चित् नराणां नूतनं सैन्यदलम् अरचयत् प्रत्येकं सैनिकाय च सुतीक्ष्णं खड्गम् अददात् ।

अथ "अग्रे सरत" इति आदिशत् सः ।

तत्क्षणमेव सर्वेऽपि सैनिकाः स्वकोषेभ्यः तरवारीन् साटोपं निष्कास्य प्रचण्डम् आक्रोशन्तः तान् अचालयन् ।

—"किम् एतत् सर्वम् ?" इति राजा अपृच्छत् ।

—"राजन्, सज्जीभवामः येन शत्रवः सुसज्जान् अस्मान् प्रत्याक्रमितुं नोत्सहेरन् ।"

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

—"त्रस्ताः, कातराः, अपदार्थाः ! न मे युष्माभिः प्रयोजनम्, गच्छत गृहम्" इति राजा आक्रोशत् ।

युष्माभिः दृष्टं यत् तादृशः कोलाहलः खड्गानां खणत्कारश्च नृपतये नारोचत । तस्य सम्यक् ज्ञातम् आसीत् यद् यथार्थं वीरत्वम् एताभ्यां न प्रकाश्यते इति ।

दूरदर्शी वणिक्

आस्तां कौचिद् वृद्ध-गृध्रौ अतिदुःस्थौ असहायौ च । वाराणसेयः कश्चिद् वणिक् करुणाविगलितः तौ अनुगृहीतवान् । स तौ किमपि शुष्कस्थानं नीत्वा, तत्राग्निं प्रज्वलय्य, पशूनां चिताग्नितः मांसखण्डान् च आनीय तौ अभोजयत् ।

वर्षर्तौ सम्प्राप्ते तौ पर्वताभिमुखम् उड्डीनौ । तदा तौ बलवन्तौ सुस्थौ चास्ताम् । किन्तु वणिजं प्रति कृतज्ञतावशात् निजोपकारिबन्धवे तस्मै प्रदानार्थं यत्र कुत्रापि प्राप्याणां सर्वेषां वस्त्राणां संग्रहणं तौ निश्चितवन्तौ । गृहाद् गृहम्, ग्रामाद् ग्रामं प्रति उड्डीय उन्मुक्तस्थाने शुष्यन्ति वस्त्राणि हृत्वा तौ वणिजः निवासं प्रापयताम् ।

वणिग् गृध्रद्वयस्य सदभिप्रायं प्रशस्तवान्, किन्तु चोरितवस्त्राणि नैव व्यवहृतवान् न च विक्रीतवान् । स केवलं तानि संगृह्य यत्नेन पृथग् अस्थापयत् ।

अत्रान्तरे तौ धर्तुं पाशाः योजिताः तयोरेकतरश्च तत्रैव धृतः । अथ राज्ञः सम्मुखे उपस्थापितः स तेन पृष्टः—

—"कुतस्त्वं मम राज्ये चौर्यम् आचरसि ?" पक्षी प्रत्यवदत्—"कश्चिद् वणिक् मदीयं मन्मातुश्च जीवनं रक्षितवान् । तदृण-परिशोधनार्थम् आवां वस्त्राणि तदर्थं संगृहीतवन्तौ ।

अथ वणिगपि पृच्छार्थं राजगृहं समाहूतः ।

सोऽवदत्—"धर्मावतार, गृध्रौ वस्तुतः मत्सकाशं बहूनि वस्त्राणि आनीतवन्तौ, किन्तु एकस्मिन् स्थाने तानि सर्वाणि मया पृथक् स्थापितानि, वस्त्रस्वामिभ्यः प्रतिदातुं च सज्जोऽयं किङ्करः ।"

कृतज्ञतावशात् किन्तु अविवेकितया कृतकर्माणौ गृध्रौ राजा अक्षाम्यत्, वणिक् च विमृश्यकारिताहेतोः दण्डभयात् विमुक्तः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

यथार्थनिर्णयः

कामपि ऋजुतमां यष्टिं गृहाण तदर्धं च जले निमज्जय। तस्याः मध्यभागः वक्रः इति तव प्रतीतिः भवेत्। नूनम् एषा भ्रान्तिः। अनया भ्रान्त्या यष्टिः वक्रा इति त्वं निर्णयं कुर्याः चेत् सः अयथार्थः इति मन्तव्यं यतो हि जलात् निष्कासितमात्रा सा पूर्ववत् ऋजुरेव प्रतिभास्यति।

एतद्विपरीतम्, अन्यामेकां मध्यभागेन वस्तुतः वक्रां यष्टिं गृहाण। यदि तां कोणविशेषेण कुशलतया जले निमज्जयेः सा सर्वथा ऋजुः भास्यति।

प्रायः मानवाः यष्टिभिः तुलनाम् अर्हन्ति। तथा हि—यथार्थदृष्टेः अभावेन केचन सत्प्रकृतयोऽपि तथा न प्रतीयन्ते। अपरे पुनः समये समये तथा मिथ्यारूपम् अभिनयन्ति यथा अन्तर्दम्भिनोऽपि ऋजुप्रकृतयः विभासन्ते। तस्माद् आपातप्रतीयमानमेव रूपं न प्रत्येतव्यं परिहर्तव्यश्च कस्यापि विषये निर्विवेकं स्वमतनिर्धारणम्।

एकदा भारतवर्षे कश्चित् साधुः भिक्षासङ्ग्रहार्थं कमपि ग्रामं गच्छति स्म। कस्मिंश्चित् गोचरे भ्रमतः तस्य दृष्टिपथम् आगतः कोऽपि मेषः। विचित्रवेशं साधुं दृष्ट्वा भृशं कुपितः सः मस्तकम् अवनमयन् प्रचण्डाघाताय कतिचित्पदानि पश्चात् अपासरत्।

—"अहो साधुप्रकृतिः शिष्टबुद्धिश्च अयं प्राणी! पुण्यनिधिं मां दृष्ट्वैव गुणज्ञोऽयम् अभिवादनाय स्वमस्तकम् अवनमयति" इति साधुः साभिमानं व्यचारयत्।

तस्मिन्नेव क्षणे तं प्रचण्डम् अभ्यसरत् मेषः। एकेनैव मेषमुण्डाघातेन साधुः भूमौ व्यलुठत्।

अपात्रेषु उच्चमतपोषणं प्रगाढविश्वासश्च दुर्गतिकारणमिति स्पष्टमेव एतेन। यतो हि सन्ति खलु केचन ये नूनं 'ला फोन्तेन'-महोदय-कथोपवर्णितं वृकम् अनुकुर्वन्ति यं हि मेषाः मेषपालवेषं दृष्ट्वा 'अयं नः मेषपालः' इति प्रमादम् अकुर्वन्, अथवा सन्ति ईदृशोऽपि जनाः ये खलु तद्गर्दभोपमाः यः सिंहचर्मावृतः भयङ्करः दृश्यते स्म।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पार्वती शङ्करं पराजयते

पार्वती अभ्यन्तरे अस्ति। शङ्करः द्वारे खट्खटायते।

पार्वती—कः कपाटे खट्खटायते ?

शङ्करः—अहमस्मि प्रिये।

पार्वती—कस्त्वम् ?

शङ्करः—अहं शूली।

पार्वती—किं तव शूलरोगः वर्तते ? तस्य उपचारः अत्र न भवति, वैद्यम् अन्वेषय।

शङ्करः—प्रिये, अहं नीलकण्ठः।

पार्वती—किं त्वं नीलकण्ठः मयूरः ? तदा एकां केकां कुरु।

शङ्करः—प्रेयसि, अहं पशुपतिः।

पार्वती—यदि त्वं पशुपतिः तर्हि त्वयि विषाणे (शृङ्गे) कथं न पश्यामि ?

शङ्करः—नाहं वृषभः। अहं स्थाणुः।

पार्वती—स्थाणुः (तरुः) तु न वदति। त्वं कथं वदसि ?

शङ्करः—हे प्रिये, अहं शिवायाः प्राणेश्वरः।

पार्वती—आः ! त्वं शृगाल्याः पतिः। अरण्यं गच्छ।

एवं पार्वती वाक्चातुर्येण शङ्करं पराजयत।

कस्त्वं शूली मृगय भिषजं नीलकण्ठः प्रियेऽहं
केकामेकां कुरु पशुपतिर्नैव दृश्ये विषाणे।
स्थाणुर्मुग्धे न वदति तरुर्जीवितेशः शिवाया
गच्छाटव्यामिति हतवचाः पातु वश्चन्द्रचूडः॥

शूली, नीलकण्ठः, पशुपतिः, स्थाणुः, शिवायाः जीवितेशः (पार्वतीपतिः) इति एतानि शिवस्य (चन्द्रचूडस्य) नामधेयानि। किन्तु पार्वती एतेषां शब्दानाम् अर्थम् एवं करोति—शूली—शूलरोगी; नीलकण्ठः—मयूरः; पशुपतिः—वृषभः; स्थाणुः—तरुः, स्तम्भः; शिवायाः जीवितेशः—शृगालीपतिः, शृगालः इति।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भिषजम्—वैद्यम्, चिकित्सकम्, द्राक्तरम् । केका—मयूरस्य ध्वनिः । विषाणम्—शृङ्गम् । मृगय—अन्वेषय । हतवचाः—निरुत्तरः । अटव्याम्—अरण्ये । पातु—रक्षतु । वः—युष्मान् । चन्द्रचूडः—चन्द्रः चूडायां यस्य सः, शिवः । शूलम् अस्य अस्ति इति शूली, त्रिशूलधारी । मुग्धे—प्रिये ।

यदन्तरं तद्बाह्यम्...

शुभे संस्कृतदिवसेऽस्मिन् संस्कृते भाषणाय अवसरं लब्ध्वा आत्मानं धन्यं मन्ये । अद्याहं भवतां पुरतः संस्कृतस्य महिमगानं वैशिष्ट्यप्रतिपादनं वा कर्तुं न इच्छामि । एतद्विषये भवन्तः मत्तः अधिकं जानन्ति । किन्तु संस्कृतस्य किं तत्त्वं मह्यम् अधिकं रोचते इत्येवाहं भवतां समक्षम् उपस्थापयितुकामः । न तत् केवलं मह्यम् अधिकं रोचते अपि तु येऽपि आश्रमजीवनं साधकजीवनं वा कामयन्ते तेभ्यः इदं नितरां रोचेत । तद् महनीयं तत्त्वम् अस्ति ऋजुता, सरलता । अन्यभाषासु इयं तथा न सुलभा यथा संस्कृते । एकस्याः कथायाः माध्यमेन इदम् अधिकं स्पष्टीभविष्यति ।

उत्तरप्रदेशे आस्तां द्वौ मुस्लिमभ्रातरौ व्यापारिणौ । अल्पशिक्षितौ तौ कार्पासव्यापारम् अकुरुताम् । तयोः वृद्धः पिता आसीत् । एकदा कनीयान् भ्राता बन्धुगृहं गतः । तत्परदिने हठात् केनापि कारणेन पितापि अजमेरनगरं प्रयातः । एतत् कनीयान् भ्राता न अजानात् । ज्येष्ठभ्रातापि व्यापारार्थं बहिर् गन्तव्यम् आसीत् । स कनिष्ठभ्रातरं प्रति इदं पत्रम् अलिखत्—

पिताजी अजमेर गये हैं । (पिता अजमेरं गतः ।)

हमने रुई ले ली है । (मया कार्पासं गृहीतम् ।)

तुम भी रुई ले लो । (त्वमपि कार्पासं गृहाण ।)

अत्र मया सूचनीयं यत् उर्दूभाषायां द्रुतलेखनसमये सामान्यतः मात्राः त्यज्यन्ते । तस्मात् अल्पज्ञः, मूढमतिः कनीयान् भ्राता पत्रं वाचयित्वा इत्थम् अबोधत्—

पिताजी आज मर गये हैं । (पिताद्य दिवं गतः ।)

हमने रो लिया है । (मया क्रन्दितम् ।)

तुम भी रो लो । (त्वमपि क्रन्द ।)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

संस्कृते इत्थं कदापि न भवति । संस्कृते वयं यत् किमपि लिखामः तदेव पठामः, यत् किमपि वदामः तदेव लिखामः । अयं गुणश्च विश्वभाषाणां मध्ये केवलं संस्कृते एव अस्ति, न कस्यामपि अन्यस्यां भाषायाम् । मनसि अन्यत्, वचसि अन्यत्, कर्मणि अन्यत् संस्कृते न भवति ।

अतः अथर्ववेदे प्रतिपादितम्—"यदन्तरं तद्बाह्यं यद्बाह्यं तदन्तरम् ।" इदं न केवलं वर्णनमात्रम् अपि तु ऋषीणाम् आचरणगतम् आसीत् । सर्वेषाम् अध्यात्म-साधकानामपि बाह्यान्तरयोः सामञ्जस्य-साधनम् अपरिहार्यम् । श्रीमातृकथनानुसारेण, तथा सत्येव पूर्णयोगस्य पूर्णता चरितार्थता वा जायते । ईदृशस्थितिप्राप्तौ संस्कृतं, मन्ये, सर्वाधिकं सहायतां कर्तुं शक्नुयात् ।

पुनर्दर्शनाय !

पत्रम्

सम्माननीयाः पाठकमहोदयाः,

सादरं नमो नमः ।

काचिद् आङ्ग्लमहिला गतसप्ताहेऽत्र आगतासीत् । तया सह कापि भारतीयमहिलापि अवर्तत । भारतीयमहिलाधुना स्वजन्मभूमौ कमपि विद्यालयं प्रतिष्ठाप्य श्रीमातुः श्रीअरविन्दस्य च शिक्षापद्धत्यनुसारेण शिक्षाकर्मणि निरता । सा अत्रत्यां विशिष्टां शिक्षापद्धतिं साक्षाद् द्रष्टुम् आगतासीत् । सा एव एनां विदेशिनीम् अस्मान् पर्यचाययत् । इयं देहल्यां कस्मिंश्चिद् विद्यालये शिक्षिका वर्तते । भारतसेवामपि अन्यस्थानेषु इयं बहुधा कृतवती ।

अथ भारते कोऽपि संस्कृतभाषिपरिवारः अस्ति इति आकर्ण्य एकदा सा तं द्रष्टुं व्याकुला इव अभवत् । अत्र तत्र सा अस्य नामसङ्केतं ज्ञातुम् अयतत । भारते तु एतादृक्परिवाराः एकाधिकाः सन्ति । को वा तस्यै तदभीष्टपरिवारस्य सङ्केतं दद्यात् ?

अनन्तरं सा मुम्बापुरीस्थं संस्कृतमाध्यमविद्यालयं प्रेषिता । ततः सा नामधामानि संगृह्य कपिलदेव-शास्त्रिमहाभागस्य परिवारं द्रष्टुं विहारप्रदेशस्थम् 'आरा'मण्डलम् अगच्छत् । तदानीं कपिलदेव-शास्त्रिमहाभागाः तत्र नासन् । तेषां पुत्रवरम् आ जन्मनः संस्कृतश्रोतारं श्रीमदाशुतोषशास्त्रिणं दृष्ट्वा दिनद्वयं च उषित्वा सा देहलीं प्रत्यागता ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

गतसप्ताहे सा आश्रमम् आगतासीत्। अत्रत्यान् संस्कृतभाषिजनान् दृष्ट्वा सा भृशं प्रसन्ना अभवत्। तस्याः समक्षं भारतीयमहिलायाः मुखात् तद्विषये सर्वं श्रुत्वा अस्माभिः सा पृष्टा—कुतः भवत्याः संस्कृते एतावाननुरागः ? सावदत्—'संस्कृतं देवानां भाषा, आत्मनः भाषा। अनया भाषया भारतम् एकत्वं लप्स्यते। अतः इमां भाषाम् अभ्यसितुकामाहम् ।' भारतप्रेमिण्यां तस्याम् अस्माभिः एतदपि लक्षितं यत् सा संस्कृते भाषितुं भृशं चेष्टते। संस्कृतभाषिजनैः समागतायाः तस्याः भावाः प्रवृत्तयश्च लक्षणीयाः खलु। अहो तस्याः संस्कृतानुरागः ! संस्कृतं भारतस्य एकत्वसाधने हेतुभूतम् इति विदेशिनी सत्यपि सा स्पष्टं बोधति संस्कृते भाषितुं च प्रबलं चेष्टते। धन्या तस्याः संस्कृतप्रीतिः। अधुना सा कपिलदेवशास्त्रिमहोदयं साक्षात्कर्तुम् हृषीकेशं गता। तर्हि भारतीयेषु अस्मासु संस्कृताय कदा इयं सचेतनता, उन्मुखता, उत्साहः प्रवृत्तिश्च भविष्यन्ति ? किं नु भारतीयत्वम् इतर-देशीयेभ्यः अस्माभिः शिक्षणीयम् ? इयं मूढता न जातु भवेत् इति परमेश्वरं प्रार्थयामो वयम् इति शम्। (१५. ६. ८२)

अभयं खलु संस्कृतम्

(आश्रमविद्यालये उच्चचर्या-समापनपरस्य कस्यचित् छात्रस्य भाषणम्)

न खलु संस्कृतभाषा भयङ्करी। पाठनशैली एव शुभङ्करीमपि इमां भयङ्करीं करोति। बाल्यकाले अहमपि संस्कृतस्य भयङ्करं रूपमपश्यम्। तेनैव अद्य इममनुभवं युष्मभ्यं निवेदयितुमिच्छामि। तस्मिन् समये अहं संस्कृतं नैव अरोचये। एषः विषयः मदर्थम् आसीत् अतीव अरतिकरः। वर्षत्रयैः परम् अध्यापकपरिवर्तनेन सः एव विषयः अभवत् परमप्रियः। तस्मात् अहमनुभवामि यत् विषयस्य रोचकता अध्यापकाधीना। अध्यापकः रुचिकरम् अरुचिकरम् अरुचिकरं च रुचिकरं कर्तुं शक्नोति। कमपि बाल्यानुभवं श्रावयामि।

बालवयसि यदा शिक्षकः विभक्ति-रटनार्थम् अकथयत् तदा मनसि प्रश्नः उत्पन्नः, "कुतः रटनीयम् ? एतत् सर्वं शुष्कम्, अरतिकरम्। रटित्वा वा कः लाभः ?" शिक्षकः उचितम् उत्तरं न दत्त्वा अकथयत्—'राम', 'लता', 'मुनि', 'मति' इत्यादिशब्दानां रूपाणि रट, भविष्ये प्रयोगं ज्ञास्यसि। मम बालमनसि प्रश्नस्य समाधानं न अभवत्। किञ्च क्रमशः अस्यां भाषायां रुचिः अपि

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

गता। केवलं जीवशास्त्रम्, आङ्ग्लीं विज्ञानं च अरोचये। वर्षेभ्यः परं नूतना शिक्षिका प्राप्ता।

सा मम विषयाभिरुचिं ज्ञात्वा अकथयत्, "त्वं विज्ञानं रोचयसे? संस्कृतमपि विज्ञानमेव। कस्यापि विषयस्य विशेषं ज्ञानम् एव विज्ञानम्। एषा भाषापि विज्ञानमयी। कालक्रमेण त्वम् एतत् ज्ञास्यसि। त्वं तु जीवशास्त्रं रोचयसे, भाषा अपि सजीवा एव।" एतत् श्रुत्वा सकुतूहलम् अपृच्छम्, "तत् कथम्, भाषा तु न चलति? तस्याः जीवनं कुत्र?" तदा सा अकथयत्, "भाष्यते इति भाषा। भाषा मनुष्यैः सह वर्धते, परिवर्तते, सा गतिशीला देशात् देशं गच्छति मानवभावानां विनिमयं च कारयति। तथात्वेऽपि तां निर्जीवां चिन्तयसि?" वालमनः अन्वभवत्—'अस्ति अत्र किमपि ज्ञातव्यम्।' क्रमशः खेलेन विभक्तिरूपाणि शिक्षयन्ती सा अकथयत्, "स्वर्णं धातुविशेषः, नैव? तेन वहुविधाः अलङ्काराः रच्यन्ते। स्वर्णस्य रूपं च परिवर्तते। यथा स्वर्णस्य वहुविधानि रूपाणि भवन्ति तथैव एकस्य एव शव्दस्य वहूनि रूपाणि भवन्ति। वयं यदा किमपि वदामः तदा इदं सूच्यते यत् कोऽपि किमपि करोति। कः किं करोति? केन करोति? कस्मै करोति? इति प्रश्नानाम् उत्तराणि यदा दातुं ज्ञातुं वा इच्छामः तदा किं कुर्मः? यथा विभिन्न-अलङ्काराणां विविधाः प्रयोगाः तथैव शव्दरूपाणामपि। यदि त्वं शव्दानां रूपाणि न जानीयाः तर्हि भावान् कथं प्रकाशयेः?" अहमेतत् वुद्ध्वा रूपाणि रटितुं यदा सज्जः तदा सा अकथयत्, "कुतः रटसि? सावधानतया पश्य कुत्र किमस्ति इति। रूपेषु सादृश्यं भिन्नतां वा पश्य। क्रमशः स्वतः एव सर्वं स्मरिष्यसि। परं पश्यामः अग्रे किं कर्तव्यम् इति।" एवं खेलतः मम कदा विभक्ति-शिक्षणम् आरव्धं कदा च धातुषु प्रवेशः अभवत्, न जाने।

वस्तुतः स एव विषयः ममार्थे सर्वथा नूतनः, सरसः सरलः च अभवत्। संस्कृत-भाषायाः गाम्भीर्यम्, संस्कृतिः दर्शनं च मम प्राणान् अपोषयन्। कः कथं किं पाठयति तत्रैव सर्वम् आश्रितम्। अहमद्य सत्यमेव श्रीमातृचरणयोः कृतज्ञः यत् तस्याः कृपया अहमेतादृशम् अवसरं प्राप्नवम्। या शिक्षिका मह्यं संस्कृतस्य नूतनं स्वरूपमदर्शयत् तां प्रति अहं कृतज्ञतां निवेदयामि। अहं मातृभाषावत् इमां भाषाम् अपठम्। प्रथमं तावत् भाषायां प्रवेशः ततश्च व्याकरणपाठः।

अतीतं विचारयन् चिन्तयामि विद्यालये मादृशाः न जाने कति संस्कृतानु-

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

रागिणः सन्ति । यदि ते अपि सु-अवसरं प्राप्स्यन् तदा मत्तः उत्कृष्टतराः अभविष्यन् ।

शुष्कम्, कृत्रिमम्, नीरसम्, यान्त्रिकं रूपरटनं न संस्कृतस्य विकासाय । श्रीमाता कथयति, "संस्कृतं भारतस्य सर्वाः भाषाः प्रति द्वारम् उद्घाटयति ।" पृथिव्याः प्रायः सर्वभाषासु संस्कृतस्य अवदानं दृश्यते । संस्कृतं तत्साहित्यं वा अस्मभ्यं किं ददाति ?

श्रीअरविन्दस्य ग्रन्थानां पाठे परमसहायिका एषा भाषा ।

संस्कृतसाहित्यं सर्वाङ्गीणम् ।

अध्यात्मदृष्ट्या अस्य विशेषगौरवं वर्तते ।

साहित्यं समाजस्य दर्पणः । तत्र समाजस्य देशस्य च प्रतिबिम्बं पतति । साहित्यं संस्कृतेः प्रधानवाहनम् । संस्कृतेः आत्मा साहित्येन प्रकाश्यते । संस्कृत-साहित्यम् अध्यात्मभावैः अनुप्राणितम् ओतप्रोतं च । साहित्यमाध्यमेन देशस्य सभ्यता संस्कृतिः च ज्ञातुं शक्येते ।

भारतीयसंस्कृतेः प्रचारः न अस्त्रैः अपि तु लेखन्या । आदिकविः वाल्मीकिः, महर्षिः व्यासः, महाकविः कालिदासः, भवभूतिः इत्यादयः भारतीय-संस्कृतेः शुद्धरूपस्य अध्यात्मभावानां च चित्रणेन पाठकस्य हृदयकलिकां विकासयन्ति । आदिमहाकाव्यं वाल्मीकिरामायणम् आदर्शचरित्राणां ज्वलद् उदाहरणम् । तपः, त्यागः अस्माकं संस्कृतेः आधारभूते । अस्याः भाषायाः संस्कृता वाणी मन्त्रमूला । अध्यात्मभावैः सृष्टा, स्पन्दिता, छन्दिता, परिवर्धिता जीविता च अस्याः संस्कृतिः अध्यात्मप्रधाने भारतदेशे तपोवनानां पवित्रवातावरणे परिपालिता ।

संस्कृतकाव्यं जीवनस्य विषमपरिस्थितिषु अपि आनन्दम् उद्भावयति । भगवान् आनन्दमयः । एषा सृष्टिः अपि आनन्दात् उद्भूता, आनन्देन जीवति, आनन्दे एव लीयते । आनन्दः एव परमः रसः । काव्यस्य आत्मा रसः रसः च काव्यस्य लक्ष्यम् । 'रसो वै सः' परमभगवान् ।

अन्यच्च, अस्यां भाषायां शब्दानां व्युत्पत्तिः एव अद्भुतं विज्ञानं यत् अन्यभाषासु सुदुर्लभम् । तद् विज्ञानं च संस्कृतस्य अगाधगाम्भीर्यं प्रकाशयति अन्यभाषाणाम् अध्ययने च परमसहायकम् । संस्कृतभाषायाः उच्चारणे अपि अस्ति कापि मन्त्रशक्तिः या सम्पूर्णसत्तां पवित्रीकरोति ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

संस्कृतभाषायाः, भारतीयसंस्कृतेः भारतस्य च प्राणाः आध्यात्मिकभावाः। तस्मात् संस्कृतम्, भारतीयसंस्कृतिः भारतं च अभिन्नानि । अतः भारतस्य, भारतीयसंस्कृतेः, भारतीयत्वस्य आत्मज्ञानस्य च बोधार्थं संस्कृतज्ञानम् अत्यावश्यकम् ।

श्रीमाता संस्कृतविषये कथयति—

I have the *deepest respect* for Indian languages and continue to study Sanskrit when I have time.

(The Mother, Vol. 12, p. 224)

गभीरसम्मानशीलाहं भारतीयभाषाः प्रति निरता च संस्कृतशिक्षणे अवकाशकाले ।

*

...It is better to learn Sanskrit and try to make it a most living language.

Blessings.

...वरं खलु संस्कृतभाषायाः शिक्षणं तां जीवज्जाग्रद्भाषां कर्तुं प्रयत्नश्च ।

मम आशिषः ।

मान्या भारतवासिनः श्रृणुत हे

मान्या भारतवासिनः श्रृणुत हे मातुर्वचः पावनं
भाषेयं खलु संस्कृता भवतु नो राष्ट्रस्य मूर्ध्नि स्थिता ।
प्राचीने समये तु पाणिनियुगे सर्वैर्जनैर्भाषिता
सा भाषा परमाधुना लसतु नो वाण्यां सदा क्षेमदा ।।

सर्वेषां हितकृन्न भारतजुषां हिन्दी भवेत् कर्हिचित्
तस्याः स्थानमलङ्करोतु सुरगीः सर्वत्र देशेऽधुना ।
नव्यं यौवनशालि संस्कृतमिह ध्येयं तु नो भाषितं
सावोचत् स्थितधीर्वचो महदिदं माता परा देवता ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पाण्डित्यरहितं जीवज्जाग्रद्भाषास्तु संस्कृतम् ।
सरलं नवतापन्नं स्यान्न तत् सरलीकृतम् ॥

भाषिता भारते सर्वैः स्यादियं सुरभारती ।
सर्वैरिष्टं न पाण्डित्यं ज्ञातव्यं मातृसंस्कृतम् ॥

जन्मभाषां विना सर्वा भाषाः स्युः कठिनाः किल ।
शिक्षणे भाषणे तासु संस्कृतं सरलं ध्रुवम् ॥

पश्यत चाश्रमे यूयं शिक्ष्यन्ते बालका यथा ।
तथैव भवताद् देशे दृष्टान्तो वर्तते पुरः ॥

श्रीमातुश्चेतनां दिव्यामतिमानसिकीं पराम् ।
विन्दन्तोऽत्र वयं स्याम सुयोग्याश्छिन्नसंशयाः ॥

जयतु हृदयदेशे दीप्तिमन्मातृमूर्तिर्
जयतु निखिलविश्वे मानसोत्तीर्णशक्तिः ।
जयतु सकलभाषापोषिका सादिभाषा
जयतु भरतभूमौ संस्कृतं राष्ट्रभाषा ॥

कतिचिद् उपयोगिपुस्तकानि

सन्ति संस्कृते बहूनि पुस्तकानि बहवश्च ग्रन्थाः । तेषु प्रत्येकं नूनम् अस्ति किमपि वैशिष्ट्यम् । अत्र आरम्भकाणां सुविधार्थं केषाञ्चित् पुस्तकानां नामानि अधस्तात् दीयन्ते । तेषु एकः संस्कृतकोषः अवश्यं क्रेतव्यः । सरलसंस्कृतसरणिं पठित्वा कोषसाहाय्येन शिक्षकं विनापि अन्यानि संस्कृतपुस्तकानि सम्यग् बोद्धुं शक्ष्यन्ते ।

निम्नोक्त-पुस्तकानि व्यक्तिशः क्रेतुम् अशक्यानि चेत् सामूहिकरूपेण पुस्तकालय-माध्यमेन वा क्रेतव्यानि ।

१. The Student's Sanskrit-English Dictionary (Rs. 30/-) अथवा संस्कृत-हिन्दी कोश (Rs. 30/-) By Vaman Shivram Apte. Published by Motilal Banarsidas, Bungalow Road, Jawahar Nagar, Delhi-7.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

२. बालनाटकानि पूजालालः (Rs. 9/-)

३. आदर्शबालकः श्रीमाता (Rs. 0·50)

४. दुर्गास्तोत्रम् श्रीअरविन्दः (Rs. 0·50)

अस्य पुस्तकत्रयस्य प्राप्तिस्थानम्—SABDA, Sri Aurobindo Ashram, Pondicherry-605002.

५. अभिनवा पाठावलिः (प्रथम-द्वितीय-तृतीयभागाः) ले. विनायक पाण्डुरङ्ग बोकील (Rs. 7/- ?). Published by Macmillan & Co. Ltd. 276 Dr. Dadabhai Naroji Road, Bombay-1.

६. संस्कृत-वालादर्शः, -प्रथमादर्शः, -द्वितीयादर्शः, -तृतीयादर्शः (चत्वारि पुस्तकानि—Rs. 9·50). Published by R. S. Vadhyar and Sons, Kalpathi, Palghat-3, Kerala.

७. बालनिवन्धमाला (Rs. 2·50)

८. सरल-संस्कृत-निवन्धादर्शः (प्रथमभागः) (Rs. 4/-)

अस्य पुस्तकद्वयस्य लेखकः—श्रीयुक्तः वासुदेवद्विवेदी शास्त्रिमहोदयः । वासुदेवार्यस्य सरल-संस्कृत-साहित्यं प्रति अवदानं सुमहत् इति असन्दिग्धम् । अस्मिन् पुस्तकद्वये क्वचित् क्वचित् जनपदीयप्रभावः संस्कृतप्रकृतेः अभावश्च लक्ष्येत । सः खलु न गण्यः । नूनम् उपादेयम् इदं पुस्तकद्वयम् । प्राप्तिस्थानम्—सार्वभौम-संस्कृत-प्रचार-कार्यालय, डी. ३८ । ११० हौजकटोरा, वाराणसी ।

९. प्रत्येकराज्यस्य संस्कृत-पाठ्य-पुस्तकानि ।

श्रीअरविन्दाश्रमस्य अन्येषां च वहूनि संस्कृत-प्रकाशनानि अपि प्राप्याणि सन्ति । आरम्भकाणाम् आर्थिकस्थितिस्तरादिदृष्ट्या तेषाम् उल्लेखः अत्र न क्रियते । एतेषु केषाञ्चित् किञ्चिद् मूल्यवृद्धिः अपि सम्भाव्यते । अतः तत्तत्प्रकाशकैः सह पत्राचारः कर्तव्यः इति शम् ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)